सरस्वतीभवन-ग्रन्थमाला

(१४)

भगवद्गीताभाष्यं

भट्टभास्करविरचितम्

वाराणसेय-संस्कृत-विश्वविद्यालयः

SARASVATĪ BHAVANA GRANTHAMĀLĀ

Vol. 94

GENERAL EDITOR
Baladeva Upadhyaya
Director
Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

BHAGAVADGĪTĀ BHĀṢYA

by

BHĀSKARĀCĀRYA

VARANASI
1965

Published by—
Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

Parijata Press
Ramkatora, Varanasi.
(pp. 1—64)
Remaining pages printed by
Sarita Press
Kalbhairava, Varanasi.

सरस्वतीभवन-ग्रन्थमाला

(९४)

श्रीमद्भगवद्गीतायाः

भगवदाशयानुसरणाभिधानभाष्यं

भगवद्भास्करविरचितम्

सम्पादकः

डा० सुभद्रोपाध्यायः ।

वाराणस्याम्

१८८७ तमे शकाब्दे

प्राप्तिस्थानम्—
प्रकाशनविभागः
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी—२

मूल्यम्—५·५०

प्रास्ताविकम्

अथेदानीं भेदाभेदप्रतिपादनपरमाचार्येण श्रीभास्करेण विरचितं लुप्तप्रायिकं गीताभाष्यं प्रकाशयतो ममान्तरात्मा नितान्तं परितुष्यति। अपूर्णोऽप्ययं व्याख्याग्रन्थः स्वप्रतिपादिततथ्यानि वैशद्येन सुबोधरीत्या प्रतिपादयन् गीताभाष्यश्रेण्यां किमपि माहात्म्यमण्डितं स्थानमाटीकतेतराम्। हस्तलेखद्वयमाधारीकृत्य सुसम्पादितोऽयं ग्रन्थः सम्पादक-डा० सुभद्रझामहाभागस्य सम्पादनकौशलं परिश्रमं पाण्डित्यं च भूरिश उद्गिरति। गीताभाष्यमिदं भेदाभेदवेदान्तमतमनुसृत्यैव प्रवर्तते। अतोऽस्य विशिष्टमतस्यैतिहासिकीं परम्परामनुरुध्य स्तोकमेवाधस्तात् किञ्चिदुदीर्यते विषयावगतिसौविध्याय वेदान्ततत्त्वजिज्ञासूनां विपश्चिताम्।

भारतीये दार्शनिकजगति भेदाभेदसिद्धान्तो नितान्तं प्राचीनः। अस्य मतस्य पोषका आचार्या न केवलं श्रीशङ्कराचार्यात् पूर्वमेवोपलभ्यन्ते, अपि तु ब्रह्मसूत्रकर्तुः श्रीबादरायणात् प्रागेव तेषां समुपलभ्यमाना सत्ता नियतमेवास्य वेदान्तसम्प्रदायस्य प्राचीनतामाविष्करोति। श्रीबादरायणात् प्राक्कालीनौ आचार्यौ औडुलोमिः आश्मरथ्यश्च नूनमेव भेदाभेदमतावलम्बिनावास्तामिति ब्रह्मसूत्रतोऽवधीयते। आचार्याश्मरथ्यमतेन कारणात्मना जीवब्रह्मणोरैक्यं प्रतिपाद्यते, परन्तु कार्यात्मना द्वयोरनैक्यं जागर्ति। यथा कारणात्मना सुवर्णस्य ऐक्य-भावापन्नेऽपि कटककुण्डलादिकार्यरूपैस्तस्य नितान्तं भेदः स्फुटं प्रतीयते, तद्वज्जीवब्रह्मणोरपि भेदाभेदव्यवस्था समुन्नेया (ब्रह्मसूत्रे १।४।२०)। आचार्यश्रीऔडुलोमिमतेन तु भेदाभेदव्यवस्थितिरन्यरूपेण समाधेया। स तु जीवब्रह्मणोरैक्यानैक्यविषयेऽवस्थाविशेषमेव नियामकत्वेन हेतुभूतं मनुते। संसारदशायां नानारूपजीवानाम् एकरूपब्रह्मणः

सकाशाद् भेदो वैशद्येनावगन्तुं शक्यः, परन्तु मुक्तिदशायां चैतन्यस्यैकरूपत्वात् चैतन्यरूपाणां मुक्तजीवानां ब्रह्मणश्चाभेदो नितरां सुसम्पन्नः (ब्र० सू० १।४।२१)। आचार्यनिम्बार्कस्य साक्षाच्छिष्येण श्रीनिवासाचार्येण स्वीयवेदान्तकौस्तुभे काशकृत्स्नोऽपि भेदाभेदवाद्याचार्यरूपेणैव व्यवस्थापितः—"तदेवं मुनित्रयमतद्वारा प्रसङ्गाद् भेदाभेदप्रकारो भगवता दर्शितः" (१।४।२२) इति वदता। परन्तु श्रीशङ्कराचार्यः काशकृत्स्नमद्वैतवादिनमाचार्यमुररीकरोतीति तस्य (१।४।२३) ब्र० सू० भाष्यात् स्पष्टं भवति। अत एते सन्ति भेदाभेदप्रतिष्ठानपरा श्रीबादरायणात् प्राक्कालीना वेदान्तविद आचार्याः।

भर्तृप्रपञ्चस्तु शङ्कराचार्यात् पूर्ववर्ती भेदाभेदप्रतिपादकः कोऽपि महनीय आचार्यः। तन्मतस्य खण्डनमाचार्येण बृहदारण्यकभाष्यस्य बहुषु स्थलेषु (२।३।६, २।५।१, ४।३।३०) विस्तरश आग्रहेण विहितः। भर्तृप्रपञ्चमतं त्वित्थं संक्षिप्यते—परमार्थस्त्वेकरूपोऽपि भवति, नानारूपोऽपि भवति। ब्रह्मरूपेण एकः, जीवरूपेण नाना। परमात्मन एकदेशमात्रं जीवो नाना। कामवासनादिजीवधर्माणां नानात्वाद् धर्मभेदात् दृष्टिभेदाच्च। जीवस्य नानात्वं न औपाधिकम्, अपि तु वास्तविकमेव। भर्तृप्रपञ्चमते ब्रह्मणः परिणामोऽपि सम्पद्यते। स परिणामस्त्रिधा निष्पन्नो भवति—(१) अन्तर्यामी—जीवरूपेण; (२) अव्याकृतः—सूत्र-विराड्-देवतारूपेण। (३) जातिपिण्डरूपैश्च। साधनपक्षेऽयमाचार्यो ज्ञानकर्मसमुच्चयवादी वर्तते। कर्मजन्यं फलं त्वनित्यमिति ध्रुवम्। परन्तु ज्ञानद्वारा विमलीभूतेन कर्मणा आत्यन्तिकं श्रेय उपलब्धुं नूनं पार्यते। अपरमोक्षपरमोक्षरूपेण च मोक्षस्य द्वैविध्यमामनुतेऽयमाचार्यः। अपरमोक्षेऽस्मिन्नेव शरीरे ब्रह्मसाक्षात्कारेण जायमाना मुक्तिरपवर्गशब्देन व्यपदिश्यते। जीवन्मुक्तिरूपोऽयं मोक्षः। परमोक्षस्तु विदेहदशायां देहपातादनन्तरं जीवस्य ब्रह्मभावापत्तावेव संभवति। इत्थं भर्तृप्रपञ्चस्य भेदाभेदसिद्धान्तो वेदान्तनये कमपि महिमानमाधत्ते।

[illegible] यादवो भेदाभेदवादी वेदान्तविदिति तु निश्चितम्। तस्याविर्भावकालो न प्रमाणैः साधु विनिश्चितः। यदि स श्रीरामानुजाचार्यस्य गुरुणा यादवप्रकाशेन साकमैक्यं भजते, तर्हि एकादशशत्या अन्तिमे भागे जनिमलभतेति निश्चेतुं सुशकम्। श्रीरामानुजाचार्येण वेदार्थसंग्रहे, वेदान्तदेशिकेन परमतभङ्गनाम्नि ग्रन्थे व्यासतीर्थेन च तात्पर्यचन्द्रिकायां तन्मतमुपन्यस्तम्। गौरवभिया न विशेषतोऽत्र निर्धार्यते। यादवस्तु श्रीशङ्कराचार्यादर्वाचीन इति तु निश्चितप्रायमेव, तयोः पौर्वापर्यनिर्णयस्य सौकर्यात्।

गीताभाष्यस्यैतस्य रचयिता भास्करः कं देशं कं च कालं स्वजन्मनाऽलञ्चकारेति नियतप्रमाणानामभावे न किञ्चिद् ध्रुवं निश्चेतुं पारयामः। रामानुजाचार्येण वेदार्थसंग्रहे, उदयनाचार्येण न्यायकुसुमाञ्जलौ वाचस्पतिमिश्रेण च भामत्यां भास्करस्य भेदाभेदमतखण्डनाद् वाचस्पतेः प्राक्कालिकतयास्य समयः खिष्टाब्दाष्टमशतीतो नार्वाग् भवितुमर्हति। भास्करशङ्कराचार्ययोः पौर्वापर्यकालिकविषये बहुशः सन्दिह्यते पण्डितैः। केचन भास्करः शङ्कराचार्यादर्वाचीन इति मन्यन्ते, परन्तु गीताभाष्यस्यैतस्य सम्पादकवर्यो नानाभिरभिनवाभियुक्तिभिस्तस्य शङ्करादपरकालिकतां निरस्य पूर्वकालिकतामेव प्रमाणयति। इमा युक्तयस्तर्काश्च तद्विरचितभूमिकात एवावगन्तव्याः।

भास्करस्य भेदाभेदमतविमर्शः साम्प्रतमत्र संक्षिप्यते।

ब्रह्म—तस्य मतेन ब्रह्म सगुणं सल्लक्षणं बोधलक्षणं सत्यज्ञानानन्तलक्षणं च वर्तते। तच्चैतन्यरूपं रूपान्तररहितमद्वितीयं च विद्यते। तस्मादेव सृष्टिः प्रवर्तते, प्रलयदशायां च सर्वे विकारा ब्रह्मण्येव प्रलीयन्ते। ब्रह्मणः शक्तिद्वयं वर्तते—एका भोग्यशक्तिः, अपरा च भोक्तृशक्तिः (ब्रह्मसूत्रभास्करभाष्ये २।१।२७)। भोग्यशक्तिरेव आकाशवाय्वाद्यचेतनजगद्रूपेण परिणमते। भोक्तृशक्तिस्तु चेतनजीवरूपमाधत्ते। ब्रह्मणः शक्तयः पारमार्थिका विद्यन्ते। समग्रशक्तिभिः सम्पन्नः परमात्मा सर्वज्ञः सर्वशक्तिमांश्च वर्तते। भास्करमतेन ब्रह्म स्वत एव परिणमते।

परिणामधारणं ब्रह्मणः स्वभाव एव भवति। यथा क्षीरं दधिभावाय कल्पते, अम्भश्च हिमभावाय कल्पते, तथैव ब्रह्मापि स्वभावत एव जगद्रूपेण परिणमते। तथा च भास्करभाष्यस्य वचनमिदं प्रमाणत्वेनात्रोपन्यस्यते—

"ब्रह्म स्वत एव परिणमते तत्स्वाभाव्यात्। यथा क्षीरं दधिभावाय अम्भो हिमभावाय, न तु तत्रापि किञ्चन आधारभूतं च द्रव्यमपेक्ष्यते, (भास्करभाष्ये, २।१।२४)। परिणामधारित्वेऽपि ब्रह्मणः स्वस्वरूपात् प्रच्युतिर्नैव जायत इति भास्करमतम्। यथा अच्युतस्वभावस्तन्तुः पटरूपेण परिणमते, अच्युतस्वभावाच्च आकाशात् वायुरुत्पद्यते, तथैव अच्युतस्वभावाद् ब्रह्मणो जगदिदं समुत्पद्यते। तथा भास्करस्य प्रमाणभूतं वचनम्—

अप्रच्युतस्वभावस्य शक्तिविक्षेपलक्षणः।
परिणामो यथा तन्तुनाभस्य पटतन्तुवत्॥

चेतनस्य सर्वज्ञस्य सर्वशक्तेः स्वतन्त्रस्य शास्त्रैकसमधिगम्यस्य परिणामो व्यवस्थाप्यते। स हि स्वेच्छया स्वात्मानं लोकहितार्थे परिणमयन् स्वशक्त्यनुसारेण परिणमयति (२।१।१४ भास्करभाष्यम्)।

जीवः—जीवोऽणुरूपो ब्रह्मणोऽग्निविस्फुलिङ्गवदंशश्च। स जीवो ब्रह्मणोऽभिन्नो भिन्नश्च। तत्र जीवब्रह्मणोरभेदः स्वाभाविकः, भेदश्चोपाधिजन्यः।

स च भिन्नाभिन्नस्वरूपः। अभिन्नरूपं स्वाभाविकम्, औपाधिकं तु भिन्नरूपम् (२।३।४३)।

उपाधेर्निवृत्तौ भेदो निरस्तो भवति। इयमेव मुक्तिः शुद्धपरमात्मरूपेणावस्थितिः। भास्करमतेन जीवब्रह्मणोर्भेदाभेदसम्बन्धः कार्यकारणवत् सम्बन्धमावहति। कार्यरूपेण नानात्वम्, कारणात्मनाऽभेदो भवति। यथा हेमात्मना अभेदः, कटककुण्डलाद्यात्मना भेदः सम्भवति—

कार्यरूपेण नानात्वमभेदः कारणात्मना ।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा ॥

मुक्तिः—भास्करस्तु मुक्तये ज्ञानकर्मसमुच्चयवादमुररीकरोति । नहि शुष्कादेव ज्ञानान्मुक्तेरुदयो भवति, अपि तु कर्मसंवलिताज्ज्ञानादेव । उपासनाया योगाभ्यासाद्वा ऋते ब्रह्मणोऽपरोक्षज्ञानं नैव लभ्यते साधकैः । भास्करो मुक्तेर्द्वैविध्यं समुद्गिरति—सद्योमुक्तिः, क्रममुक्तिश्च । कारण-ब्रह्मण उपासकाः साक्षात् सद्योमुक्तिं लभन्ते । कार्यब्रह्मण उपासकाः क्रम-मुक्तिं प्राप्नुवन्ति । अयं च तत्र क्रमः—कार्यब्रह्मणः समुपासकाः प्रथमतोऽ-र्चिरादिमार्गेण हिरण्यगर्भं प्राप्नुवन्ति । तत्र यावन्महाप्रलयस्तावत् स्थित्वा हिरण्यगर्भान्मुक्ता मुक्तिं लभन्ते । इयमेव क्रममुक्तिनाम्नाभि-धीयते । मुक्तिविषयकं स्वीयमतं भास्करोऽत्रापि गीताभाष्ये बहुषु स्थलेषु प्रतिपादयति । विशेषतः ४।१८ श्लोकस्य अत्रत्यं विस्तृतं भाष्यं जिज्ञासुभि-र्नितरां निभालनीयम् (पृ. ११४-११८)। एत एव भेदाभेदविषयकाः पदार्था गीताभाष्येऽप्यस्मिन् सुतरां चर्चिताः । भाष्यस्थपदार्थानां सम्यगवबोधायैतेऽत्र संक्षिप्ता वेदितव्याः ।

भास्करमतानुयायिनः श्रीनिम्बार्काचार्यस्य भेदाभेदस्वरूपविमर्शो मया मन्निर्मिते भारतीयदर्शनाख्ये ग्रन्थे (पृ० ४९९–५०५; पृ० ७७३–७७४) पूर्वमेव विहितः । एतज्जिज्ञासुभिस्तत एवावलोक-नीयम् । ग्रन्थविस्तरभिया नात्र बहुशः प्रपञ्च्यते । इत्थं वेदान्तनये भेदाभेदसम्प्रदायस्य कालतः प्राचीनता सिद्धान्तत आंशिकवैविध्यं च समुपलभ्यते । प्रख्यातानामेवैतद्विषयकाणामाचार्याणां मतान्यत्रोपन्य-स्तानि तत्त्वजिज्ञासूनां भृशमुपकरिष्यन्तीति मन्महे ।

अस्यापूर्वस्य कुत्राप्यप्रकाशितचरस्य गीताभाष्यस्य विलुप्ताक्षरं खण्डितं च हस्तलेखद्वयमाधृत्य महता परिश्रमेण सुसम्पादितोऽयं ग्रन्थः सम्पा-दकस्य डाक्टरसुभद्रझामहाभागस्य कामपि सम्पादनवैदुषीमाविष्करोति । नानाशर्मण्यभाषीयग्रन्थानामाङ्ग्लभाषायामनुवादकर्मणा लब्धवर्णो

भाषाविज्ञानस्य प्रौढिमण्डितः पण्डितः श्रीझामहोदयोऽनेन भास्कर-भाष्यसम्पादनकर्मणा सम्पादनकार्येऽपि स्वीयां विपुलां कीर्तिमातनुत इति नितरामानन्दस्यावसरोऽस्माकं कृते ।

अपूर्णत्वेऽपि महत्त्वपूर्णं गीताभाष्यमिदं प्रकाश्य संस्कृतविश्वविद्यालयेनामुना सर्वेऽपि वेदान्ततत्त्वजिज्ञासवो जनाः सुतरामुपकृता इति मन्ये । अलब्धांशस्य भाष्यस्य हस्तलेखो यदि कुत्राप्युपलभ्येत तर्हि तत्सूचनां प्रदाय मामनुग्रहीष्यन्ति कृपालवो वेदान्तचणाः पण्डिता इति निवेदयते ॥

वाराणसी
कार्तिकी पूर्णिमा २०२२ सं०
९-११-६५

बलदेव उपाध्यायः
सञ्चालकोऽनुसन्धानप्रतिष्ठानस्य ।

श्रीहरिः शरणम्

निवेदनम्

श्रीमद्भगवद्गीतायाः सन्ति बहूनि भाष्याणि । तत्र भगवतः शङ्कराचार्यस्यैव भाष्यं लोके प्रथिततमम् । तत्र भगवतः शङ्कराचार्यस्य मतानि दूषयित्वा स्वमतस्थापकेषु भगवान् भास्करोन्यतमः प्रायः प्राचीनतमश्च । यथा भगवता शङ्कराचार्येण बादरायणकृत-ब्रह्मसूत्रस्यानेकासामुपनिषदां श्रीमद्भगवद्गीतायाश्च भाष्यं निर्मितम् । तथा भास्कराचार्येणापि मन्ये कृतम् । भास्कराचार्यकृतेष्वेतेषु वेदान्तग्रन्थेषु केवलं ब्रह्मसूत्रभाष्यं मत्पूर्वं सरस्वतीभवनाख्यग्रन्थालयस्याध्यक्ष्यं निर्वहद्भिर्महामहोपाध्यायपण्डितविन्ध्येश्वरीप्रसादद्विवेदीतिसंज्ञकैर्महानुभावैः खीस्तीये १९१५ तमेब्दे प्राकाश्यमनायि । भास्कराचार्येण कृतस्य छान्दोग्योपनिषद्भाष्यस्य कश्चिदपि ग्रन्थो नोपलब्धोद्यापि । भास्कराचार्यस्य गीताभाष्यस्यैकः खण्डितः कोषः सरस्वतीभवने वाराणस्यामासीत् पूर्वतः ।

तमेव कोषमवलम्ब्य १९५२ तमे खीस्ताब्दे तदोपलब्धस्यांशस्यैव संशोधनेहं प्रावर्तिषि । तदनन्तरममेरिकादेशीयहारवार्दविश्वविद्यालयप्राचार्या भारतीयदर्शनानां प्रकाण्डविद्वांसः श्रीमन्तो ह० ह० इङ्गाल्जमहानुभावा उत्तरप्रदेशराज्यस्य शासकानामादेशं प्राप्य ग्रन्थोयं हारवार्द-प्राच्यदेशीयविद्याग्रन्थावल्यां प्रकाश्यतामित्यहमनुरुद्धः । एतदर्थं विशेषतो यत्नवानभवम् । कियत्कालानन्तरमुदन्तपत्रेभ्य इदमवगत्य यन्मद्रासविश्वविद्यालयस्य सुरभारत्यध्यापकमुख्यैर्विस्मृतिरत्नाकरगर्भस्थानेकसंस्कृतग्रन्थरत्नोद्धारकैः श्रीमद्वेङ्कटरामराघवशर्मभिर्गोरण्डदेशीयादेकस्मात् पुस्तकालयाद् भगवद्भास्करकृतगीताभाष्यस्यैकः कोष उद्धृत इति तस्य कोषस्य छायालिपिं पण्डितप्रवरश्रीराघवमहाशयेभ्यः श्रीमदिङ्गाल्जमहानुभावानुरोधेनाहमलभे ।

अतः पुरो वर्तमानस्य ग्रन्थस्यास्य संशोधनं मयोक्तकोषद्वयस्यैव साहाय्येन कृतम् । तत्र प्रथमः सरस्वतीभवनस्थः कोषो व-इति चिह्नेन, द्वितीयो गोरण्डस्य कस्माच्चिद् ग्रन्थालयाल्लब्धश्छायालिपिमयः कोषो ल. इति चिह्नेनात्र

सङ्केतितः। उभावपि कोषावाद्यन्तपत्ररहितौ। अतो द्वावपि काभ्यां कयोः स्थानयोः कदा वा लिखिताविति ज्ञातुं न प्रभवामो वयम्।

तत्र वसङ्केतितो ग्रन्थ एकसप्ततिपत्रयुक्तो द्वितीयं पत्रमारभ्य द्वासप्ततिपत्रपर्यन्तः। कोषस्यास्य सरस्वतीभवनस्थापितकोषाणां मध्ये आगमनक्रमसंख्या १६५५९ प्राचीनागमनक्रमसंख्या २५१२। पत्राणामाकारः ९.८"×४.३"। प्रतिपृष्ठं पङ्क्तिसंख्या ११, प्रतिपङ्क्ति अक्षरसंख्या ३१। प्रथमाध्यायस्य पुष्पिकापाठस्तु—

इति श्रीमद्भगवद्गीतासु भगवद्भास्करकृते भगवदाशयानुशरणाभिधाने भाष्येर्जुनविषादो नाम प्रथमोध्यायः॥ अतस्तस्माद् ज्ञायते भगवद्भास्कराचार्यप्रणीतश्रीमद्भगवद्गीताभाष्यस्याभिधानं भगवदाशयानुशरणाभिधानं भाष्यमिति। कोषस्यास्यारम्भ आभासभाष्यस्य महाभारतीयस्य—इयं हि त्रिषु इति श्लोकस्थेन प्रतिष्ठितमिति पदेन समाप्तिस्तु सप्तमाध्यायषोडशश्लोकभाष्यस्थेन सम्बद्धश्लोकप्रतीकेन चतुर्विध इत्यनेन। तदनन्तरं केवलञ्च इत्येकमेवाक्षरं वर्तमानम्। मध्ये तु द्वितीयाध्यायस्य सप्तपञ्चाशश्लोकार्द्धेन विरतिः तृतीयाध्यायस्य तृतीयश्लोकभाष्यस्थेन यथा त्रिदण्डेन त्रिदण्डीत्यंशेन। षष्ठाध्यायस्य द्वितीयश्लोकस्य प्रयुक्त इति एतस्य स्थाने मुद्रितेन प्रयुक्तेन इति पदेन कोषस्य तीया विरतिः पुनरारम्भश्च अध्यायस्यास्यैव षड्विंशश्लोकभाष्यस्थेन संन्यासमिति पदेन।

कोषेस्मिन् चतुर्थाध्यायस्यैकत्रिंशश्लोकपर्यन्तं सर्वेपि श्लोकाः पूर्णा उद्धृताः। तदनन्तरं श्लोकाः प्रतीकभूतैरेव सूचिताः। कोषस्यास्य लिपिर्देवलिपिः, तत्र 'एङः पदान्तादति' इति पाणिनीयसूत्रप्राप्तपूर्वरूपबोधकमिदानीं प्रचलितं लुप्ताकारसंज्ञकं चिह्नं प्रायेण न लिखितम्। यथा अवशोस्वतन्त्रः (दृश्यतां ३८ तमे पृष्ठे। अ० ३ श्लोकः—५)। सोपि······ (दृश्यतां ७१ तमे पृष्ठे। अ० ७ श्लोकः ८)। कोषेस्मिन् वकारबकारयोः, मकारशकारयोः, णकारशकारयोः, एकारणकारयोरेकस्य स्थानेन्यस्योपयोगः। च्चकारः श्चकार इव, श्चकारश्च, च्चकार इव, श्रकारस्तु श्नकार इव श्नकारो वा श्रकार इव दृश्यते। एतत्प्रकारकलेखनेन ज्ञायते कोषोयं काश्मीरदेशीयलिपिमस्य कोषस्य प्रतिलिपिरिति। सन्ति हि बहूनि विविधप्रकाराणि

मात्राक्षरपदवाक्यस्खलितानि यानि ग्रन्थस्य पृष्ठानामधोभागे टिप्पणरूपेण निर्दिष्टानि ।

लकोषस्यादिमानि चतुस्त्रिंशत् पत्राणि भ्रष्टानि । पञ्चत्रिंशपत्रमारभ्य द्वाषष्टिसंख्यकपत्रान्तानि सर्वाणि पत्राणि लब्धानि । पत्राकारस्त्वज्ञात एव । प्रतिपत्रं प्रायेण पञ्चविंशतिः पङ्क्तयः, प्रतिपङ्क्ति च प्रायेण विंशतिरक्षराणि । लिपिस्तु कश्मीर-देशीया । कोषारम्भश्चतुर्थाध्यायदशमश्लोकभाष्यस्थेन–इत्युभय-विशेषणोपादानम्—इत्यंशेन, कोषसमाप्तिश्च नवमाध्यायत्रयस्त्रिंशश्लोकभाष्यस्य इत्यंशेन । मध्ये अष्टचत्वारिंशतमे पृष्ठे षष्ठाध्यायस्य द्वितीयश्लोकभाष्यस्य-क्तिरित्य-भिप्रेत्योक्तं य..स इति एतस्मात् परं स्थानं शून्यम्, परपृष्ठारम्भस्तु तस्यैवाध्यायस्य षड्विंशश्लोकभाष्यस्थेन (ता)नात्मवशं कुर्यादित्यर्थः, इति वाक्येन । कोषेऽस्मिन् व्याख्याताः श्लोकाः प्रतीकसंकेतिताः । कोषेष्वत्र सन्ति अल्पसंख्यकानि स्खलि-तानि, तानि च पत्रोपान्ते निर्दिष्टानि । कोषोऽयं कस्याप्यपूर्णकोषस्य प्रतिलिपि-रिवाभाति ।

उभयोः कोषयोः समान्यपि स्खलितानि लक्ष्यन्ते । यथा येन इत्यस्य यंन इति (दृश्यताम् १३३ तमे पृष्ठे) अथवा अत्र इत्यस्य स्थाने अथ अत्र इति (दृश्य-ताम् १३७ तमे पृष्ठे) इत्यादयः । किन्तु वसंकेतितः कोषः लसंकेतितकोषस्य नास्ति प्रतिलिपिः । यतः पञ्चमाध्याये षष्ठश्लोकभाष्ये संन्यासी···मुनिः इत्यंशो नोपलभ्यते ल-कोषे । अपि च षष्ठाध्याये द्वितीयश्लोकभाष्ये 'श्रीगीताध्यायस्यायं' इत्यनावश्यकः पाठो वर्तते । तदनन्तरं लकोषस्थो यथा वैद्यशब्दः···इति अंशो वकोषे नास्ति ।

इत्थं द्वावपि कोषौ परस्परं भिन्नावपि प्रायेणैकस्यैव समानकोषस्य विभिन्न-कालीने प्रतिलिपी प्रतिभातः ।

षड्दर्शनानि भारतीयानां वेदमाश्रित्य प्रवर्तितानि । तेषु वेदान्त उत्तर-मीमांसा वा अन्यतमः । वेदा मन्त्रब्राह्मणोपनिषदारण्यकानि । तत्र मन्त्रा यज्ञसाधनभूता इति मतमाश्रित्य प्रवर्तते ब्राह्मणम् । मन्त्रा अध्यात्मवादमाश्रित्य प्रवर्तिता इति मतमाश्रित्य प्रवर्तयाम्बभूवुरुपनिषदः । यज्ञदृष्ट्या मन्त्रब्राह्मण-वाक्यानि प्रमाणरूपेण स्वीकृत्य तद्व्याख्यादिपुरस्सरं धर्मादिविवेचनात्मकं मीमांसाशास्त्रम् । तत्र केवलं धर्मविवेचनात्मको भागः पूर्वमीमांसेतिनामकं महर्षिजैमिनिना विरचितं शास्त्रम्, यदेव मीमांसेत्यपि कथ्यते लोके । आत्मपरमात्म-

विषयकं मन्त्रब्राह्मणोपनिषद आश्रित्य प्रवर्तितं मीमांसाशास्त्रम् उत्तरमीमांसाशास्त्रम् । यदेव प्रायेण वेदान्त इति नाम्ना व्यवह्रियते ।

तत्रोत्तरमीमांसा पूर्वमीमांसया सह एकमेव शास्त्रम् । अतो यदा धर्मज्ञानं संजातं तदनन्तरमात्मनो ब्रह्मणो वा जिज्ञासाया अधिकारो मुमुक्षोर्जायते, यतः पूर्वमीमांसाप्रतिपादितकर्मानुष्ठानजन्यधर्मंचितः स्वर्गलोकोन्यद्वा पूर्णं फलं कालक्रमेण क्षीयते । अतो धर्मलभ्यलोकविलक्षणमनुत्तमं निःश्रेयसं किमपि लब्धुं यत्नः कर्तव्यः प्राणिभिः । तन्निःश्रेयसमात्मज्ञानरूपम् 'सोहम्, तत्त्वमसि, अहं ब्रह्मास्मि" इत्यादिप्रकारकानुभवरूपम् , अथवा स्वपरया शक्त्या सृष्टिमुत्पाद्य तां संवर्द्धयतो यथाकालं स्वस्मिन् संहरतो नारायणस्य भक्त्या लभ्यं तत्सान्निद्ध्यमिति वेदान्तेन प्रतिपाद्यत इति मन्यन्तेन्ये विपश्चितः ।

इत्थं केवलेन ज्ञानेन धर्मसाहाय्यविरहितेनानुभवितुं योग्यमात्मज्ञानं वा ब्रह्मज्ञानं निःश्रेयसमिति मन्यमानैर्महर्षिभिरद्वैतसंज्ञकं दर्शनं प्रवर्तितम् । धर्मसाहाय्येनैव कर्मणा समुच्चितेन वा ज्ञानेनानुभवितुं योग्यं ब्रह्मात्मैकत्वमिति मतमाश्रित्य प्रवर्तितानि दर्शनानि विशिष्टाद्वैत-शुद्धाद्वैत-द्वैत-ज्ञानकर्मसमुच्चयवादादिप्रतिपादकानि बहुभिर्विज्ञैर्महर्षिभिः । इत्थं सर्वैरपि परस्परं विरुद्धमिव भाषमाणैर्विभिन्नवेदान्तमतवादिभिः स्वमतस्थापनं वेदान्तसूत्रोपनिषद्गीतावचनानां स्वमतानुसारं व्याख्यातानां साहाय्येन क्रियते । पूर्वमीमांसाया उत्तरमीमांसा सर्वथा सम्पर्करहितेति ज्ञानमात्रैकप्रतिपादका अद्वैतवादिनः । पूर्वमीमांसया सह उत्तरमीमांसाशास्त्रमेकं पूर्णं भवतीत्यन्ये ।

इममेव मतभेदमाश्रित्य वेदान्तशास्त्रस्याकराणामुपनिषद्गीताब्रह्मसूत्राणां वाक्यानामर्थकरणे भेदः प्रवर्तते, सर्वैरपि वेदान्तशास्त्राभिज्ञैरेतत्स्वीक्रियते यदेतेषां त्रयाणामेकवाक्यता, किन्तु अद्वैतवादिभिरुद्घोष्यते एनेषां त्रयाणां ग्रन्थानामुद्देश्योद्वैतब्रह्मज्ञानादिप्रबोधनमेवार्थ इति । तदन्यैश्च व्याख्यातृभिरेतेषां ग्रन्थानां वाक्यानि स्वाभिप्रेतमतबोधपरकतया व्याख्यायन्ते । स्वमतपोषणाय यथा ब्रह्माद्वैतमतवादिभिः परमतदूषणं स्थाप्यते । इमे सर्वे बौद्धानां सांख्यानां न्यायवैशेषिकादीनां च मतानि दूषयन्तः स्वपरमतवादिनां वेदान्तिनामपि मतमनिशं दूषयन्ति । इत्थं स्वमतख्यापनाय परमतखण्डनाय च प्रवर्तिता प्रवृत्तिर्वेदान्तवादानैक्यायाकल्पत ।

तत्रादौ महर्षिगौडपादाचार्या मुण्डकोपनिषदमाधृत्य काश्चन अद्वैतमतप्रतिपादिकाः कारिका गौडपादमाण्डूक्यकारिका इति प्रसिद्धा निर्ममे । प्रायेण गौडपादादीषत्पूर्वम् ईषत्पश्चाद्वा वृत्तिकारा इति प्रसिद्धाः केचनाचार्याः स्वमतमेकं प्रख्यापयाम्बभूवुः, तदेव हि मतं ज्ञानकर्मसमुच्चयवाद इति कथ्यते । ज्ञानकर्मभ्यां समुच्चिताभ्यामपवर्गो मोक्षो वा वेदान्तशास्त्रेण प्रख्याप्यते, नाद्वैतब्रह्मज्ञानादिति तेषामभिप्रायः । औडुलोमिं ह्याचार्यं भेदाभेदवादिनं भगवान् शङ्करो ब्रह्मसूत्रप्रथमाध्यायचतुर्थपादैकविंशसूत्रभाष्ये वर्णयति ।

गौडपादाचार्ये दिवंगते तच्छिष्यभगवद्गोविन्दपादशिष्यो भगवान् शङ्कराचार्यो वेदान्तग्रन्थानामद्वैतमतपरत्वं मतान्तरखण्डनपुरस्सरं स्वभाष्येषु प्रतिपादयामास, तथैव वृत्तिकारेतीते तदनुयायी औडुलोमेर्मतमनुसरन् भगवान् भास्करः मतान्तरखण्डनपुरस्सरं स्वकृतवेदान्तग्रन्थभाष्येषु ब्रह्मजीवयोर्भेदाभेदपरत्वं ज्ञानकर्मसमुच्चयफलापवर्गपरत्वं च वेदान्तग्रन्थानां प्रतिपादयामास ।

अयं भगवान् भास्करः कदा समजनिष्ट कस्मिन् प्रदेशे कुले वेति निश्चेतुं वयमसमर्थाः । अनुमीयतेयं भगवतः शङ्कराचार्यादनतिदूरवर्तिनि काले संजात इति । अनुमानस्याधारश्चायमेव वर्तते यद्भास्कराचार्यैरद्वैतमतखण्डनं तथैव क्रियते यथा शङ्कराचार्यैर्ज्ञानकर्मसमुच्चयवादखण्डनम् । नहि भगवान् शङ्करः भास्करस्य नामोच्चारयति, न च भगवान् भास्करः शङ्करस्य । स्यादेदद् यत् तयोः शङ्करभास्करपूर्ववर्तिनोर्ज्ञानवादज्ञानकर्मसमुच्चयवादयोः शङ्करभास्करौ प्रख्यापकावेव । अत एकस्य मते अन्येन दूषिते न द्वयोराचार्ययोः समकालीनता पूर्वापरकालीनता वा प्रमेतुं शक्यते ।

केवलं निश्चितमिदं यद् भगवान् भास्करः पूर्वमीमांसाग्रन्थश्लोकवार्त्तिकादिकर्तुः कुमारिलभट्टेभ्योर्वाचीनः, यतो गीताया नवमेध्याये त्रयस्त्रिंशश्लोकभाष्ये भट्टपादानां नामोल्लेखस्तन्मतनिर्देशपुरस्सरमनेनाकारि । अय च मिथिलादेशनिवासिन उदयनाचार्यस्य पूर्वकालीन इत्यपि निश्चेतुं शक्यते, यतो न्यायकुसुमाञ्जलौ भगवता भास्करेण प्रख्यापितं ब्रह्मपरिणामवादं निन्दयति उदयनाचार्यः । अतः खीस्तीयाब्दाष्टमशत्याः परवर्ती खीस्तीयाब्ददशमशत्याः पूर्ववर्ती अयं भगवान् भास्करः ।

भगवान् भास्करस्त्रिदण्डिमतख्यापकः अतः त्रिदण्डी आसीदित्यनुमीयते पण्डितप्रवरैर्विन्ध्येश्वरीप्रसादद्विवेदीमहानुभावैः । तत्र प्रमाणं न्यायकुसुमा-

ञ्जलिप्रकाशे वर्द्धमानोपाध्यायानां वाक्यम्—भास्करस्त्रिदण्डिमतभाष्यकार इति । स्मृतौ च मननादौ त्रिदण्डयज्ञोपवीतादिनियमादुत्तमाश्रमः स्वरूपतो धर्मतश्च निर्ज्ञात इति नातिप्रसङ्ग इति च ब्रह्मसूत्रतृतीयाध्यायचतुर्थपादषड्विंशसूत्रस्थ-भास्करवाक्यम् ।

अत्रावधेयम्—ब्रह्मसूत्रे एतादृशि वाक्ये सत्यपि यथा त्रिदण्डेन त्रिदण्डोनाश्रमी लक्ष्यत इति गीतातृतीयाध्यायतृतीयश्लोकभाष्ये ब्रुवतो भास्कराचार्यस्य कः सम्प्रदाय इति निश्चेतुं वयं न शक्नुमः । रामानुजाचार्यादयोन्ये प्रसिद्धास्त्रिदण्डधारिणः । एकवेणविनश्च शाङ्करमतानुसारिणः सन्न्यासिनः । एकवेणिनः सर्व-कर्मत्यागवादिन इत्याह स्म भगवान् भास्करो गीतातृतीयाध्यायचतुर्थश्लोक-भाष्ये । एकवेणवो ह्येतेनापास्ता इत्याह स्म तत्रैव । अत एव नायं भास्कर एक-वेणुधारी । तस्यैवाध्यायस्य चतुर्थश्लोकभाष्ये परिव्राजका ब्रुवते केवलादेव ज्ञानान्मुक्तिः । अत एव नायं परिव्राजकः । अबुद्धयोल्पबुद्धयोयमपि नारायणाख्यो विष्णुर्महादेवादिवद्देवताविशेष एव नात्राधिक्यं किञ्चिदस्तीति ।...समस्त-जगतो मूलकारणमीश्वराणां ब्रह्मरुद्रेन्द्रादीनामप्यधीश्वर इति ब्रुवन् भगवान् भास्करो वैष्णवः, न तु शैव इति निश्चेतुं समर्था वयम् । गीतायाः सप्तमाध्यायस्य विंशश्लोकव्याख्याने रुद्रादित्यदुर्गागणपतिप्रभृतिदेवतानामुपासकानां द्वैतदर्शिनां भक्तानां न ततो निवृत्तिरिति ब्रुवाणो भास्करो न पञ्चदेवोपासकः स्मार्त इत्यनुमी-यते । नारायणस्य विष्णोर्वासुदेवस्यायं भक्त इति गीतासप्तमाध्यायस्योनविंश-श्लोकभाष्याद्वयं जानीमः । गीताया नवमाध्यायस्य षड्विंशश्लोकभाष्ये विष्णो-राराधने विल्वपत्रदानं विदधाति, न तु तुलसीदलदानमित्यस्य को हेतुरिति न ज्ञातुं शक्नुमः । तस्मादयं वैष्णवः पादपतनादिना विष्णुपूजां विधत्ते ।

उपर्युक्तपक्षे भगवतो भास्करस्य आश्रमादिविषयके सम्भूयमानेपि नात्र निश्चयोस्माभिः कर्तव्यः । यतो भास्करः स्वयमेवाह—गर्भाधानादिसंस्कार-संस्कृतो यथाविध्युपवीतो यथाशक्ति चीर्णवेदव्रतादिकोर्थावबोधपर्यन्तवेदाध्ययन-संस्कृतो गृहाद् वनं वनान्मौनमाश्रमाणां समुच्चयमङ्गीकृत्य विकल्पे वा ब्रह्मचर्या-द्यथारुचि शान्तोदान्तः श्रद्दधानस्सोपवर्गेधिकारभाक् ।...न त्वनाश्रमिणो वेदो-योग्यत्वमिह मन्यते । अतो यदि त्रिदण्डोनाश्रमी नास्ति तस्य भास्करस्य मतावपवर्गेधिकारः । अपि तु भास्करो विष्णुपूजायां बिल्वपत्रं विधाय (गीता-नवमेध्याये षड्विंशश्लोकभाष्ये) स्वकीयं वैष्णवत्वमपि संदिह्यमानं सम्पादयति ।

अपि च ये केचन वैष्णवास्ते प्रायेण जातिभेदं नाङ्गीकुर्वन्ति, भास्करस्तु स्त्रीशूद्रौ नापवर्गभाजौ। तौ हि स्वर्गमात्रस्याधिकारिणौ। यतो भगवान् भास्करः क्षत्रियस्यापि भाक्तमेवापवर्गाधिकारं विधत्ते। अयं ब्राह्मण इति प्रायो निश्चितः किन्तु को ह्यस्य सम्प्रदाय इति निश्चेतुमसमर्था'वयम्।

ब्रह्मसूत्रप्रथमाध्यायप्रथमपादप्रथमसूत्रभाष्यस्थेन—क्षेमः सुभिक्षोयमतोहमस्मिन् देशे वसामि इति वाक्येन च भिक्षुकवृत्त्या कदाचिदयं जीवनं निरुवाहेत्यप्यनुमेतुं शक्यते।

भास्कराचार्यः शङ्कराचार्यस्य मायावादं ज्ञानमात्रलभ्यापवर्गवादमेव चाभिलक्ष्य ब्रह्मसूत्रभाष्यं प्रणीतवानिति बहुषु ग्रन्थकर्तृभिरिदानीन्तनैरुच्यते। न त्वेतत्सत्यम्। यथायं भास्करः शङ्कराचार्यं प्रच्छन्नबौद्धं मायावादिनमुक्त्वा यदि मायाशास्त्रं प्रच्छन्नबौद्धमेव चेति पद्मपुराणोक्ति पुष्णाति, तथैवायं बौद्धानां न्यायवैशेषिकाणां सांख्यानां मीमांसकानां च मतानि तथैव दूषयति। सर्वानेव स्वमतप्रतिपक्षिणोऽभिलक्ष्य भास्करेण भगवता ऊचे—

सूत्राभिप्रायसंवृत्त्या स्वाभिप्रायप्रकाशनात्।
व्याख्यानं यैरिदं शास्त्रं व्याख्येयं तन्निवृत्तये॥

यदा भगवान् भास्करः स्वमतं स्थापयति तदा स्वमतप्रतिकूलं ज्ञानकर्मसमुच्चयवादप्रवर्तकरूपेण प्रसिद्धं वृत्तिकारमपि न परिहरति, एतन्निश्चेतुं वयं प्रभवामः, गीताचतुर्थाध्यायाष्टादशश्लोकभाष्यस्थेन—अन्ये पुनरन्यथा व्याचक्षते। काम्ये कर्मण्यकर्म यः पश्येत् फलाभावमित्यादिवाक्येन भगवान् भास्करो वृत्तिकारमतदूषक इति ज्ञातुं शक्यते। यतोस्यैव श्लोकस्य शाङ्करभाष्यटीकायां मतमिदं वृत्तिकारव्याख्यानमित्याह। तस्यापि वृत्तिकारस्य मतं पूर्वपक्षरूपेणोपस्थापयन् भगवान् भास्करो नात्मवादपक्षपाती प्रत्युत सत्यान्वेषक इवानुसन्दधानः प्रतिभाति।

भास्करमतमवलम्ब्य बहुभिर्विद्वच्छिरोमणिभिरिदानीन्तनै रचनाः कृताः। भगवद्भास्करप्रतिपादितमतानामिदानीं निश्चयनं विशेषेण सुरेन्द्रनाथदासगुप्तमहाशयानां भारतीयदर्शनेतिवृत्तस्य पञ्चदशाध्यायात् श्रीनिवासाचार्यस्य भेदाभेददर्शनाच्चावगन्तुं शक्यते। अस्माभिर्बहवो विषया उल्लेखनीयास्तत्र भास्करग्रन्थेषु दृष्टाः किन्तु तेषां निरूपणं काले कदाचित् कर्तुमीहामहे।

भास्कराचार्येण न केवलं ब्रह्मसूत्राणां तथा गीताया एव भाष्यमकारि, किन्तु छान्दोग्योपनिषदापि भाष्यं तेन लिखितमिति तस्यैव—छान्दोग्ये च तत्र तत्रानयोर्मायाप्रविलयवादिनोर्निराकरणं विस्तरेण कृतमित्युपसंह्रियत इति ब्रह्मसूत्रप्रथमाध्यायचतुर्थपादैकविंशश्लोकभाष्यस्थेन वाक्येन ब्रह्मसूत्रतृतीयाध्यायाष्टमश्लोकभाष्यस्थेन छान्दोग्ये चायमेवार्थोऽस्माभिः प्रदर्शित इति वाक्येन चावगम्यते, तथा च यो भास्कर एव सूत्रभाष्यकारः स एव गीताभाष्यकार इति द्वयोर्भाष्ययोः प्रतिपादितविषयसाम्याद् भाषासाम्याच्च ज्ञातुं शक्यते। स प्रथमं छान्दोग्योपनिषद्भाष्यं, ततो ब्रह्मसूत्रभाष्यमन्ते च गीताभाष्यमकार्षीत्। यतो ब्रह्मसूत्रभाष्ये छान्दोग्योपनिषद्भाष्यं गीताभाष्ये च ब्रह्मसूत्रभाष्यमुदलेखीदसौ।

अभूवन् हि बहवो भास्कराभिधाना अनेके महान्तो ग्रन्थकाराः। तेषु केषाञ्चन नाम भट्टभास्कर आसीत्। माधवीयशङ्करविजयग्रन्थोल्लिखितो भगवच्छङ्कराचार्यसमकालीनो भट्टभास्करो रुद्राध्यायतैत्तिरीयसंहिताभाष्यकर्ता वा अस्मद्वेदान्ताकरग्रन्थभाष्यकर्ता चैक एव ग्रन्थकारो न वेतीदानीमप्यनुसंधेय एव। यद्यपि बहुभिर्विद्वद्भिरुपयुक्तग्रन्थानां कर्ता एक एव हि भट्टभास्कर इति स्वीकृतः।

भास्करेण कृतं गीताभाष्यं सम्पूर्णं न वेति ज्ञातुं न शक्नुमः, किन्तु भास्करभाष्यधृतः पाठो बहुषु स्थलेषु शङ्करभाष्यधृतपाठात् प्रचलितपाठाच्च भिन्नः। ग्रन्थान्ते संलग्नपाठान्तरचक्रेण पाठभेदस्थलानि पाठकैर्निश्चेतव्यानि।

कार्यमिदं कठिनं केनापि प्रतिष्ठितेन वेदान्तशास्त्रपण्डितेन कर्तुं योग्यमपि मयाल्पज्ञेन कथं सम्पादितमित्यत्र विद्वांस एव प्रमाणम्। प्राचीनकोषात् प्रतिपत्रं मया अर्थसङ्गत्यै पाठभेदः कृतः। तत्र मदीयानि स्खलितान्यवश्यमेव स्युरित्यत्रास्ति मे महान् सन्देहः। अकरणान्मन्दकरणं श्रेय इति वाक्यमनुसृत्य विद्वांसो मां क्षमयानुगृह्णन्तु।

ग्रन्थस्यास्य विदुषां समक्षं नयनाय प्रोत्साहेन परामर्शेन च मामुत्साहयन्तः श्रीमन्तो मान्या महामहोपाध्यायर्षिश्रीगोपीनाथकविराजमहानुभावा हावार्दप्राच्यग्रन्थावल्यामस्य प्रकाशनाय स्वीकृत्य पुनश्च वाराणसेयसंस्कृतविश्वविद्यालयादस्य प्रकाशनप्रस्तावमनुमोद्य श्रीवेङ्कटराघवशर्मभ्यो लन्दनपुस्तकालयस्थभास्कर-

गीताभाष्यच्छायालिपिं संप्रेष्य श्रीमदिङ्गाल्जमहानुभावा ग्रन्थोयं शीघ्रं प्रकाश्यतामिति भृशमनुरोद्ध्य श्रीवेङ्कटराघवशर्ममहानुभावाः पाठादिनिश्चये साहाय्यं विधाय काशिकहिन्दुविश्वविद्यालयमीमांसाध्यापकाः श्रीसुब्रह्मण्यशर्माणो वाराणसेयसंस्कृतविश्वविद्यालयप्राचार्यचरश्रीमदनन्तशास्त्रिफडकेमहानुभावा ग्रन्थालये संलग्नटिप्पणलिखनेन मद्गुरवः स्वर्गताः श्रीमदनन्तकृष्णशास्त्रिमहोदया ग्रन्थस्यास्य प्रकाशनाय आदिश्य विद्यावाचस्पतिपदवीं भजन्तो विश्वविद्यालयस्यास्यौपकुलपतिचराः श्रीमदादित्यनाथझामहाशयाः प्रकाशने त्वरार्थं व्यवस्थाप्य विश्वविद्यालयस्योपकुलपतिश्रीमत्सुरतिनारायणमणित्रिपाठिमहाशया मुद्रणे त्वरां विधायानुसन्धानसञ्चालकश्रीमद्बलदेवप्रसादोपाध्यायमहाशया मुद्रणस्य प्रतिपदं साहाय्यं विधाय सुहृद्वर्या ममान्यथापि साहित्यसहकर्मिणः श्रीव्रजवल्लभद्विवेदमहानुभावा भृशमुपकृत्य मामधमर्णतां नीतवन्त इति सादरं सस्नेहं च विज्ञापयामीति ।

१८८७ तमे शकाब्दे वृश्चिकगते
रवौ द्वितीये दिवसे गुरुवासरे
वाराणसेयसंस्कृतविश्वविद्यालये
वाराणस्याम् ।

श्रीसुभद्रोपाध्यायस्य ।

भगवद्गीताभास्करभाष्येलभ्यमाने द्वे वाक्ये

भास्करभाष्यस्य प्रथमपृष्ठस्य द्वे वाक्ये आनन्दजयतीर्थकृतगीताटीकाया उद्धृते । तयोः साहाय्येन भास्करकृतगीताभाष्यस्य लुप्तप्रथमपृष्ठस्य विषयोनुमातुं शक्यते । ते वाक्ये—

१. शास्त्रप्रयोजनाभिधाने प्रस्तुतेवतारप्रयोजनाभिधानमसङ्गतम् ।

२. ज्ञानकर्मसमुच्चयसाध्यत्वान्मोक्षस्य तत्प्रतिपादनाय गीतारम्भो न धर्मादि-प्रतिपादनार्थम्, तदर्थानां मन्वादिधर्मशास्त्राणां सनकादियोगशास्त्राणां च प्रतिकालं विद्यमानत्वात् ।

जयतीर्थटीकायाम्—यदाह भास्कर इति वाक्यादनन्तरमुपलभ्येते इमे वाक्ये । तत्र प्रथमं वाक्यं षष्ठे पृष्ठे द्वितीयं वाक्यं नवमे पृष्ठे ।

विषयसूची

विषयनाम			पृष्ठसंख्या
प्रास्ताविकम्	...	...	क–घ
निवेदनम्	...	...	छ–ण
अलभ्यमाने द्वे वाक्ये	...	...	त
शुद्धिपत्रम्	...	...	थ–द
प्रथमोध्यायः	...	...	१–३५
द्वितीयोध्यायः	...	...	३६–७७
तृतीयोध्यायः	...	...	७८–१०५
चतुर्थोध्यायः	...	...	१०६–१३३
पञ्चमोध्यायः	...	...	१३४–१५३
षष्ठोध्यायः	...	...	१५४–१६५
सप्तमोध्यायः	...	...	१६६–१७९
अष्टमोध्यायः	...	...	१८०–१९२
नवमोध्यायः	...	...	१९३–२०७
प्रथमं परिशिष्टम्			
व्याख्यातश्लोकसूची	...	...	२०९–२२०
द्वितीयं परिशिष्टम्			
पाठान्तरचक्रम्	...	...	२२१–२२३
तृतीयं परिशिष्टम्			
गीताभाष्योद्धृतवचनसूची	...	...	२२४–२३१

शुद्धिपत्रम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
४	१	तत्राक्तम्	तत्रोक्तम्
११	२	श्रात्रिय	श्रोत्रिय
२०	१	निगदव्याख्य ।	निगदव्याख्या (ताः) ।
२४	६	पृथिवी	पृथिवीं
२७	१५	रामहर्षश्च	रोमहर्षश्च
२८	१	ऊद्र्ध्वं	ऊर्द्ध्व
२८	१	(गाण्डीवं) ।	(गाण्डीवं)
२९	१३	त एवं मे	त एवेमे
३४	२०	तायुषमअप्रती-	तायुषमप्रती-
४१	१६	त्वं	स्वं
४५	२	त्स्याद्	स्याद्
४९	१३	भावोतदा-	भावस्तदा-
५०	१२	कारणदोषा-	कारणदोषो
५६	३	हेतु	हेतुः
६१	१५	देही सर्वस्य	देहे सर्वस्य
६४	३	नवं	नैवं
६५	१६	नेहाभिक्रम	नेहातिक्रम
७५	१९	मुनिरुच्यते	मुंनिरुच्यते
८५	१८	तथ्यपर्यालोचिन-	तथ्यपर्यालोचन-
८५	१९	अमृतधाराया	अमृतधारायाः
८७	१६	सन्ध्योपासनादि ।	सन्ध्यो···विशेषे ।
९४	९	स्मर्यन्ते	स्मर्यंते
९४	१३	ऊद्ध्वं	ऊर्द्ध्वं
१००	१३	मतमनुवतन्ते	मतमनुवर्तन्ते
११२	८	(मां विद्धि) ।	(मां विद्धि) ।
११४	८	विकमणः	विकर्मणः
११९	१४	द्वारेणाकर्मं	द्वारेणाकर्म

१२८	१५	काङि्क्षभिः	काङ्क्षिभिः
१३४	१४	कमसंन्यासात्	कर्मसंन्यासात्
१४१	६	स्यादजुनेन	स्यादर्जुनेन
१५२	५	मनोबुद्धिमुनि···	मनोबुद्धिर्मुनि···
१५७	५	सहसा भेदविज्ञान	सहसाभेदविज्ञान
१६२	१५	पाथ	पार्थं
१७०	१४	शशिसूययोः	शशिसूर्ययोः
१७५	७	प्रयोजनान्तरनिरपेक्ष	प्रयोजनान्तरनिरपेक्षः
१८०	५	किं कम	किं कर्म
१८३	१	अनन्तरोक्तमथ	अनन्तरोक्तमर्थं
१८५	१	स्वयोद्ध्वं	स्वयोर्द्ध्वं
१८६	१८	लोकानुग्रहाथ	लोकानुग्रहार्थं
१८७	५	यथावान्तर-	यथापान्तर-
१९०	४	तकालं	तं कालं
१९१	१८	श्रद्धालवः ।	श्रद्धालवः,
२०६	११	विधि हित-	विधिविहित-

श्रीमद्भगवद्गीताया

भगवद्भास्करकृतभगवदाशयानुसरणाभिधानभाष्यम्।

....

(इदं हि त्रिषु लोकेषु महज्ज्ञानं) प्रतिष्ठितम्[1] ।
विस्तरैश्च समासैश्च धार्यते यद् द्विजातिभिः[2] ॥
योधीते भारतं पुण्यं ब्राह्मणो नियतव्रतः ।
श्रावयेच्च महापुण्यं तस्य धर्मः सनातनः ॥
तपोनियममास्थाय[3] कृतमेतन्महर्षिणा ।
तस्मान्नियमसंयुक्तैरध्येयं[4] ब्राह्मणैरिदम् ॥
कृष्णप्रोक्तामिमां[5] पुण्यां भारतीमुत्तमां[6] कथाम् ।
श्रावयिष्यन्ति ये[7] विप्रा ये च श्रोष्यन्ति मानवाः ॥

इत्येवमादौ[8] श्रावयिष्यन्ति[9] इत्यत्र विप्रग्रहणाद् द्विजातीनामेवाध्ययने[10] श्रवणे चाधिकारो दर्शितः । इतरेषां तु--ये तु श्रोष्यन्ति मानवा इति मानवग्रहणाच्छ्रवण एवाधिकारः शास्त्रविरोधाच्चाध्ययने नाधिकारः[11] । तथा चोक्तं शुकोत्पत्तौ[12]—

सर्वस्तरतु दुर्गाणि[13] सर्वो भद्राणि पश्यतु[14] ।
श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः ॥

---

१. प्रतिष्ठितम् । २. यद्विजातिभिः । ३. तयोनियममास्पाय । ४. ०निपम० । ५. कृक्षम० । ६. ०तीसुन्नमां । ७. श्रावयंति चरेः । ८. द्रत्यवमादौ । ९. श्रावयन्तीत्यत्र । १०. ०णाद्विजातीनामध्ययने । ११. ०च्छ्रवण एवेति अधिकार शास्त्रविरोधाच्च नाधिकारः । १२. तथा च शुकोत्पन्तौ । १३. दुर्गाण । १४ पश्यनु ।

इति चातुर्वर्ण्यमध्यपातिनः[1] शूद्रस्य श्रवणमात्रं विधीयते[2] । रामायणे ह्ययमेवार्थो[3] विशेषेण प्रतिपादितः[4]—

पठन् द्विजो वागृषभत्वमीयात्[5]
स्यात् क्षत्रियो[6] भूमिपतित्वमीयात् ।
वैश्यस्तथा सर्वधनत्वमीया-
च्छृण्वन् हि शूद्रोपि[7] महत्त्वमीयात् ॥

इत्यत्रेतिहासश्रवणमात्रमेव शूद्रादेर्निर्णीतम्[8] । तत्रापि चाख्यायिकामात्रश्रवणे[9] न तु रहस्यवेदान्तार्थप्रतिपादनप्रदेशेषु सनत्सुजातीयगीतामोक्षधर्मादिषु,[10] तस्य वेदाध्ययनश्रवणतदर्थपरिज्ञानतदनुष्ठानानां[11] प्रतिषेधस्मरणात् । तथा च मनुस्मृतौ—

न शूद्राय मतिं दद्यान्नोच्छिष्टं[12] न हविष्कृतम् ।
न चास्योपदिशेद्धर्मं न चास्य[13] व्रतमादिशेत् ॥

इति चादृष्टार्थमतिदानधर्मोपदेशादिनिषेधात्[14] । न च स्वमनीषिकया ब्राह्मणोपदेशमनपेक्ष्य पुस्तकादेस्तद्विवरणाद्वा तदर्थमधिगम्य कर्मानुतिष्ठतः[15] फलाय तद् भवति,[16] प्रत्युत[17] शास्त्रनिषिद्धेनानुपनीतेन[18] गृहीतं (शास्त्रज्ञान)मनर्थोत्पादकम् । यतो न्यायस्मृत्याचाराविरोधी यः पदार्थः[19] स शास्त्रार्थः । तत्र न्यायः—यथोत्कृष्टनिकृष्टवर्णयोर्न (कर्म) तुल्य(ता), तथा न सदृशधर्मता युक्ता । तदुक्तम्—

---

१. वर्णान''''इतिवर्णमध्य० । २. श्रवणमात्रविधानात् । ३. ०णे धायमेवार्थो० । ४. प्रतिपादिनः । ५. वाग्वृषभत्व० । ६. –त्कृता तथा त्वया भूमिपतिपतित्व० । ७. ०याछण्वन् हि श्रूद्रोपि । ८. निर्णातंम् । ९. ०कामत्र० । १०. सनत्सुतातगीना० । ११. वेदाध्ययनं । १२. ०न्नोछ्चिष्टं ० । १३. ०दिशेम्दं मंन्नचा० । १४. चावृष्टार्थ० । १५. ०द्वादिगम्यास्यान्नतिष्टतः । १६. तभ्दवति । १७. प्रच्युत । १८. ०निषद्धेनानुपेयेन गृ० । १९. पदार्थंस ।

अपवर्गेऽधिकारस्तु स्त्रीशूद्राणां भवेद्यदि ।
जात्युत्कर्षो द्विजातीनामनर्थाय[1] ततो भवेत्[2] ।। इति ।

स्मृतिरपि—

विदुषा ब्राह्मणेनेदमध्येतव्यं[3] प्रयत्नतः ।
शिष्येभ्यश्च प्रवक्तव्यं[4] सम्यङ्नान्येन केनचित् ।। इति[5] ।

आचारश्चार्य्यदेशे ज्ञानशास्त्रश्रवणे तस्याप्रवृत्त्यैवावेदितः, यः शास्त्रविधिमुत्सृज्य इत्यादिना चेहापि प्रत्ययस्य प्रतिपादयिष्यमाणत्वात् । अत एवोक्तम्[6]—

अधिकारं विना यस्तु गृह्णाति शास्त्रमन्यथा[7] ।
तत्त्यक्त्वा[8] पावनं कृत्वा स्वधर्मं पुनराश्रयेत् ।।

पावनं प्रायश्चित्तम् । मनुना चाध्ययनश्रवणतदर्थानुष्ठान-युक्तस्यैव[9] द्विजातेर्ज्ञानेऽधिकारो दर्शितः[10]—

अधीत्य विधिवद्वेदान् पुत्रानुत्पाद्य[11] धर्मतः ।
इष्ट्वा[12] च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्[13] ।।

तद्रहितस्य द्विजातेरपि मोक्षेऽधिकारो[14] नोक्तः—

अनधीत्य द्विजो वेदमनुत्पाद्य तथा प्रजाम्[15] ।
अनिष्ट्वा चैव[16] यज्ञैश्च[17] मोक्षमिच्छन् व्रजत्यधः ।।

शूद्रस्य च वसिष्ठमुनिनाप्युपनयनादिभिरसंस्कार्यत्वं[18] प्रतिपादितम् ।

---

१. ०नथाय । २. ०वेधदि । ३. ०नेद्दमध्ये० । ४. प्रकर्तव्यम् । ५. ०चिदिनि । ६. ०प्रतिपादियिष्यमानत्वाद्दतरावोक्तम् । ७. गृहीतं शास्त्रमन्युथा । ८. तत्त्वक्त्का० । ९. ०नुष्ठानुयुक्तस्येव । १०. द्विजाती ज्ञानोधिकारो द्दर्शितः । ११. ०नुत्रा-तुत्पाध० । १२. द्दष्ट्वा । १३. निवेषयेत् । १४. ०क्षेरधिरउक्तः । १५. प्रज्ञाम् । १६. अन्विष्वा । १७. पत्तैश्चा । १८. पसिष्ट' ' 'संस्कारयत्वं० ।

तथा च तत्रोक्तम्—

गायत्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्यं[1] जगत्या[2] वैश्यं न केनचिच्छन्दसा[3] शूद्रम् इत्यसंस्कार्यो[4] विज्ञायत इति ।

किञ्च, भगवता साक्षाद्धर्मेणापि शापवशाद्विदुराख्यशूद्र-जन्मनात्मज्ञानविषये धृतराष्ट्रपृष्टेन शूद्रयोनिस्थत्वादनधिका-रित्वं[5] मन्यमानेन वेदार्थोपदेशार्थं सनत्सुजातमानयता[6] तत्रान-धिकारो दर्शितः[7] । तथा च तेनैव तत्रोक्तम्—

शूद्रयोनावहं जातो नातोन्यद्वक्तुमुत्सहे ।
ब्राह्मीं[8] हि योनिमापन्नः सुगुह्यमपि यो वदेत्[9] ॥
न ते(न) गर्ह्यो देवानां तस्मादेतद् ब्रवीमि[10] ते ॥

एवञ्च ब्राह्मणयोनिव्यतिरिक्तान्ययोनिजो[11] यदि गुह्यं वेदार्थं वदति तदा देवादिभिरसौ गर्ह्यते,[12] निषिद्धसेवनेन[13] पापयोगान्नरकादौ प्रक्षिप्यत इत्यर्थः ।

कुमारस्य तु या बुद्धिर्वेद तां[14] शाश्वतीमहम् ।

कुमारस्यानुज्झितब्रह्मचर्यस्य[15] सनत्सुजातस्य[16] या बुद्धि-र्यज्ज्ञानम्[17], बोधनं बुद्धिः, तामहं वेद । निरतिशयज्ञान-युक्तोसाविति जातिस्मरत्वाज्जानामि[18] । किन्तु निकृष्ट-जातिस्थत्वेनानधिकाराद्वक्तुं न शक्नोमि[19] ।

---

१. त्रिष्टभा राजन्य । २. जगता । ३. ०चिछंदश्रा । ४. ०संस्कारो ।
५. ०दन्ततधिकारि० । ६. सनत्सजातमानयत्र । ७. अधिकारि द्दर्शितः ।
८. ०वकुमुत्सहे ब्राह्मो । ९. ०पत्रस्सुगुत्वमपि यो वधवेत् । १०. ०द्ब्रूवीमि ।
११. व्राह्मणयोनिव्यतिरिक्तोन्ययोनिजो । १२. गस्वते । १३. निषिद्धासे० ।
१४. ०स्य त्वया वुभ्दिर्वेद्दतां । १५. ०नुजित० । १६. ०तथया । १७. वुद्धिर्यक्षानं ।
१८. ०जानाग्मि । १९. वक्नु न शक्नोमि ।

यस्ते गुह्यान् प्रकाशांश्च सर्वान् हृदयसंश्रयान्[1]।
प्रवक्ष्यति महाराज सर्वबुद्धिमतां वरः ॥

किं बहुना[2], सांख्यादिशास्त्रेष्वपि ब्राह्मणानामेवासुरिप्रभृतीनां[3] भगवद्भिः[4] कपिलमुनिप्रमुखैर्महात्मभिर्ज्ञानोपदेशः[5] कृतो नान्यस्य । इत्यतोपि[6] न शूद्रादेर्ज्ञानेधिकारोस्ति[7]। तस्मात् सकलेतिहासपुराणधर्मशास्त्रादिपौर्वापर्यपर्यालोचनेनायमेव[8] वाक्यार्थ इति स्थितम् ।

शास्त्रैकसमधिगम्या[9] किलाधिकारव्यवस्था धर्माधर्मव्यवस्थावन्न प्रमाणान्तरगम्या । को हि नाम भगवतो धर्मस्य हेतुतो निश्चयमवधारयितुं शक्तः[10]। हेतुतश्च धर्मव्यवस्थायां (करिष्यमाणायां) हेत्वनवस्थानाद् धर्मानवस्थानमपि प्रसज्येतेति। अतश्च—

स्त्रियो वैश्यास्तथा शूद्रास्तेपि यान्ति परां गतिम् ।

इतीदमपि लिङ्गम् ।

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।

इत्यपि कृतब्राह्मणराजर्षिविषयकप्रवर्तकविधिप्ररोचनार्थवादत्वेन[11] द्रष्टव्यम्,[12] न तु स्वार्थप्रतिपादनपरम्। लिङ्गं हि प्रमाणान्तरतः प्राप्तस्यैवार्थस्य[13] द्योतकं भवति, नाप्राप्तस्या-[14] प्रापकम्,[15] तेपि यान्ति इत्यभिधायकवर्तमानकालवाचिप्रत्ययान्तशब्दनिर्देशात्[16] पूर्वोक्तविधिसापेक्षत्वेन साकाङ्क्षत्वाच्च । वास्तवेन[17] रूपेणान्यपरं यद्वाक्यं[18] शब्देन चान्यार्थप्रतिपादकं तल्लिङ्गम् ।

---

१. अतस्सते गुह्यकात् प्रकाशांश्च सर्वान् त्वदसंश्रयान्। २. बहुता। ३. ०नामोवासुरि। ४. भगवभ्दिः। ५. ०प्रसुखैर्म०। ६. ०स्येत्पातो०। ७. ०करोस्ति। ८. ०र्वायर्यपर्यालोचनपापमेव। ९. शास्त्वकैसम०। १०. शक्रः। ११. ०वादत्येन। १२. द्रष्ठव्यं। १३. ०घोनक। १४. नाप्रप्तस्य। १५. प्रायकं। १६. ०लर्वच्चिप्र०। १७. ०वेन तुपेण। १८. यद्यवांशेब्दे०।

विधिनिषेधशेषतया त्वर्थवादानां[१] प्रवृत्तिः, न तु स्वार्थप्रतिपादकतया विषभक्षणादिवाक्यवद्[२] अर्थवादवाक्यानां परार्थत्वात् स्वार्थे[३] तात्पर्याभावाद्[४] अन्यपरत्वाद्विधिविहितार्थस्तावकतया[५] निषिद्धार्थनिन्दितृतया[६] च प्रवृत्तेरिति[७]। एतच्च[८] निपुणतरमत्रैव[९] नवमेध्याये वक्ष्यामः। अन्यच्च—

ज्ञानं विज्ञानमास्तिक्यं[१०] ब्राह्मं कर्म स्वभावजम्[११]।

इति ब्राह्मणस्यैव भगवान् धर्मः[१२] श्रेयःसाधनमिति दर्शयिष्यति[१३]।

यतोधिकृतानामार्य्याणां द्विजातीनामेव श्रुतिविहितनित्यनैमित्तिककर्मक्षपितकल्मषमोहभयायासानामुपास्यमान[१४] एष परमात्मातिगहनः संसारोपप्लवरहितोनन्तोक्षयोनादिरजोजरोमनोमयो[१५] निर्विकल्पोपापः सर्वलोकेश[१६] एक[१७] एव सर्वशरीरावस्थितः सर्वपदार्थावस्थितः सतता(सा)दितविमलभावः सर्वशक्तिः स्वशक्तिविभवजनितसकलाद्वैतसद्रूपः[१८] प्र(त्य)क्षो भवति। साधनवीर्यात्तेषामेव[१९] हि श्रुतिस्मृत्युक्तप्रशस्तयमनियमप्रमुखयोगाङ्गादिसम्भवादुपासकत्वेन च तेषामेव नियमात्त एव च[२०] तमात्मानं पश्यन्ति[२१]। तथा चानुक्रमण्यादावपि[२२] भगवता व्यासेनो(क्तम्)—

यत्तद्यतिवरा[२३] मुक्ता[२४] ध्यानयोगबलान्विताः।
प्रतिबिम्बमिवादर्शे[२५] पश्यन्त्यात्मन्यवस्थितम्॥

---

१. स्वर्थवादा०। २. विवभ०। ३. पदार्थत्वात् स्वार्थो। ४. ०भाषाद्०। ५. ०र्थास्तावकतया। ६. निदितृतया। ७. मवृत्ते रिति। ८. एत च। ९. तत्रेवेन०। १०. ०मास्तिकं। ११. ब्राह्मकर्मरखभा०। १२. घर्मं। १३. दृशयि०। १४. ०नैमित्रिक०.... ०मोहमपायासानाम्०। १५. संसारायप्लवरहितो०... ०नाधिरजो। १६. ०नाविकलोनापासस्सर्व०। १७. एकएक। १८. ०सकलद्वैत०। १९. ०वीर्याते०। २०. ०षामवनियमात् नरावच। २१. पश्यति। २२. ०मरापादा०। २३. यं तं यति०। २४. युक्ता। २५. प्रतिविंधमिवादर्शे।

यदक्षरं वेदविदो[1] वदन्ति (विशन्ति) यद्यतयो वीतरागाः ।

इत्यादिना विशिष्टजातीयाश्रमिविषये ध्यानेनात्मोपलम्भनमुपपन्नं[2] भवतीति प्रदर्शितम् ।

नाहं प्रकाशः सर्वस्य योगमायासमावृतः[3] ।

इति भगवानेव शूद्रादेरात्मदर्शनाभावं[4] प्रतिपादयिष्यति[5] । द्वैपायनोपि[6] —

शान्तात्मानो द्विजश्रेष्ठाः[7] प्राप्नुवन्ति तदक्षरम्[8] इति ।

अतः शूद्रादेर्ध्यानादिना[9] क्रियमाणेनापि न तत्प्राप्तिर्भवति,[10] नियमविधेर्भङ्गभयादखिलविद्याया[11] अधिकृतानुष्ठिताया[12] (एव) फलदातृत्वावगमात् । अविहितेन तूत्कृष्टजातीयकर्मणा[13] योगेन ज्ञानेन[14] च शूद्रादिरुत्कर्षं[15] नेतुं न शक्यते । नहि कार्ष्णायसं[16] भूयोप्यनलसन्तापनेन सुवर्णत्वमापादयितुं शक्यम्[17] । क्रिया हि द्रव्यं विलापयति[18] नाद्रव्यम् । वेदस्मृतिलिङ्गेभ्यः[19] किल ब्राह्मणस्यैव मुख्यया वृत्त्या मोक्षेधिकारोवगम्यते न क्षत्रियवैश्ययोः, योगाभ्यासाधिकारे सत्यपि[20] । तदुक्तम्—

बन्धमोक्षव्यवस्थित्यां प्रमाणं चोदना स्वतः ।
वेदस्यानतिशङ्क्यत्वादनपेक्षतया तथा ।।

---

१. ०धिदो । २. नात्मोयलंभ द्रति । ३. ०समावृन्त इति । ४. शूद्रदेरात्मादर्शनाभावं । ५. प्रतियादि० । ६. द्वेपा० । ७. श्रेष्ठाः । ८. ०वंतिहितसक्षमि० । ९. ०देव्यानां दि० । १०. तंत्प्रात्तिपर्भ० । ११. ०मविधायाभगमांयाः किल विधाया० । १२. ०नुष्ठितायाः । १३. ०स्वत्कृष्ट० । १४. योगज्ञानेन । १५. उत्कर्ष १६. कार्त्मायसं । १७. ०पादषितुं शक्य । १८ विनयति । १९. ०लिगेभ्यः । २०. सति ।

विधिर्नियुङ्क्तेधिकृतमुत्तमं[1] श्रेयसे सदा ।
अशास्त्रीयात्फलासङ्गात्स्वयं कामी हि बध्यते[1] ॥
अपुनर्जन्मसम्बन्धो यस्माच्छब्दैकगोचरः[2] ॥ इति ।

यत्तु राजर्षीणां जनकाश्वपतिप्रवाहणप्रभृतीनां महाभा(र)-तादौ मोक्षश्रवणं तत्कस्याञ्चिद् विशिष्टायामवस्थायां प्रवृत्तयागत्वेन यजमानानां तु मन्त्राप्तसम्बोधाविर्भावे[3] सति न सर्वदा । यागस्थानां हि तेषां ब्राह्मणत्वं श्रूयते । तथा च शतपथश्रुतिः—

स यां[4] काञ्चन यजते[5] ब्रह्मैव भूत्वा यजत इति ।

तद्वधे च स्मृतौ ब्रह्महत्याप्रायश्चित्तमाम्नातम्[6]—

यागस्थक्षत्रियं हन्ता चरेद् ब्रह्महणिव्रतम्[7] इति ।

एवं च क्षत्रियवैश्ययोरपि न तथा ब्राह्मणेन तुल्यतया मोक्षेधिकारः, तस्माद् द्विजातीनामेव[8] । योगाभ्यासेन तु प्रयतमानानामप्यनधिकृतानां शूद्रादीनां विद्यमाने हृदयपुण्डरीकेपि[9] (नाधिकारः) तिरश्चामिवेति । किञ्च, यथा सौर आलोको दिवाचराणामेव भूतानामाक्षं[10] जनयति, न तु रात्रिचराणां कौशिकादीनां तुल्येपि प्रकाशदातृत्वे तद्वत् ।

तदयं समुदायार्थः[11]—गर्भाधानादिसंस्कारसंस्कृतो यो यथाविध्युपनीतो[12] यथाशक्तिचीर्णवेदव्रतादिकोर्थावबोधपर्यन्तवेदाध्ययनसंस्कृतो गृहाद्वनं वनान्मौनमाश्रमाणां समुच्चयमङ्गीकृत्य विकल्पे वा ब्रह्मचर्याद्यथारुचि शान्तो[13]

---

१. विधिन्नियुंक्के''''मुत्तन्यश्रे''''वध्यने । २. यस्माछब्दैक० । ३. सुमाताप्त-संबोधा० । ४ या । ५. यजने । ६. तदूधे च स्मतो व्राह्महसाप्रापाश्चित्तमास्ना० । ७. क्षत्रविहुतां चरेद्ब्रह्महनिस्मृतव्रतम् । ८ ०धिकार्यः''''०तस्मद्विजा० । ९. शूद्रादिनां विद्यमानहृदयपुंडरीकेति० । १०. दिवाचराणामेव भूतानामाकोज० । ११. समुद्रापार्थः । १२. पथाविधि उप० । १३. विकल्पंधा ब्रह्मधर्याद्यथा० ।

दान्तः[1] श्रद्दधानः[2] सोपवर्गेधिकारभाक्, यतः सूत्रकारः स्वधर्माणां विध्यर्थत्वं न मन्यते[3]—

कर्मणां सहकारित्वं सहैवेति श्रुतेर्मतम् ।
नह्यनाश्रमिणो[4] वेदो योग्यत्वमिह मन्यते ।।
देवोपकारः कर्तव्यो[5] देवान् भावयतेति ह ।

अतः—

यावज्जीवं प्रकुर्वीत[6] स्वकर्माणि यथाविधि ।
संस्कुर्वीत स्वधर्मैश्च स्मृतितोवगतं[7] तथा ।।

महायज्ञैश्च यज्ञैश्च, अष्टावात्मगुणा[8] इति, चत्वारिंशत् संस्कारा[9] इति च ।

अपि(च) संयतानामेव[10] यज्ञादयश्च श्रूयन्ते[11] । तत्त्वप्रकरणे[12] किल—

विद्ययाश्रमिणो योगो नान्यस्येति श्रुतेर्मतम् ।।
कर्मणा तस्य विज्ञानं[13] तद्भावमुपनीयते[14] ।
पश्चादापन्नतद्भावो[15] देहमेतं विमुञ्चति[16] ।। इति ।

तथा चात्र वाजसनेयिनां यज्ञसूत्रकारः कात्यायनोधिकारविवेकमुक्तवान्[17] —- अथातोधिकारः (इति) । अथशब्द आनन्तर्यार्थः । अतःशब्दो[18] हेत्वर्थः । यतो वेदाध्ययनं पूर्ववृत्तमतस्तदर्थज्ञानावसरे प्रथममधिकारो निरूप्यते—कस्यात्राधिकार[19] इति । अधिकारशब्दस्यैव तावत्

---

१. दाशूः । २. श्रद्दधान० । ३. विधार्थत्वं न मन्यत । ४. नत्यनाश्रमिणो । ५, कर्तव्यों । ६. प्रक्रुर्वीत । ७. संरकर्वति स्वघर्मांश्च···०तोगतं । ८. अष्टौ चात्मगुणाः । ९. ०शश्च सरकारा इति । १०. इति चाप्यतु सपताम् । ११. श्रूयते । १२. तत्व० । १३. विज्ञामं । १४. ०तभ्दाव० । १५. ०तभ्दावो । १६. ०मेत विमुंच इति । १७. कात्यायतो । १८. शब्दे । १९. ०त्रधिका० ।

क्वोर्थः[1] ? अयमुच्यते—

अभ्युपगतागमप्रामाण्यानां पुरुषाणां शास्त्रेण यद्यस्य कर्तव्यतया विधीयते तत्र तस्यागमपारतन्त्र्येणानुष्ठानाङ्गीकरणम्[2] । तथा यच्छास्त्रेण[3] निषिध्यते—न कलञ्जं भक्षयेत्[4] इत्यादि, तत्र प्रतिषिध्यमानक्रियस्य मुख्यस्याधिकारिणो[5] जिघत्साप्रयुक्तरागनिबन्धनः कलञ्जभक्षणप्रवृत्तिनिषेधार्थः[6] शास्त्रपारतन्त्र्येणैव[7] । अकारणसंकल्प औदासीन्याश्रयणं[8] चाधिकारः । तदुक्तं भट्टेन[9] —

विधिना युज्यते यत्र न हन्यान्न पिबेदिति ।
तत्रौदासीन्यवस्त्वेव प्रतिपत्तावलम्बते ॥

औदासीन्यं प्रवृत्त्युपरमो[10] व्यापाराभावः स्वामित्वेन यो व्यापारस्याधिकारस्तस्याभाव[11] इत्युक्तः । तेनैतदुक्तं भवति—इदमग्निहोत्रादि कर्म मत्सम्बन्धितया[12] विहितमतो मम कर्तव्यम् । इदं च परहिंसादि तथैव निषिद्धमतो न कर्तव्यमिति ब्राह्मणादिरवगच्छति[13] । एष अधिकारशब्दार्थ[14] इति । तदुक्तम्—

यत्र यस्याधिकारोस्ति[15] नित्ये नैमित्तिके च सः ।
बध्यते नहि सर्वो हि[16] शास्त्रातिक्रमबन्धनैः ॥ इति ।

शास्त्रदृष्टचाधिकारो निरूप्यत इत्यत्र[17] नियोज्यत्वं तावदाह[18] ब्राह्मणराजन्यवैश्यानां[19] श्रुतिः[20] । तथा च—

---

१. कार्थः । २. पारतंत्र्येणानुष्ठानांगी० । ३. यछास्त्रेण । ४. भक्षयेत्यादि । ५. ०क्रियोर्मुखस्याधिकारणो । ६. ०भुक्षण····०धार्थं । ७. ०पारतंत्र्येण० । ८. संकल्पडौकादासीन्या० । ९. भद्देन । १०. प्रवृत्ति उप० । ११. व्यापारस्योधिकार० । १२. सत्संबंधितया । १३. ०रिवगछतीति । १४. राब्दोधि० । १५. ०अधिकरो० । १६. त वं नहि० । १७. कात्रदिश्याधिकारो निरुप्यत इत्यत्र । १८. नियोज्यास्तावदा० । १९. ०चैश्यानां । २०. श्रुतेः ।

वसन्ते[1] ब्राह्मणेनाध्येयो[2] ग्रीष्मे राजन्येन[3] शरदि वैश्येन इति श्रुतिः। किञ्च, अङ्गहीनाश्रोत्रियषण्डपतितशूद्रवर्जम्[4] इत्यङ्गहीनानामन्धमूकपङ्ग्वादीनामाज्यावेक्षणोपस्थानवाचनविष्णुक्रमणादिष्वसामर्थ्यात् कर्मणि नाधिकारः[5]। अश्रोत्रियस्य साङ्गवेदाध्ययनविज्ञानरहितस्य[6] यथावच्छास्त्रानवबोधे मन्त्राणां देवतादिसतत्त्वानवगमादनधिकारः[7]। उक्तं च--

वैधे कृतार्थकं[8] शास्त्रमवैधं नानुशास्ति[9] हि। इति।

षण्डस्य[10] क्लीबस्य पूर्वजन्मार्जितदुष्टकर्मसूचकत्वेन[11] दुष्कृतित्वादनधिकारो दायादिविभागप्रतिषेधात्तस्य[12] कर्मणां[13] च द्रव्यादिसाध्यत्वाद्विभवयुक्तस्य[14] पुत्रिण आधानादिसंयोगात्[15] क्लीबस्यापुत्रिणो नाधिकारः[16]। तथा चोक्तम्—

पतितव्याधिशूद्राणां[17] यावद्वचनमिष्यते[18]।
अधिकारो न सर्वस्मिन् नमुचेः षण्डकस्य[19] च॥ इति।

पतितो ब्रह्महादिः[20]। तस्यानधिकारो महापातकित्वात्।

शूद्रस्य चानधिकारः[21]। कुतः? अथातःशब्दाभ्यां वेदाध्ययनानन्तर्यद्योतकाभ्यां[22] यस्य वेदाध्ययनं तस्य कर्मण्यधिकार इति ज्ञापितत्वात्। कर्माधिकृतस्य च ज्ञानेधिकारो ज्ञानेन कर्मणः समुच्चयनात्। तथा चोक्तम्[23]—

---

१. वसंने। २. ०धेयो। ३. राज्ञेन्येन। ४. अंगहिनाः·····शंवपतित०। ५. अंगहिना०···मूकमंत्वादी०···वाच्यनविस्मुकमणादिषु सामर्य्यात् कर्मण्यंनाधिकारः। ६. ०त्रिषस्यासांगवेवृध्यप०। ७. मंत्राणान्दे०। ८. वैयं कृतार्थेकं। ९. ०वैधनानुशास्त्रि। १०. शंवस्य। ११. ०दुत कर्म०। १२. दयादि०। १३. कर्मणा। १४. ०दूभण्यस्य। १५ आदाना०। १६. गालीवस्यापुत्रिणो नधिकारः। १७. ०व्यान्यशू०। १८. ०वचनामि०। १९. पंडत्कस्य। २०. ब्रह्महादि। २१. चानाधिकारः। २. ०ध्ययनानंतर्यधोतकाभ्यां। २३. समुश्चयनात्। तथा चात्तम्।

नि:श्रेयसायाधिकृतान्[1] विद्या कर्म व्यबोधयत्[2] ।
... ... कर्मश्रुतिरेवानुशास्ति[3] तान् ।। इति ।

तस्माच्छूद्रो यज्ञेनवक्लृप्त इति[4] तस्य कर्मपर्युदासाद्[5] मूर्खत्वाच्च । मूर्खत्वं च तस्योपनयनवेदाध्ययनतदर्थाधिगमप्रतिषेधात्[6] । तथा च गौतमः—

शूद्रश्चतुर्थो वर्ण एकजातिर्न च संस्कारमर्हति । (इति)

तथा—

अथास्य[7] वेदमुपश्रृण्वतस्त्रपुजतुभ्यां[8] श्रोत्रप्रतिपूरणमुदाहरणे जिह्वोच्छेदो[9] धारणे हि शरीरभेद[10] इति ।

वशिष्ठोप्याह[11]—

पद्युर्वा एष श्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतव्यम्[12] इति ।

न चानधिकृतेन[13] कृतं कर्म शास्त्रप्रत्ययं फलं सम्पादयितुमर्हति, शास्त्रलक्षणत्वात् फलसम्बन्धस्योत्कर्षापकर्षयोश्च । उक्तं च—

अवैधत्वादनग्नित्वान्नाधिकारोस्ति[14] कर्मसु ।
श्रौतेष्ववैधताप्यस्य[15] वेदाध्ययनवर्जनात् ।।

यः स्वाध्यायमधीयीत कुर्यात् कर्म[16] स ए(व) तत् ।
अवैदुष्यादतः शूद्रः[17] कर्मणः[18] पर्युदस्यते ।।

---

१. निःश्रीयंसा० । २. विधा··व्यंवोधयत् । ३. कर्मश्रूति० । ४. तस्माछूद्रो यज्ञेनवक्लिप्त इति । ५. ०पर्यदासात् । ६. ०स्योयनयन०·····०तद्दर्थादिगम० । ७. आथास्य । ८. ०मुपशूण्वतरत्र पुजतु० । ९. जिह्वाल्लेदः । १०. शरोर० । ११. सिष्ठोप्याह । १२. यद्वद्वा ए······शानं य छूद्रा तस्माछूद्रसमीये नाछेतव्यम् । १३. चानधिकुतेन । १४. अवैघत्वा० । १५. त्रोतेघवैघता० । १६. यस्त्वाध्यायमधीत कूर्यात् । १७. अवैदुषादतः शूद्रो । १८. कर्मण्यः ।

किं सर्वेभ्यः ? न ।

स्मार्तं[1] च पितृयज्ञादिं शूद्रः कुर्याद्यथाश्रुतम्[2] ।
तद्विद्वत्तामवाप्यैव[3] कथञ्चिद् द्विजसंश्रयात् ॥
श्रौतादधिकृतानां तु[4] यावद्विहितसेवनात् ।
निषिद्धवर्जनाच्चापि पारम्पर्येण सद्गतिः[5] ॥
हीनाद्धीनाच्छुभं[6] जन्म पारम्पर्येण यद् भवेत्[7] ।
अनुग्रहः स एषोस्य[8] पुंसः श्रुतिकृतो[9] मतः ॥

तस्माच्छूद्रादीनां[10] कर्मण्यनधिकारादस्मिन् शास्त्रे एतत्प्रतिपादिते च योगाभ्यासे नास्त्यधिकार[11] इति ।

किञ्च —

आत्माभ्यासोपि नास्यास्ति[12] विप्रसेवेति हि स्मृतेः ।
तेषामेवानुकम्पेति द्विजातेरधिकारिता ॥
तेषामेवेतिशब्देन[13] ब्राह्मणस्य स्तुतिः कृता[14] ।
शूद्रयोनावहं जात इत्यादि बहु दृश्यते ॥

एवमादि बहुवाक्यजातं[15] भारते तत्र तत्र दृश्यते, ग्रन्थगौरवभयात्तु न लिख्यत[16] इति । उक्तं च—

अधिकार्येव शास्त्रार्थं[17] शक्तः साधयितुं यतः ।
तत्सिद्धावप्रभुत्वं हि ज्ञातात्रानधिकारिता ॥ इति[18] ।

---

१. स्मार्थं । २. कूर्याप्रथा० । ३. तद्वद्वत्ता० । ४. श्रौतानाधि० । ५. ०चपि पारस्पर्येण सदूतिः । ६. हीनाद्वीनाछुभं । ७. ०पार्यैंण पदवेत् । ८. अतुग्रहस्सस्स एषोस्य । ९. श्रूति० । १०. ०स्माछूद्रादीनाकर्मण्यनाधि० । ११. नास्सधिकारः । १२. नास्सस्ति । १३. ०कारितातोमीतिचापिशब्देन० । १४. स्तुतिकृता । १५. ०वाकजातं । १६. भयालुर्न लिख्यत । १७. शक्तः । १८. ०कारेतैति ।

इत्थं शूद्रादेर्मोक्षाभावाद् धर्मार्थकामलक्षणे[1] त्रिवर्गे च पुरुषार्थे सति हीनाधिकाराद् गीताशास्त्रादेस्तेनाध्ययनादि[2] न कर्तव्यम्। यस्माद्यो यत्रानधिकृतः स तदिष्टबुद्ध्यापि[3] (अनुतिष्ठन्) न केवलं तत्फलं न प्राप्नोति यावदपरेण प्रत्यवायेनापि युज्यते। यथा राजादिना यः कुत्रचिदप्यनियुक्तः पुरुषः स तदीयग्रामादौ स्वातन्त्र्येण[4] ग्रामव्यापारादि कुर्वंस्तस्माद्राजादेः[5] शरीरधनदण्डादिलक्षणं[6] प्रत्यवायं[7] प्राप्नोति, तथा शास्त्रेपि यो यत्रानधिकृतस्तदिष्टार्थमपि[8] कुर्वन् प्रत्यवैति। यथा च श्लैष्मिकहितमौषधं भक्षयन्नारोग्यार्थं पैत्तिको नैरुज्यं न लभते, प्रत्युत[9] रोगप्रकोपेण पीडयते, एवमिहापि बोद्धव्यम्[10]। उक्तं च—

पर्युदस्तो हि यो यस्माच्छास्त्रीयादपि कर्मणः।
स तत्रानधिकारी[11] स्याद्दानादौ दीक्षितो यथा[12]॥

एवं चाधिकृतेनानुष्ठितं[13] कर्म फलसाधकं न स्वबुद्ध्यैवानधिकृतेनेति[14] शास्त्रनियमः। एतच्च भगवानेव वक्ष्यति—

यः शास्त्रविधिमुत्सृज्य[15] वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां[16] गतिम्॥

---

१. ०क्षावाद्धर्मार्थकामा०। २. ०हानधिकाराद्गोतासास्त्रादे०। ३. ०स्सतदृष्टवुड्र्यापि। ४. पुरुषस्स तदीपग्रामोदखातंत्र्येण। ५. राज्ञादेः। ६. ०धनदंजादि०। ७. प्रत्यवायुं। ८. कृतस्तदृष्टार्थमपि। ९. श्लैष्मिकहितमौषधं यैतिकं औषधवुपि भक्षयन् प्रत्युत। १०. प्रकोपेन पीड्रयत यवमिहापि वोभ्दव्यम्। ११. तत्रानधिकारी। १२. ०द्वानादौक्षितो। १३. ०नुष्टितं। १४. ०साधकलस्ववुड्रौवा०। १५. मत्सृज्य। १६. परा०।

यतः—

प्रतिषेधमतिक्रम्य प्रत्यवेयात् कृतान्नरः[1] ।
तस्मात्तस्यानतिक्रान्तौ नित्यं[2] युक्ततरो भवेत् ॥ इति ।

यतः किल सर्वेण पुरुषेणाविहितानुष्ठानप्रतिषिद्धसेवननिमित्तजनितपापहेतुकविविधनरकरौरवासिपत्रवनक्रकचच्छेदनश्वश्रृगालादिक्रिमिकीटभक्षणवेदनापूयशोणितकर्दममज्जनादियाम्ययातनाशताद्यनर्थसङ्कटादिसंत्रासाच्छरणैषिणा[3] स्थावरकीटपतङ्गादियोनिसहस्रावर्तभ्रमणसद्योमरणजराव्याधिक्षुत्पिपासाबन्धनाङ्गच्छेदादिदुःखभयोच्छेदकारि[4] शास्त्रीयं कर्मानुष्ठीयते[5] । तत्पुनरुत्कृष्टं कर्म निषिद्धत्वाद्विरुद्धं[6] सद्गतानुगतिकत्वेनादृष्टबुद्ध्यानुष्ठीयमानमप्यविहितत्वेनाशास्त्रीयत्वान्न[7] केवलं निष्फलं भवति, यावत् प्रत्युतानधिकृतत्वेन[8] प्रत्यवायकरत्वात् परलोके[9] बहुविधनरकपाताद्युपद्रववृन्दोत्पादकमिति[10] ज्ञात्वा शूद्रादिना नैवात्र नित्यमात्मा[11] क्षपणीयः । तथा चेहैव[12] वक्ष्यति—

वरं स्वधर्मो विगुणः[13] परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः[14] ॥

वरं श्रेयान् । दर्शयति च मनुरपि—

परधर्मेण जीवन् हि सद्यः पतति जातितः ।

---

१. प्रत्यवेयाल्लुरान्नरः । २. वित्यं । ३. विहितनुष्टानप्रतिषेध''''हेतुक''''रौरवासियत्र''''चछेरनश्वसृगालादिक्रिमि '''' शोणितकर्मममजनादि''''शताधनर्थसंकटामीवसंत्रास० । ४. ०स्थावरस्कीट'''भ्रमणाघद्वो''''क्ष्त्वात्पिपासावंधनांगछेदविदुःखभय० । ५. कर्मानुष्टोषते । ६. ०पुनरुत्कष्टकर्म निसिद्धत्वाद्० । ७. सद्दतानुगतिकत्वेनादृष्टवुभ्द्यानुष्टीयमानमप्यविहितत्वं नाशास्त्रीयत्वान्न० । ८. प्रत्युतानुधिकृत्वेन । ९. ०करत्वान्पर० । १०. ०पातद्धुपद्रव० । ११. नेवात्रनित्तमात्सा । १२. तथार्चैहैव । १३. वरं श्रेषान स्वधर्मो । १४. भयावद्धादर्याति ।

शूद्रजातितोपि भ्रष्टस्तिर्यगादिजातिं प्राप्नोतीति वाक्यार्थः[1]।

वेदे मन्त्रेषु गृह्येषु[2] श्रुतिस्मृतिनिषेधतः ।
नाधिकारोस्ति शूद्रस्य पुराणादिषु[3] भारत ॥
ब्राह्मणं तु पुरस्कृत्य[4] शृण्वतः फलमीरितम् ।
स्त्रियो वैश्यास्तथा शूद्राः शुद्धाः सुखमवाप्नुयुः[5] ॥इति ।

यतः—

तिर्यग्भ्यः[6] पुरुषाः श्रेष्ठाः[7] कार्याकार्यविवेकतः[8] ।
तन्त्राधिकारात्तेभ्योपि[9] द्विजा वेदाधिकारतः ॥
अधिका(रा)त् प्रवचने तेभ्यः श्रेष्ठा द्विजोत्तमाः ।
श्रुत्या स्मृत्याधिकारार्थं श्रैष्ठ्यमेषां प्रकाशते[10] ॥इति।

तथा च मनुः—

ब्राह्मणो जायमानो हि पृथिव्यामधिजायते ।
ईश्वरः[11] सर्वभूतानां धर्मको(श)स्य गुप्तये ॥

तदेवमुक्तसम्बन्धाभिधेयप्रयोजनं[12] प्रतिपादिताधिकारिविशेषमेतच्छास्त्रं व्याख्यातुं[13] श्रोतुं च[14] योग्यमिति । अतोस्य व्याख्यानमारभ्यते[15] ।

अनेकैश्च व्याख्यातृभिः स्वपक्षनिक्षिप्तदृष्टिभिरितस्ततः[16] कृष्यमाणमनवस्थामापाद्यमानं गीताशास्त्रमपवर्गप्राप्त्युपदेशमहाप्रयोजनम्[17] । (अतः) भगवतोभिप्रेते सन्मार्गे स्थापयितुमयं यत्नः क्रियते[18] ।

---

१. शूद्रता तितो····जानिं प्राप्नोतीति तद्दर्थं वाक्यार्थः । २. गृहे च । ३ पुरणादिषु । ४. पुरस्कृत्य । ५. शूद्रस्सुखमवाप्नुयात् । ६. षतस्ति० । ७. श्रेष्टाः । ८. कार्याकर्य० । ९. तत्राधि० । १०. श्रेष्ठ्यमेष्य पृत्काशते । ११. इश्वरः । १२. तदेवसुक्त० । १३. विशेषयं शास्त्रं व्याख्यातं । १४. श्रोतु च । १५. योग्यमित्येतोस्य व्याख्याख्यान० । १६. ०रितस्तनः । १७. ०मांनं····प्राप्नुपदेशान्० । १८. यत्वात्क्रियते ।

नन्वितिहासपुराणानां पौरुषेयत्वादपवर्गप्राप्तिलक्षणेतीन्द्रियार्थे[1] न स्वतः प्रामाण्यं सम्भवति। सत्यमेतत्। किन्तु मन्त्रार्थवादास्तेषां[2] मूलमिति न्यायविद्भिः स्थापितम्[3]। अतस्तेत्र[4] मूलं स्युः।

धर्माणां[5] विप्रकीर्णानां वेदज्ञातृप्रयत्नतः।
कृतं संहरणं[6] साक्षाद् धर्मावगतिहेतुकम्॥
वैदिकानां (हि) शब्दानां प्रस्थानात्तु विलक्षणम्।
स्मृतीनां रचनेयं[7] हि पुंप्रणीता विलक्षणा[8]॥

भगवद्व्यासादिस्मरणं[9] च स्वतः प्रमाणमेव। ते हि साक्षात्कृतधर्मत्वात् करतलगतामलकवत् सकलं वेदार्थं प्रत्यक्षेणैव पश्यन्ति[10]। तदुक्तम्—साक्षात्कृतधर्माण ऋषयो बभूवुरिति। नह्यस्मदादिवद् व्यासादयोतीन्द्रियमर्थं न पश्यन्तीति वक्तुं श(क्यम्[11])। विधूत(क)ल्मषत्वादीश्वरानुग्रहाद्वेदार्थस्य[12] वोपनिबन्धनाच्च संभवत्येवातीन्द्रियार्थदर्शनं[13] तेषामित्यदोषः।

इत्थं स्थितेर्जुनस्य ज्ञानकर्मोपदेशप्रसङ्गमवतारयितुं प्रस्तुतकथासमाप्तौ कार्यान्तरं जिज्ञासुर्धृतराष्ट्रः[14] पुनः सञ्जयं पृच्छंस्तावदाह[15]—

धर्मक्षेत्रे कुरुक्षेत्रे सर्वक्षत्रसमागमे।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥ १॥

हे सञ्जय! कुरुक्षेत्राख्ये देशे धर्मप्रसवहेतुत्वाद्धर्मस्य

---

१. पौरुषेयद्वाद''''लक्षणेंतीद्रियर्थे। २. ०वादस्ते०। ३. न्यायविम्दिसथापितम्। ४. तत्र। ५. धमाणां। ६. वेदादातृत्यपत्नतः''''हण। ७. विलक्षणार्थं स्मृतीनां रचनीयं। ८. विलक्षणात्। ९. वासदिस्मणं। १०. पश्यति। ११. ०वद्यासादयोतीद्रियमर्थं''''नश। १२. ०दिश्वरानुग्रहाद्। १३. वोपनीवंधनाश्च संभवेत्येवातिद्रियार्थ०। १४. समाप्तो''''जितासुधृंत०। १५. सययंपृस्तावदादावहे।

क्षेत्रे स्थाने सर्वक्षत्रसमागमे सन्निधाने सति मत्सम्बन्धिन-स्तनयाः पाण्डुपुत्राश्च किमकुर्वत किमनुष्ठितवन्त इति । पूर्वं[1] राजर्षिणा तपस्यता तत्र धर्मः किलोप्त इति कुरुक्षेत्रस्य धर्मक्षेत्रत्वम्[2] । अत्र कुरुतातो धर्म[3] क्षिप्रं त्राणो भविष्यति इति कुरुक्षेत्रस्य कुरुक्षेत्रत्वमित्याहुः पौराणिकाः ॥ १ ॥

एवं पृष्टः सञ्जय[4] उवाच—

दृष्ट्वा तु पाण्डवानीकं व्यूढं[5] दुर्योधनस्तदा ।
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २ ॥

पाण्डवसैन्यं व्यूढं शास्त्रदृष्टया कृतविन्यासविशेषं[6] दृष्ट्वैव[7] तस्मिन् काले दुर्योधनो द्रोणमुपसंगम्य गौरवात्तत्समीपं[8] प्राप्य वक्ष्यमाणं[9] विशिष्टपदक्रियापरिकल्पितरूपं[10] वाक्य-मुक्तवान् ॥ २ ॥

तदाह—

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं[11] चमूम् ।
व्यूढां[12] द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥

हे आचार्य ! पाण्डुपुत्रसंबन्धिनीं[13] चमूं सेनां महतीं[14] सेना-मङ्गबाहुल्याद्विस्तीर्णां[15] धृष्टद्युम्नेन व्यूहविधानकुशलेन[16] च व्यूढां कृतरचनाविशेषां(पश्य)। यो हि भवच्छिष्यो बुद्धिमांश्च सोवश्य[17]-

---

१. पूर्व । २. कुरुक्षत्रस्य धर्मक्षत्रत्वम् । ३. अतश्च कुरुतात्र धर्म । ४. पृष्टंस्संजय० । ५. व्युडं । ६. ०सैन्ये व्युवं शास्त्रदक्षमाकृत० । ७. दृष्टैव । ८. गौरवात्नत्समीप । ९. वक्ष्यमाण । १०. ०रुपं । ११. पांडत्राणाम्''''''महती । १२. व्यूढान् । १३. ०संबंधिनी । १४. महंती । १५. ब्यहुल्या हि स्तीर्णां । १६. व्यूह० । १७. पदपयो हि भवष्यो बुद्धिमांश्च सोवस्य-माम्रतिमां व्यूहरवनां करोत्यतः ।

मप्रतिमां व्यूहरचनां करोति । अतः प्रतिविधानपरो[1] भवेत्याशयः ॥ ३ ॥

किञ्च—

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः[2] ॥ ४ ॥

अत्र अस्यां सेनायाममी[3] शूरा भयविषादानभिज्ञाः[4] । तथा महेष्वासाः[5] । इषवः शरा अस्यन्ते क्षिप्यन्ते[6] यैस्ते इष्वासाः कोदण्डाः[7], महान्तो बृहन्तः सुदृढाः परैरभेद्या इष्वासा धनूंषि येषां ते महेष्वासाः । अथवा युद्ध इषूनस्यन्तीतीष्वासा धानुष्काः (युद्ध)कर्मपराः[8] । त एव च दिव्याः प्रभावत्त्वाद्धनुर्वेदकृताभियोगत्वादनेकसंग्रामलब्धविजयत्वाच्च[9] । महान्त उत्तमाः प्रशस्ताः। तथा युधि युद्धे भीमार्जुनाभ्यां योद्धृत्वेन[10] समास्तुल्याः। के त इत्याह–युयुधानः सात्यकिः, विराटो[11] द्रुपदश्च महारथः । महान् प्रेरणावरणयुद्धापसारणावकाशादिधर्मयोगात्[12] प्रशस्तो रथो यस्यासौ महारथः ॥ ४ ॥

किञ्च—

धृष्टकेतुश्चेकितानः[13] काशिराजश्च वीर्यवान् ।
पुरुजित् कुन्तिभोजश्च[14] शैब्यश्च नरपुङ्गवः ॥ ५ ॥

---

१. ०विचान० । २. महारथः । ३. सेनायासमी० । ४. मयविषाद० । ५. महेषासाः। ६. अस्यंते क्षिप्यंते । ७. षैस्ते द्रघासाः कोदंडाः। ८. महांतो बृहंतः सुदवाः परैरमेधा० धनुषि····ते तथा युद्धाद्रष्टूनस्यंतीतीष्वासा धानुकाः कर्मरपरा । ९. प्रभावत्वा····देकसं० । १०. योद्धत्वेन। ११. युयुधानस्तात्यकिर्विराटो० । १२. महान्प्ररणावरणा युद्धापसारावकाशादिधर्मयोगात् । १३. चेकितान् । १४. कुंतिभोजैश्च ।

इह संज्ञामात्रप्रधाना अमी शब्दा निगदव्याख्य[1]। (ताः) अतो न व्याख्यायोग्याः। येषां त्वर्थानुगमे कश्चिद् विशेष उपलभ्यते ते लेशतो व्याख्यायन्ते[2]। काशीनां राजा (वीर्यवान्) उत्साहशक्त्युपेतः[3]। पुरु बहु जयतीति पुरुजित्। कुन्तयो जनपदाः, तेषां वासी[4] (कुन्तिभोजः)। शिवयो जनपदास्तेषां राजा[5] (शैव्यः)। स च शौर्याद्युत्तमगुणयोगान्नरपुङ्गवः पुरुषश्रेष्ठः[6] ॥ ५ ॥

तथा—

युधामन्युश्च[7] विक्रान्त उत्तमौजाश्च वीर्यवान्।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥

विक्रान्तो वीर्यवान् सुभद्रासूनुरभिमन्युः[8] ॥ ६ ॥[9]

एवं पाण्डवानीके प्रधाननायकनिर्देशं[10] कृत्वा स्वानीके प्रधाननायकान् दर्शयन्नाह[11]—

अस्माकं तु[12] विशिष्टा ये तान्निबोध[13] द्विजोत्तम।
नायकान् मम सैन्यस्य[14] संज्ञार्थं तान् ब्रवीमि ते[15] ॥ ७ ॥

अस्माकं ये विशिष्टाः कुलशौर्यादिभिः[16] प्रधानास्तान् संज्ञार्थं ब्रवीमि[17]। संज्ञानं संज्ञा। तु-शब्दः[18] पूर्वेभ्यो विशेषावद्योतनः[19]। युयुधानादयो वराका युष्माकं पुरतोकिञ्चित्करा[20] इत्यर्थः ॥ ७ ॥[21]

---

१. शब्दा''''व्यख्य। २. एषां त्वार्थानुनमः कश्चिदुलभ्यते''''व्याख्यायते। ३. उत्साहशत्सुपेतः। ४. जनपदस्तमाजस् वामी। ५. जनपदैस्तस्य राजा। ६. सौर्यादु''''योगान्नपुगव पुरुषश्रेष्ठः। ७. वुधान्युश्च। ८. ०सूनुभिमन्युः। ९. अङ्कोयम् दर्शयन्नाह अस्मात्परः विद्यते। १०. ०निदेशं। ११. स्वाखानेके प्रधानान्दर्शयन्नाह। १२. लु। १३. निवोध। १४. मन् दौन्यस्य। १५ संज्ञार्थं तान्। १६. ०चौर्यादिभिः। १७. ब्रविमि। १८. संज्ञा न संज्ञा तु शब्दः। १९. विशेषावष्वोतना। २०. किंतित्करा इत्यर्थः। २१. अङ्कोयम् परिगणयन्नाह अस्मात्परोस्ति।

तांश्च परिगणयन्नाह—

भवान्[1] भीष्मश्च कर्णश्च[2] कृपः शल्यो जयद्रथः[3] ।
अश्वत्थामा[4] विकर्णश्च सौमदत्तिश्च[5] वीर्यवान् ॥ ८ ॥

न केवलमेते यावत्—

अन्येपि बहवः शूरा मदर्थे त्यक्तजीविताः[6] ।
नानाशस्त्रप्रहरणा नानायुद्धविशारदाः[7] ॥ ९ ॥

नानाप्रकाराणि चक्रासिमुशलगदाप्रभृतीनि (शस्त्राणि) प्रह(र)णानि येषां ते तथा । नानाविधगजरथाश्वादियुद्धक्रियासु पण्डिता मत्कार्ये च त्यक्तजीविताः सन्त्येवान्ये ॥ ९[8] ॥

एवमुभयसैन्यनायकनिर्देशं कृत्वा सारासारतां निरूपयन्नाह—

अपर्याप्तं तदस्माकं बलं[9] भीमाभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीष्माभिरक्षितम् ॥ १० ॥

अस्माकं यथानिर्दिष्टसंहतानां[10] तत्पाण्डवबलम् अपर्याप्तम् असमर्थमभिभवितुम्, यतो भीमाभिरक्षितं भीमसेनेन प्रधानभूतेन गुप्तम् । स च (भीमो) भीष्मापेक्षया किञ्चिन्न्यूनतर इत्यभिप्रायः[11] । इदं त्वस्माकं बलमेतेषां पाण्डवानां पर्याप्तम् अभिभवाय विनाशने समर्थमित्यर्थः[12], यतो भीष्माभिरक्षितम्[13] । भीष्मस्त्वनेकशस्त्रास्त्रपारगो निर्जितानेकमहासमर इत्याशयः[14] ॥ १०[15] ॥

१, भवान् । २. कर्णश्च । ३. जयद्रथः । ४. अश्वस्थामा । ५. सौमदत्तिश्च । ६. शूरादर्थे त्यक्ता जीविताः । ७ विशारंदाः । ८. अङ्कोयम् निरूपयन्नाह अस्मात् परोस्ति । ९. वलं । १०. ०सहितानां । ११. किंचिन्त्यूनतर इति आभिप्रायः । १२. पांडवामां पर्यासमाभिभवाय विनाशने सर्मर्थमित्यर्थः । १३. ०रक्षितं । १४. भीष्मोस्वनेकशास्त्रास्त्रपारगोनेकनिर्जितमहासमर इत्याशयः । १५. अङ्कोयम् आह अस्मात् परोस्ति ।

प्रधाननिर्देशप्रयोजनमाह—

अयनेषु तु सर्वेषु यथाभागमवस्थिता(ः) ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ ११ ॥

हि यस्मादेवंभूतेन भीष्मेणाभिरक्षितमस्माकं बलं पाण्डवानां पराभवे पर्याप्तम् । ततः अयनेषु सर्वेषु रथमार्गरथ्यासु सर्वासु यथाभागम् । यो यो भागो यथाभागम् । यो यस्यात्मीयो भागोंशः (स तेन) रक्ष्यः[1] । तत्र अवस्थिताः सन्तो भवन्तो भीष्ममेवा[2]-भिरक्षन्त्विति । तस्मिन्नायके[3] सर्वतो गुप्ते बलं परबलप्रणाशने[4] क्षमं भवतीत्याशयः । यद्यस्मिन्निति[5] (?) अयनं कक्ष्यादि ॥११॥

इदानीं[6] कार्यान्तरमुपक्षिपति सञ्जयः[7]—

तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं[8] दध्मौ प्रतापवान् ॥ १२ ॥

तस्य प्रक्रान्तस्य बलस्य दुर्योधनस्य वा[9] हर्षमुत्पादयन् भीष्मः कुरूणां तत्कालजानां पूर्ववयाः सिंहनादमुच्चैर्विनद्य[10] ततः शङ्खं दध्मौ । सिंहस्य इव नादः सिंहनादः तं विनद्य । सामान्य-नदेर्विशेषनदिः[11] कर्म । सिंहनादं कृत्वेत्यर्थः ॥ १२ ॥

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः[12] ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोभवत् ॥ १३ ॥

अनन्तरं शङ्खादयः सहसैवाविचारितनियन्त्रणमेव अभ्यह-न्यन्त[13] ताडिताः । स च वादित्रसंघातजः शब्दस्तुमुलो महान-

---

१. यस्यात्मीयोंसो भागो रक्ष्यः । २. भोष्ममे० । ३. त्तस्मिन्नायके । ४. ०प्रदर्शने । ५. यत्यस्मिम्निति । ६. इदांनी । ७. कार्यातरमुपांक्षिपति संययः । ८. विनद्योश्चैः शंखान् । ९. चलस्य दुर्योधनस्या वा । १०. कुरुणां''''सिंहनादसुश्चौर्वितघं । ११. समान्य० । १२. पणावानक० । १३. शंखायाः सहसैवाधिचारितं-निर्यत्रणमेवाभ्यहन्यत ।

विभाव्यमानावयवविवेकः श्रोतृहृदयदारणोभवत्[1]। भेर्यः कात्वाः (?) आनकस्तमिस्वा (?) गोमुखः अनलम्बकः[2] (?) ॥ १३ ॥

ततः श्वेतैर्हयैर्युक्ते[3] महति स्यन्दने स्थितौ।
माधवः पाण्डवश्चैव[4] दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४ ॥

माधवपाण्डवौ दिव्यैकरथारूढावचिन्त्यप्रभावौ शङ्खा-वत्यर्थं[5] ध्मातवन्तौ ॥ १४ ॥

अथ प्रधानशङ्खनामनिर्देशमाह[6]—

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः[7] ॥ १५ ॥
अनन्तविजयं राजा कुन्तीपुत्रो[8] युधिष्ठिरः।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥

पौण्ड्रं (पुण्ड्र)देशजं विपुलं वृकोदरो दीप्ताग्न्युदरो[9] भीमकर्मा बकहिडिम्बादिराक्षसविदारणादीनि भीषणानि कर्माणि यस्य (सः)। कुन्तीपुत्रग्रहणं प्रशंसार्थम्। पितुरसंविज्ञाने मात्रा व्यपदेशो यद्यपि कुत्सा[10] राधासुतस्येव तस्य पुनः संविज्ञाने प्रशंसैव[11] धर्मपुत्रत्वाद् युधिष्ठिरस्य[12] ॥ १६ ॥

किञ्च तथा—

काश्यश्च परमेष्वासः शिखण्डी च महारथः।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥

---

१. महानविभाव्यमामावयवविवेकः श्रोत्रतृदयदारुणोभवत्। २. गोमुखोनलवंकः। ३. श्वेतैह०। ४. पांडवाश्चैव। ५. दिय्यैकरथारुटावचिंत्यप्रभावौ शंख्यौ०। ६. ०नामुनिर्देश०। ७. कर्मावृकोदरः। ८. कुतीपुतो। ९. दीप्ताग्यदरः। १०. यत्युकुत्सा। ११. सविज्ञाने प्रशंसेव। १२. धर्मपुत्रात्वाद्यधिष्ठिरस्य।

पाञ्चालश्च[1] महेष्वासो द्रौपदेयाश्च पञ्च ये ।
सौभद्रश्च महाबाहुः शङ्खान् दध्मुः पृथक्[2] (पृथक्) ॥१८॥

सात्यकिश्चापराजितो युद्धेष्विति विज्ञेयम् ॥ १८ ॥

किञ्च—

स घोषो धार्तराष्ट्राणां[3] हृदयानि व्यदारयत्[4] ।
नभश्च पृथिवीं[5] चैव तुमुलो व्यनुनादयत् ॥ १९ ॥

यथोक्तशङ्खघोषस्तुमुलो[6] दुर्योधनादीनां हृदयान्यभिनद्[7] भिन्नवान् । यतो नभश्च पृथिवीं चैव[8] सकलमिव व्यनुनादयत् प्रतिशब्दयुक्तमकारयत्, व्यनुनदनं प्रयुक्तवान् । व्यनुनादयदित्यत्र व्यत्ययेनाडभावः[9] । इहस्थनामपदानां[10] निर्वचनं ग्रन्थगौरवभयान्न[11] कृतम् । येषां च शब्दानामिह लक्षणानुगमो न दृश्यते तेषां विरोधो नोद्भावनीयः । यतः परमर्षिणा द्वैपायनेनैवोक्तम्—अलङ्कृतं शुभैः शब्दैः इति । अतस्तदागमादेवावगते शुभशब्दत्वे[12] व्याकरणानां बहुत्वे च कथं पाणिनीयेन केवलेन विरोध उद्भावयितुं युक्तः[13] । इतिहासादीनां वैदिकार्थप्रतिपादनाच्छन्दस्तुल्यत्वम्[14] । तथा चानेनैवोक्तम्[15]—इदं हि वेदसम्मितम्[16] पवित्रमिदमुत्तमम् इति, कार्ष्णवेदमिदं पुण्यमिति[17] । तथा अन्यत्रापि चोक्तम्—

---

१. याचाल्यश्च । २. पृथक । ३. घातराष्ट्राणां । ४. व्यदारयन् । ५. पृथिवी । ६. क्षयथोक्त० । ७. हृदयान्यभिनभ्दिन्न । ८. पृथिवी चैव । ९. व्यनुनदनः प्रयुक्तवानिवेति व्यत्ययेनानुभावः । १०. इहधनाम० । ११. ग्रथ० । १२. त्रुभैः शब्दैरितिस्तदागमादेवावगते त्रुभशवृत्वे । १३. विरोधरुद्भावयितु युक्त । १४. इतिहासादानां वेदिकार्थ० । १५. चानेनेवोक्तम् । १६. वेदेसामितं । १७. काक्ष्र्मवेदमि० ।

वेदाभेदं भारतस्यावलोक्य
व्यासो वाक्यैरश्विनोः स्तोत्रमादौ ।
सम्यक्कृत्वा वैदिकैर्लक्षणोक्तीर्[1]
भूयो भूयस्ताः करिष्यत्यत्र शेषाः[2] ॥ १९ ॥

अन्यदपि कार्यान्तरमुपक्षिपन्नाह—

अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः ।
प्रवृत्ते[3] शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ॥ २० ॥
हृषीकेशं तदा वाक्यमिदमाह महीपते[4] ।

अथ शङ्खघोषादनन्तरमर्जुनो दुर्योधनादीन्[5] (व्यवस्थितान्) विविधेनाकारेण[6] यथाविभवमवस्थितान् दृष्ट्वा शस्त्राणां सम्पाते प्रवृत्ते धनुरुत्क्षिप्य सावधानो हृषीकेशमिदं वक्ष्यमाणं वाक्यमाह । हृषीक(म्) इतीन्द्रियग्रामाख्या तदीशं[7] हृषीकेशमिति । हे महीपते इति धृतराष्ट्रोद्बोधनं सञ्जयेन[8] ॥२०॥

किं तद् वाक्यमित्याह —

उभयोः सेनयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१ ॥
यावदेतान्निरीक्षेऽहं[10] योद्धुकामानवस्थितान्[11] ।
कैर्मया[12] सह योद्धव्यमस्मिन् रणसमुद्यमे[13] ॥ २२ ॥

मध्ये रथस्थापनाद् युयुत्सासंशयोऽनुमीयते[14] पार्थस्य । तं च प्रकटयिष्यति । किमर्थं (सेनयोर्मध्ये) रथस्थापनमिति चेदत आह—यावदि(ति) । यावदित्यनेन कार्यशेषं सूचयति[15]

---

१. ०कलक्षणोक्तीर० । २. ०ष्यत्रशेषः । ३. वृवृत्ते । ४. हपीकेशं —पहीपते । ५. शंखघोषादं नरमर्जुनो । दुर्योधनादिन् । ६. विविधनेकाकांर । ७. तदीसं । ८. धृतराष्ट्रूद्धनं सजयेन ॥ ९. ॥२०॥ इति नास्ति । १०. निरोक्षे । ११. योद्धकप्नान० । १२. कैप्नया । १३. अस्मिन्नणसप्नुद्यमे । १४. युथुत्सात्सं० । १५. सुचयति ।

रणसमुद्यमे युद्धोद्योगे[1] कैः सह मया योद्धव्यमिति[2] योद्धु-कामानवस्थितान्[3] दृष्ट्वा ततो यथाभिप्रेतमाचरिष्यामी-त्याशयः[4] ॥ २२ ॥

सञ्जय उवाच—

एवमुक्तो हृषीकेशो[5] गुडाकेशेन भारत ।
उभयोः सेनयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २३ ॥
भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्[6] ।
उवाच पार्थ पश्यैतान्[7] समवेतान् कुरूनिति[8] ॥ २४ ॥

गुडाका निद्रा तदीशेन जितनिद्रेणार्जुनेनैवमुक्तो[9] भगवान् उभयोः सेनयोर्मध्ये रथं स्थापयित्वोवाच । कथं स्थापयित्वेत्याह- भीष्मद्रोणप्रमुखतः[10] तयोः सम्मुखम् । आद्यादित्वात् (सार्व-विभक्तिकः) तसिः[11] । सर्वेषां च[12] राज्ञां सम्मुखम् । किमुवा-चेत्याह–हे पार्थ । पश्यैतान् एकत्र समवायं गतान् कुरूनिति[13] । भीष्मद्रोणाभिमुखे[14] रथस्थापनाभिप्रायं भगवान् आह—यत्[15] पितामहगुरून्[16] प्रति कदाचिदस्यायुयुत्सा स्यात्तदेनं ज्ञानो-पदेशेन[17] प्रवर्तयिष्यामीति[18] ॥ २४ ॥

तत्रापश्यत् स्थितान् पार्थः पितॄनथ[19] पितामहान् ।
आचार्यान् मातुलान् भ्रातॄन्[20] पुत्रान् पौत्रान् सखींस्तथा[21] ॥२५॥
श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि[22] ॥२६॥

---

१. पुध्वोद्योगे । २. योद्धव्यामिति । ३. योद्धकामान् । ४. यथाहिप्रेतम० । ५. नृषीकेशो । ६. ०मदिक्षिताम् । ७. पश्यैवान् । ८. ०नकुरुनिति । ९. जित-निद्रेना० । १०. प्रप्नुखतस्० । ११. इत्याधोदित्वा तुसिः । १२. चा । १३. कुरुनि० । १४. ०भिमुखरथ० । १५. भगवत् आहुर्यत् । १६. ०गुरुन् । १७. कदाचिदस्थायुत्सा स्यात्तरानं ज्ञानोपदेशेन । १८. प्रवर्तयिष्यामिति । १९. त्तत्रापश्यान्स्थितान् पार्थः पितॄनथ । २०. भ्रात्तून् । २१. सखंस्तथा । २२. ०सुहृदश्चैव सेनयौरु० ।

तत्र उभयोः सेनयोर्मध्ये पार्थः पित्रादीनपश्यत् । पितॄन् पाण्डुधृतराष्ट्रभ्रातॄन्[1] केनापि वान्येन[2] (सम्बन्धेन) तत्स्थानीयान् पितामहान् भीष्मबाह्लीकसोमदत्तप्रभृतींस्तत्स्थानीयान्[3] वा मातुलान् शल्यशकुन्यादींश्च[4] तथैवोभयोः सेनयोरन्यान् स्वजनान् भ्रातॄन् तत्तुल्यान् सुतान् पौत्रान् (अपश्यत्)[5] ।। २६ ।।

तान् समीक्ष्य स कौन्तेयः सर्वान् बन्धूनवस्थितान् ।
कृपया परयाविष्टः[6] सीदमानोऽब्रवीदिदम् ॥२७॥

तान् सर्वान् बन्धूनिति[7] समीक्ष्य न कश्चिदत्र परः सर्व एव स्वजना इत्येवं विचार्य कथमेते मारयितुं युक्ता इति प्रकृष्टया करुणया वशीकृतः। तत एव सीदमानः अवसादं गच्छन् युद्धोद्यमं[8] जहदिदमब्रवीदिति । व्यत्ययेनात्रात्मनेपदम्[9] ।। २७ ।।

किं तदित्याह--

दृष्ट्वेमान् स्वजनान् कृष्ण युयुत्सून्[10] समवस्थितान् ।
सीदन्ति मम गात्राणि[11] मुखं च परिशुष्यति ॥२८॥
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ।
स्रंसते गाण्डिवं[12] हस्तात्त्वक् चैव[13] परिदह्यते ॥२९॥
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ।

हे कृष्ण ! इमान्[14] स्वान् जनान्[15] युयुत्सून्[16] समवायेनावस्थितान् दृष्ट्वा मे अङ्गानि योद्धुं नेच्छन्ति[17] । वेपथुः कम्पो

---

१. पित्रून् पांदुधृतराष्ट्रभ्रात्रून् । २. वातन्येन । ३. वाहिक`` तत्स्थानीमान्वा । ४. शकुत्यांदीश्चा । ५. सेनयोरम्यतुल्यस्वाजन्यातुतः ।। २६ ।। ६. परयाष्टिष्टः। ७. तात्सर्वान् वंधूनीति । ८. गछत्युद्धाद्यमं। ९. च्यत्ययेन। १०. कृक्ष्मयुयुत्सुन् । ११. गात्रारणि। १२. गांडिव । १३. त्वत्कैव। १४. कृनेमान्। १५. स्वाजनान्। १६. युयुतृन्। १७. याद्धं नोद्यच्छंति।

रोमहर्षश्च ऊद्‌र्ध्वरोमता[1] (गाण्डीवं)। स्रंसतेधःपतति। त्वक् शारीरं चर्म[2] शोकाग्निना दह्यते[3]। मुमूर्षून् दृष्ट्वा[4] कृपया तथाभूतः सन् इति[5]। अत्र च भिन्नकर्तृकता[6] पूर्वोक्तन्यायान्न[7] चोदनीया। यद्वा दर्शनक्रियाया अर्जुनः कर्ता गात्रादिसादनादौ च वास्तवेन धर्मेणार्जुन एव। नह्यर्जुनव्यतिरेकेणान्यद् गात्राद्यस्ति[8]। इवशब्दस्तूपमार्थो[9] भेदबुद्धिं जनयतीति। अपि च कृपावशात् प्रयत्नशैथिल्ये सत्यवष्टम्भं[10] धारयितुं न शक्नोमि। दुःख-प्रकर्षाच्च चक्रारूढमिव[11] मे मनो भ्रमत्यनवस्थितत्वाद् भ्रमतीवेत्युक्तम्[12] ॥ २९ ॥

किञ्च—

निमित्तानि[13] च पश्यामि विपरीतानि केशव।
न च श्रेयोनुपश्यामि हत्वा स्वजनमाहवे ॥३०॥

निमित्तानि यानि जयसूचकानि उत्साहादीनीष्यन्ते[14]। तानि विपरीतानि[15] अननुकूलानि पश्यामि। यद्वा गात्रावसादादीनि निमित्तानि पश्यामि। न चाहवे बन्धुवर्गं[16] हत्वोपकारम् अनुपश्यामि ॥ ३० ॥

तत्रैतत्स्यात् यद्युद्ध्यतां पाण्डवानां विजये सति राज्यादि-लाभलक्षणस्य श्रेयसः सम्भावनास्तीति तदाह[17]—

---

१. रोमहर्ष कुर्ध्वंरोमता। २ ०त्वक्छारीरं चर्मा। ३. दत्येते। ४. ०दृष्ट्वा। ५. भूतस्मयन्न इति। ६. भिन्त०। ७. पूर्वोन्क्यापन्न चोदनीया। ८. ०व्यतिरेणान्यम्दात्राद्यस्ति। ९. इति शब्दस्त्वपमार्था। १०. अवष्टंभ। ११. शन्कोमि दुखप्रकर्षाश्च चक्रारुठभिव : १२. ०स्थितत्वाम्दुमतीवेत्युन्कम। १३. निमिन्तानि। १४. ०सूचकान्युत्साहाशीनीष्यंते। १५. विपरोतानि। १६. व चाहवे वंधुवंर्ग। १७. तत्रतेतत्स्याच्छक्त्रापष्टतः पांडवानामित्यादि श्रयलक्षणं श्रेयोस्तीत्यत आह ३०। शक्तत्वाद्युद्ध्यतां पाण्डवानाममित्रविजयलक्षणं श्रेयोस्तीत्यत आह–इति वा पाठः।

न काङ्क्षे विजयं कृष्ण[1] न च राज्यं सुखानि च।
किन्नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥३१॥

साम्प्रतमेव म्रियते[2] बन्धुवर्गस्ततो जयमपि न काङ्क्षे नाभिलषामि[3]। अथोच्यते—जये सति राज्यं लभ्यत इति चेत्, तन्न[4]। न च राज्यं काङ्क्षे। राज्ये हि सति सुखानि भवन्तीति चेत्, तन्न[5]। न च सुखानि काङ्क्षे। कस्मादित्याह—हे गोविन्द! (रा)ज्येन भोगैः सुखादिभिर्वा किं नः[6] कृत्यम्। सर्वं वा राज्यभोगादिकं यज्जीवितोपकरणं[7] तेनापि किं प्रयोजनमिति ॥ ३१ ॥

न त्वेष पुरुषार्थो यदात्मम्भरित्वम्। किं तर्हि। सर्वं[8] (हि) जीवितं राज्यादि (वा) गुरुपित्राद्यर्थमिष्यत इत्याह[9]—

येषामर्थे काङ्क्षितं[10] नो राज्यं भोगाः सुखानि च।
त एवं मे स्थिता योद्धुं प्राणांस्त्यक्त्वा सुदुस्त्यजान् ॥३२॥[11]

येषां गुर्वादीनां कृते राज्याद्यस्माभिः काङ्क्षितं त एव मे गुर्वादयः सुदुस्त्यजान्[12] प्राणांस्त्यक्त्वा[13] नोस्माकं पुरतो योद्धुं[14] स्थिताः। तत्को नाम बुद्धिपूर्वकारी निष्प्रयोजनं राज्यादि प्रियं कुर्यान्न गुर्वादीन्[15] ॥ ३२ ॥

तानेव दर्शयति—

आचार्याः पितरः पुत्रास्तथैव च पितामहाः।
मातुलाः (श्व)शुराः पौत्राः श्यालाः[16] सम्बन्धिनस्तथा ॥३३॥

---

१. कृक्ष्म। २. साम्न्पतमेव भ्निपते। ३. नाभिलष्याभि। ४. लभ्यत इति तन्न। ५. चेन्नन्नन। ६. नं। ७. पज्जावितं पेकरणं। ८. सर्वं। ९. इत्याहं। १०. पषामर्थे काक्षितं। ११. योद्धु प्राणांस्सत्त्कासुदुस्सजान् ३१। १२. गुर्वादयस्सुदुस्सतात्। १३. त्यत्का। १४. योद्धं। १५. प्रिये कुयान्न तु पुर्वादीवोति। १६. स्यालाः।

श्यालाः[1] श्वाशुर्याः । सम्बन्धिनो[2] जामात्रादयः ।। ३३ ।।

इदानीं करुणाविष्ट आह—

एतान्न हन्तुमिच्छामि घ्नतोऽपि[3] मधुसूदन ।
अपि त्रैलोक्यराज्यस्य[4] हेतोः किन्नु[5] महीकृते ।।३४।।

एतान् आचार्यादीन् घ्नतोपि जिघांसतोपि हिंसितुं नेच्छामि । घ्नतो ह्यवश्यं हन्यते[6] लाभार्थं यदि (ते) हन्येरन् । तत्र त्रैलोक्यराज्यस्यापि हेतोर्न हन्तुमिच्छामि[7] किं पुनः पृथिव्या अर्थे ।। ३४ ।।

पापशङ्कायामाह[8]—

निहत्य[9] धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन[10] ।
पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः ।।३५।।

हे जनार्दन ! एतान्[11] हत्वा अस्माकं कोभ्युदयो भवेत्[12] । कस्य हि बन्धुमारणात् प्रीतिरुत्पद्यते[13] । प्रीतिरिति यद्यपि कृदभिहितो भावो द्रव्यवद् भवति,[14] तथापि भावरूपतां न जहाति[15] इति नास्ति भिन्नकर्तृकता। हननप्रीत्योर्ह्येककर्तृकता[16] । यत आततायिनः किलैते कथन्नः प्रीतिः स्यादित्याह[17]—पापमेवेति । एतान् हत्वा प्रत्युत पापमेव अस्मान् आश्रयेत् । यत आततायित्वेपि भ्रात्रादयः सम्भजनीया वर्धनीया लाडनोया न तु

---

१. स्यालाः । २. संवेधिनो । ३. ०मिच्छामिष्वतोपि । ४. त्रैलोव्य० । ५. कितु । ६. हिसितुर्नेछामि घ्न त्र्यवश्यं हन्यंते । ७. ०रंस्तत्रेलोक्यराज्यस्यापि- हेतुर्न हंतुमिछामि । ८. पापसंवां शंकायामाह ३४ । ९. निहस धार्तराष्ट्रान्निः । १०. प्रेतिस्स्याज्जनार्हन । ११. एना । १२. योभ्युदयोभवेत् । १३. प्रतिर्० । १४. कृदमिहितो भावो द्रब्यवम्दत्रति । १५. ०तां मृजहतिति । १६. ०प्रीत्येत्द्यैक एकर्ता । १७. कथन्न प्रीतस्स्मादित्याह ।

हन्तव्या इति। कथं हि भ्रात्रादिवधादेवाधर्मोऽस्मान्न[1] भजत इति हत्वा पापमाश्रयेदिति। अत्रापिशब्देन न्याये भिन्नकर्तृकता वास्तवेन तु नास्ति। पापं हि हिंसादिकं[2] क्रियात्मकमेव। ततश्च य एव हन्ति तेनैव कृतं पापं स्यादित्येकः कर्ता ॥३५॥

एवं[3] भ्रात्रादिवधाशङ्काविक्लवमभिधाय तदभिप्रायाविष्करणायाह[4] —

तस्मान्नार्हा वयं हन्तुं[5] धार्तराष्ट्रान् स्वबान्धवान्[6] ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥३६॥

यस्माद्धार्तराष्ट्रहननात् प्रीतिर्नास्ति प्रत्युताधर्मः[7], तस्मात्तान् स्वजनवर्गान् हन्तुं वयं नार्हाः[8]। स्वजनं हि हत्वा कथं सुखिनो भवेम। धर्मबहिष्कृतानामेतदाचरणमित्यभिप्रायः[9]॥३६॥

किञ्च—

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः[10] ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥३७॥
कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम्[11] ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन[12] ॥३८॥

कुलक्षयस्तावद् ध्रुवः प्रत्युपस्थितः[13]। तत्कृतश्च दोषो वक्ष्यमाणः सर्व[14] एव। अमी च[15] द्रोणादयोऽस्मासु मैत्र्यां वर्तमानत्वान्मित्राणि। तेषां द्रोहे जिघांसायां यत्[16] पातकं यद्वा मित्राणि द्रुह्यतीति मित्रध्रुक् तस्मिन्मित्रद्रुहि पुरुषे यत् पातक-

---

१. भ्रात्रादिषधादेव०। २. यार्पं हि हिसादिकं। ३. कर्त्तान्न एवं। ४. वित्क्लवेभिधायांभिप्रायाविष्करणयाह ३५॥ ५. हंनु। ६. ०वांधवान्। ७. प्रत्यता०। ८. हंतु वयं नाहाः। ९. धर्मवहिष्कतानामेनद्दाचरितमित्याभिप्रायः। १०. लौभोयहनः। ११. पापद०। १२. पपश्यद्भिरव। १३. तावद्धवः प्रत्युपस्थिः। १४. वक्ष्यमाण०। १५. चाभी। १६. जिघांयोयत्।

मिति सम्बन्धः । तदेतदुभयमेते[1] धार्तराष्ट्राः पृथिवीलाभोपहत-चेतसः सन्तो[2] यद्यपि न[3] पश्यन्ति न चेतयन्ते । तत्कथमस्मा-दुक्तरूपात् पापान्निवर्तितुमस्माभिर्न[4] ज्ञेयम् अवश्यं ज्ञेयमित्यर्थः[5] । किम्भूतैरस्माभिः[6] । कुलक्षयकृतदोषमन्ववगच्छद्भिः[7] ॥३८॥

तमेव दोषं दर्शयति[8]—

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत[9] ॥३९॥

कुलक्षये सति ये धर्मा नित्यनैमित्तिका यागादयो गोत्र-समाचाराः स्त्रीरक्षणादयश्चानादिकालीनास्ते पुरुषाणामनुष्ठा-तॄणामभावात् प्रणश्यन्ति[10] । यत्र च धर्मस्य हानिस्तत्रावश्य-मधर्मः प्रभवति परस्परं प्रत्यनीकत्वात्तयोः । तदभिभूताश्च[11] प्राणिनोऽकार्येषु प्रवर्तन्त इत्याह[12]—धर्मे नष्टे कुलं[13] कृत्स्नमिति । उभयलोकहितवन्निस्त्र्यादिकमधर्म आक्रम्य तिष्ठतीत्यर्थः[14] । उतावश्यमिति ॥ ३९ ॥

किञ्च—

अधर्माभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥४०॥

अधर्माभिभवाद् हेतोः कुलस्त्रियः चरित्रहीना[15] भवन्ति । तासु दुष्टासु वर्णसंकरो जायते । संकीर्यते इति संकरः । वर्ण-श्चासौ संकरश्चेति । अशुद्धो वर्ण इत्यर्थः ॥ ४० ॥

---

१. ०मेने । २. लाभोपहेतचतेस्सन्तो । ३. ना । ४. ०उभरूपान्निवर्तिमस्मा-भिर्न । ५. ०मितिथ्यः । ६. किमूतैरस्माभिः । ७. अन्वगछद्भिः । ८. दशयति ३९। ९. भवत्युत । १०. पुरुषाणाननुष्टा रूणामभावान्प्रणश्यंति । ११. पभवति··· प्रत्यनीकत्वान्नयोः तदभिभूजाश्च । १२. प्रवर्ततः । १३. धर्मो नृष्टे कुल० । १४. आक्रमतॄधितिष्टतीत्यर्थः । १५. चरित्रहीना ।

संकरो नरकायैव कुलघ्नानां कुलस्य च[1] ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥४१॥

स वर्णसंकरः कुलस्य नरकपतनाय कल्पते । यतः— सन्ततिः शुद्धवंश्या तु परत्रेह च शर्मणे । विपरीता तु नरकाय इत्यागमः[2] । कुलघ्नानां च नरकाय । यतो वर्णसंकरोत्पत्तौ[3] कुलघ्नाः कारणभावं प्रतिपद्यन्ते[4] । कस्मात् संकरो नरकाय[5] । यस्मादेषामुभयसैन्याश्रितकुलानां पितरः धर्म्यसन्तानाभावाल्लुप्तपिण्डोदकक्रिया[6] भवन्ति । पिण्डश्च उदकञ्च पिण्डोदके तयोः क्रियाः ता लुप्ता येषां ते श्राद्धादिविच्छेदे[7] सति पतन्ति ॥ ४१ ॥

पुनरपि शोकसंविग्नत्वात्[8] संक्षेपेण तदेवालोचयन्नाह[9]—

दोषैरेतैः कुलघ्नानां[10] वर्णसंकरकारकैः ।
उत्साद्यते[11] जातिधर्माः कुलधर्माश्च शाश्वताः ॥४२॥

कुलघ्नानां सम्बन्धिभिः एतैः यथोक्तैः कुलधर्मनाशाधर्माभिभवकुलस्त्रीदूषणैर्वर्णसंकरकारकैर्हेतुभिः[12] दोषैः कुलाभावाद् जातिधर्मोनादिकालीनः[13] क्षात्रः[14] कुलधर्मश्चाध्ययनश्राद्धोदकदानादिः उत्साद्यते मूलत[15] एव विलोप्यत इत्यर्थः ॥ ४२ ॥

ततश्च—

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥४३॥

उत्सन्ने कुलधर्मे त्वयमन्यो दोषो[16] यत्कुलधर्मैः

---

१. कुस्य च । २. इत्यागम । ३. नरकापतो वर्णसंकरोत्पत्तौ । ४. कारणभावं प्रतिपद्यंत । ५. कस्मा संकरो नरकार्य । ६. ०भावलुप्तपिंडोदकक्रिया । ७. ०विछेदे० । ८. ०सविग्नत्वात्० । ९. आह —४१ । १०. कुलघानां । ११. उत्साघत । १२. ०दुष्रणैर्० वंण० । १३. ०दोषै कुलाभाज्जारते धर्मो० । १४. क्षत्रः । १५. दानारुकत्साद्यते मुलत । १६. उत्सन्नकुलधर्मत्वेयमन्योदोपः ।

परस्वर्गाद्यभ्युदयेन योगात् प्रेतानां सन्ततिविच्छेदान्न भवति (स्वर्गप्राप्तिः) । प्रत्युत[1] श्राद्धातिथ्यादिकुलधर्माभावान्नरकपतनं (तेषां) भवत्येवेति वेदवादिभ्यः[2] अनुशुश्रुम श्रुतवन्तो वयमिति ।४३।

एवं संशयाविष्टचेता[3] नरकप्रत्यवायदर्शनात् संजातसंवेग आह[4]—

अहो बत महत्पापं कर्तुं[5] व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं[6] स्वजनमुद्यताः ॥४४॥

अहो विस्मये । बत विषादे । यद्राज्यसुखलोभेन विस्मयकारिणा[7] सारभूतं दुर्लभं स्वजनं हन्तुं वयमुद्यताः तत् महत्पापं कर्तुं व्यवसिता इत्यतोस्य विषादः[8] । तथा राज्यसुखं नाम पश्य कीदृशं येन वयमद्य पापाः सम्भाव्यमानस्वजनवधाय प्रवर्तामह[9] इति[10] विस्मयः । यद्वा[11] अहो दैन्ये । बत खेदानुकम्पयोः । राज्येन यत्सुखं तल्लोभात् स्वजनवधपापव्यवसाये प्रवर्तामहे[12] । त्रयोप्येते क्लेशा राज्यार्थमस्य प्रादुरभवन्निति[13] कृत्वा निवर्तितुमिच्छतीति[14] ॥ ४४ ॥

संवेगाकुलः पुनरपि प्रलपन्नाह[15]—

यदि मामप्रतीकारमशस्त्रं[16] शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥४५॥

यदि धार्तराष्ट्राः शस्त्रपाणयः सन्तः मामशस्त्रम् अनुद्यतायुधमप्रतीकारम्[17] अकृतप्रतिविधानमुदासीनावस्थं हन्युस्तन्मे

१. धर्मैः प्रेतानां परस्वर्गादभ्यु० योगः सतद्विछेदान्न भवति प्रत्यत । २. ०कुले०···पतनमित्येवंवेद० । ३. एव शयाविष्टचेता । ४. आह ४३ । ५. कर्तुं । ६. हंतु । ७. विस्मारेण । ८. चिषादः । ९. वयमध्यसंभाव्यमानपापास्त्वजनवधयाये प्र० । १०. हर्ा । ११. युद्धा । १२. प्रवतीमदे । १३. क्लेशां ज्यार्थस्य प्रा० । १४. ०मिछतीति । १५०. आह ४४ । १६. ०ब्रतीकार० । १७. तायधमं० ।

क्षेमतरं युक्ततरं स्यात्। परो मनोरथः (सिद्धः) स्यात् पाप(ा)-करणादित्यर्थः। सशस्त्रं[1] सप्रतीकारं मां हन्तुं न केचन क्षमाः स्युरित्युभयोरुपादानम् ॥ ४५ ॥

इदानीं सञ्जयो धृतराष्ट्रं[2] प्रत्यर्जुनकथाप्रस्तावं समापयन्नि(द)माह—

एवमुक्त्वार्जुनः संख्ये[3] रथोपस्थ उपाविशत्।
उत्सृज्य सशरं चापं शोकसंविग्नमानसः ॥४६॥

तान् समीक्ष्य······सीदमानो ब्रवीदिदम् इत्यतः प्रभृति एवं यथोक्तम् उक्त्वा अर्जुनः[4] संख्ये युद्धभूमौ धनुरुत्सृज्य[5] रथस्योपर्युपाविशत्। किं कारणम्। यतः स्वजनहननजनित-शोकाकुल[6] इति ॥ ४६ ॥

अत्र संग्रहश्लोकाः—

शूरसंख्या परव्यूहे स्वबले शूरसंग्रहः[7]।
तद्विवेको भीष्मरक्षा[8] शङ्खवादित्रनिस्स्वनाः ॥
दिदृक्षा सैन्ययोर्ज्ञातिगुरुमित्रानुदर्शनम्[9]।
तज्जानुकम्पा पार्थस्य परिदेवपरिभ्रमौ ॥
युद्धत्यागश्च शोकश्च[10] पदार्थाः सारसंग्रहः[11] ॥

इति श्रीभगवद्गीतासु भगवद्भास्करकृते भगवदाशयानु-
सरणाभिधाने भाष्येर्जुनविषादो[12] नाम
प्रथमोध्यायः ॥ १ ॥

---

१. मशस्त्रं। २. धृतराष्टं। ३. ०मुक्त्वा सेख्ये। ४. यथोक्तमुक्त्वार्जुनः। ५. धनुःन्सृज्य। ६. यत स्ववजनहनन०। ७. श्लोकाऽपरव्यूहे शूरसंख्यास्व०। ८. ०रक्षां। ९. दिदृशा सैन्ययोर्ज्ञाति०। १०. युद्धत्यागो दशैकश्च। ११. संग्रहः ४६। १२. भाष्ये०।

अथ द्वितीयोऽध्यायः

इत्थमन्तकवक्त्रकुहराभिमुखं जनं मित्रबन्धुवर्गं प्रति जातघृणमर्जुनं[1] पृथिवीभारावतरणसम्पिपादयिषया भगवान् स्वधर्मसहितसम्यग्दर्शनोपदेशेन युयोधयिषतीति प्रतिपादयितुं द्वितीयाध्यायग्रन्थारम्भः[2]। तं सञ्जयो धृतराष्ट्रं प्रति विवृण्वन्नाह[3]——

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्[4] ।
सीदमानमिदं वाक्यमुवाच मधुसूदनः ॥१॥

तम् अर्जुनं तेन प्रकारेण प्रथमाध्यायोक्तेन गात्रावसादमुखशोषरोमहर्षादिलक्षणेन[5] कारुण्यपरवशम् अत एवाश्रुपूरव्याकुलत्वाल्लोहितेक्षणमवसीदन्तं[6] व्युपरतयुद्धोद्यमं भगवान् वक्ष्यमाणं वाक्यमुवाच । तं वाक्यमुवाचेति द्विकर्मकता ॥ १ ॥

कुतस्त्वा कश्मलमिदं[7] विषमे समुपस्थितम्[8] ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥२॥

कुत इति संशयानः पृच्छति[9]। कस्मादिदं कश्मलं मोहलक्षणं पापं कर्तृ त्वामुपगतमाग(त)म् । अस्मिन् विषमे संकटे त्रैलोक्यसम्भावितपौरुषं त्वामसम्भाव्यमानो मोहः कुतः सम्प्राप्त इति महान् संशयः । कीदृशं[10] कश्मलम् । कुलशीलविद्यारहितैः सेवितम् अतश्चाकीर्तिकरं तत एव चास्वर्ग्यं नरकादिप्रापकं तस्मात् ॥ २ ॥

---

१. ०कुहराभिमुखजनमित्रबंधुवर्गं प्रति तात० । २. ०ग्रंथारंभः । ३. प्रतिवृण्वन्नह । ४. ०मस्त्रुपूर्णाकुलेक्षणम् । ५. तमर्जुन तेन प्रकारण प्रथमाध्योन्क्तेन गात्रावसादमुभांशोष० । ६. कुरुण्व०""एवालुदू० । ७. कश्मल० । ८. समुपस्थितम् । ९. पूछति । १०. कीदृशं ।

मा क्लैब्यं गच्छ कौन्तेय नैतत्त्वय्युपपद्यते[1] ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ[2] परंतप ॥३॥

क्लैब्यम् अमनुष्यत्वं दीनभावं मोहान्मा गच्छ[3] मा आश्रय यतस्त्वयि[4] खाण्डवानलतर्पणेन संग्रामाराधितत्र्यम्बकतया निवातकवचवधपरितोषितपुरन्दरत्वादिभिरुपादानैर्देवेष्वपि[5] प्रख्यातपौरुषे नैतदुपपद्यते न सम्भाव्यते[6] । अतस्त्वं हृदयस्याल्पसारत्वं[7] क्षुद्रमल्पवस्तुभूतं न्यूनहृदयत्वं[8] कापुरुषसेवितं त्यक्त्वा रथोपस्थादुत्तिष्ठ । उत्थाय च युद्धाय सज्जो भवेत्याशयः[9] । परंतपेत्यनेनार्जुनं प्रोत्साहयति ॥ ३ ॥

एवं भगवतोक्तेर्जुन उवाच[10]—

कथं भीष्ममहं संख्ये द्रोणञ्च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि[11] पूजार्हावरिसूदन ॥४॥

कथं केन प्रकारेण कया युक्त्या[12] भीष्मादीन् माननीयानहं प्रतियोत्स्यामि[11] । मधुसूदनारिसूदनेति भक्तः पुनः पुनरास्थां करोति समक्रमेण ॥ ४ ॥

किमिति[13] न च प्रतियोत्स्यामीत्याह[14]—

गुरूनहत्वा[15] हि महानुभावान् श्रेयश्चतुं भैक्ष्यमपीह[16] लोके ।
न त्वर्थकामस्तु गुरूनिहत्य भुञ्जीय भोगान् रुधिरप्रदिग्धान्[17] ॥५॥

---

१. गछ कौंतवेय नैतत्वस्युपपद्यते । २. तन्क्तोन्तिष्ट । ३. गछ । ४. त्वषि । ५. ०भिरपादानैर्० । ६. नैतद्रुपपद्यत ना साभाव्यते । ७. अत सत हृदयस्य० । ८. ०मूतान्यूनतृदय० । ९. त्यत्त्का रथोपस्थाः उत्तिष्ट । उत्स्याय च पुक्रय सज्जया भवेत्याशयः । १०. उवाच ३ । ११. प्रतियोत्सामि । १२. युक्ता । १३. ०नारियूदनेति भक्तापुनः पुनराछाना करोति । समत्रमेण किमिति । १४. च न प्रतियोत्स्याम दत्त्याह ४ । १५. ० हत्व । १६. श्रेयश्चभुंत्तुभैक्षमपीह । १७. पतिग्घान् ।

हि यतः कारणात्[1]। यस्माद् (इह लोके देशे) गुरून् भीष्मादीन् प्रति युद्धवर्जनेन अहत्वा रक्षित्वा भैक्ष्यमपि चर्तुं[2] श्रेयः। न तु धनाभिलाषी सन् गुरून्निहत्य भोगान् राज्यादीन्[3] शोणितलेपबहुलान् भुञ्जीयेति कुत्सा। नैव भुञ्जीयेत्यर्थः। इह लोके इह क्षणिके जीवलोक इत्यर्थः। तुशब्दो गुरुहननव्यावृत्तिसू(च)नार्थः। पुनस्तुग्रहणाद् भैक्ष्यमपि प्रशस्यतरम्[4]। न त्वेवंविधो विषयोपभोग इति ॥ ५ ॥

एतद्दशायामिदमेव तावद् विचार्यताम्[5]—

न चैतद् विद्मः[6] कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः।
यानेव[7] हत्वा न जिजीविषाम[8]-
स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः[9] ॥६॥

चशब्दः पूर्वापेक्षयाधिकाभ्युदययुक्तिद्योतनार्थः[10]। एतदिति वक्ष्यमाणावमर्शिना सर्वनाम्ना—यद्वा जयेम यदि वा नो जयेयुः—इत्येतद्वक्ष्यमाणवाक्यद्वयाभिधेयोर्थः प्रत्यवमृश्यते[11]। न इत्यात्मीयपरवर्गाविकीकृत्य[12] निर्देशः। स धार्तराष्ट्राणामस्माकमित्यर्थो विवक्षितः[13]। कतरदित्यनेन सामान्यवादिना तद्वाक्यद्वयाभिधेययोर्बलयोरेकतरं गरीयस्त्वेन विकल्पतो निर्णीयते[14]।

---

१. हिः कारणायदेशे। २. चर्तुं। ३. शब्दादीन्। ४. ०र्थः। भग्रहणात्न्मैक्ष्यमपि प्रशंस्य०। ५. एतदास्साभिदमेव तावद्विचार्यताम् ५। ६. विड्मः। ७. वानेव। ८. जिजोविषामस्ते०। ९. प्रमुस्तो धर्तराष्ट्राः। १०. ०पेक्षयाभ्युपयुक्तिद्योतनार्थः। ११. ०वमशिना सर्वनाम्ना पद्य जयेम यदि वा नो नयेयुरित्येतद्वाक्यत्वयाभिधेयोर्थः प्रत्यवमृष्यते। १२. ०स्वर्गावकीकृत्य। १३. ०मस्पाकमित्यर्थो विवक्षतः। १४. तद्वाक्यद्वत्याभिधेययोर्वलयो० निणोर्मते।

यद्यदिशब्दौ वितर्के विकल्पे वा । तदयं वाक्यार्थः[1]—न चैतद्वयं जयपराजययोरनियमाज्जानीमः[2] कतरद्बलमस्माकं धार्तराष्ट्राणां मध्याद् गरीयो[3] गुरुतरं बलवत्तरमिति । यद्वा वयं तान् जयेमाभिभवेम[4], यदि वा ते नोऽस्मान् जयेयुरभिभवेयुरिति[5] । किञ्च[6], यानेव धार्तराष्ट्रान् हत्वा जीवितुं नेच्छामः[7] कृपालुतया त एवास्माकं प्रमुखे सम्मुखे स्थिता इति । एतच्चार्जुनस्य सम्भ्रमपरिदेवनं हस्ताद्यभिनयेन ॥ ६ ॥

एवं सकारणं स्वपरिदेवनं पुनरपि[8] भगवन्तमर्जुन आह[9]—

कार्पण्यदोषोपहतस्वभावः
पृच्छामि[10] त्वां धर्मसम्मूढचेताः[11] ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्[12] ॥७॥

एवमहं गुरुबन्धुमित्रस्वजनान् मृत्युना धृतान् दृष्ट्वा[13] कार्पण्यदोषोपहतस्वभावः[14] कार्पण्यमौचित्यप्रतिपक्षभूतं दैन्यम्[15] तदेव दोषस्तेनोपहतो दूषितः सत्त्वधैर्यात्मकः[16] स्वभावो यस्य स तथोक्तः । तथा धर्मे सम्मूढमप्रतिपत्तिं गतं चेतो यस्य सोऽहं पृच्छामि त्वां परमेश्वरम् । यन्मे श्रेयः स्यात्तन्मे निश्चितमसन्दिग्धं ब्रूहीति[17] । धर्मविषयदैन्यदोषोपहतचित्तोऽहमित्यर्थः ।

---

१. शब्दो वितर्क्ये वा विल्पे तदयुं वाकयार्थः । २. ने चैतद्वयं जयपराजययोनियमा जानीमः । ३. मध्याद्गुरीयो । ४. ताजयेम० । ५. नोस्मां तपेपुरभिभवेयुरिति । ६. किच । ७. धार्तराष्टान हत्वा नीवितु नेछामः । ८. सपरिदेवनरपि । ९. आह ६ ॥ १०. दाषो ··· पृछामि । ११. ०सम्मूवचेताः । १२. यछेयस्स्यान् ··· ब्रूहि ··· त्वां त्पपन्नम् । १३. ०मित्ररवजनान् ··· ध्रातान् दष्ट्वा । १४. ०दोशोप्रहत० । १५. कार्यणयमौर्तित्य प्रतिप्रक्षभूतदैत्यं । १६. दोषरवेनोपहतो दुषितस्सत्त्व० । १७. धर्मेस्समूढं अलब्धप्रतिपत्ति चेतो पस्य सोहं पृछामि त्वा पर्मेश्रेयस्यान्तन्म स्वंतिस्सन्दिग्घं ब्रूहीति ।

शास्त्रविहितोनुष्ठेयः[1] क्रियामार्गो धर्मः। तत्रैतत्स्यात्[2]—नाशिष्यायोपदेशो(देयः) इति। तन्न। शिष्यस्तेहं[3] निवेदितात्मा त्वां प्रपन्नः[4] शरणागतश्च। अतोनुशासनेनानुगृहाणेति ॥ ७ ॥

कस्मात्त्वत्तः श्रेयोनुशासनं प्रार्थ्यत इति चेत्तदाह[5]—

नहि प्रपश्यामि ममापनुद्याद्
यच्छोकमुच्छोषणमिन्द्रियाणाम्[6] ।
अवाप्य भूमावसपत्नमृद्धं[7]
राज्यं सुराणामपि चाधिपत्यम्[8] ॥८॥

हि[9] (यतः) कारणाद्[10] देशे। यस्माद् भूमौ[11] निष्कण्टकं[12] स्फीतं राज्यं ततोपि चाधि(कं सुराणां स्वा) मित्वं[13] प्राप्य अहन्न तत्[14] तथाभूतं (प्रपश्यामि) बुद्धया[15] निरीक्ष्ये यो ममैवंभूतस्य[16] सर्वाधिपतेः[17] सम्भाव्यमानहितोपदेशसहायकस्यापि मुमूर्षोर्ग्लानिसमुत्थं[18] शोकं सर्वेन्द्रियाणामिन्द्रियवृत्तीनामुच्छोषणं सङ्कोचकरम्[19] (अपनुद्यात्) निरस्येत् त्वां विनेत्यतस्त्वां पृच्छामीति[20] ॥ ८ ॥

अधुना सञ्जयः पार्थप्रतिज्ञातामुक्तिं समापयन् धृतराष्ट्रमाह[21]——

---

१. ०विहितोनुष्टेयः। २. स्थात्। ३. इति तच्छिष्यः। ४. त्वप्रपन्नः। ५. कस्मात्वतः''''दाह ७॥ ६. द्यशोकमुछोषणमिंद्रियाणां। ७. ०सपन्न०। ८. च्चाधिपंत्यम्। ९. हिः।१०. कारणाय। ११. यस्मांद्भूमौ। १२. निष्कंठकम्। १३. ततोपि चाधिमिंत्वं। १४. हन्न तं। १५. बुद्धा। १६. ''''ममैवभूतस्य। १७. सर्वाधियते। १८. मुमृषुंग्लातिसमुत्थं। १९. सर्वेद्रियाणामिंद्रियवृत्तीतामुछोषणं संकोचकरं। २०. पृछामीति। २१. अधुनां'''' संजयः पार्थप्रतिज्ञाना०समापयन् धतराष्टंमाह ८।

एवमुक्त्वा हृषीकेशं[1] गुडाकेशः परन्तप ।
न योत्स्यामीति गोविन्दमुक्त्वा तूष्णीं बभूव[2] ह ।।९।।

हे परन्तप । कथं भीष्ममहं इत्यतः प्रभृति भगवन्तमुक्त्वा[3] ततोतिशोकाकुलमनाः[4] पुनरपि गोविन्दमाह[5]- न योत्स्यामि[6] इति । एवं परिच्छेदमुत्साद्य[7] तूष्णीं[8] बभूवेत्यर्थः । हः पादपूरणे ।। ९ ।।

इदानीं भगवत्प्रत्युक्तिं वर्णयन्नाह[9]—

तमुवाच हृषीकेशः[10] प्रहसन्निव भारत[11] ।
सेनयोरुभयोर्मध्ये[12] सीदमानमिदं वचः ।।१०।।

तमर्जुनं[13] सेनयोर्मध्ये यथोक्तेन प्रकारेण सीदमानं युद्धं प्रति त्यक्तोत्साहं हृषीकेशो[14] हसन्निदं वक्ष्यमाणं वाक्यमाह[15] । महात्मानः[16] किल स्मितपूर्वाभिभाषिणो भवन्तीति ।। १० ।।

तत्र (न) योत्स्यामि इत्यात्मविषयमिथ्याज्ञानवशान्निश्चित-संकल्पमर्जुनमात्मज्ञानोपदेशमन्तरेण तन्निवृत्तेरसम्भवात्तदुप-देशाय प्रसङ्गमवतारयितुं भगवानुवाच—[17]

त्वं मानुषेणोपहतान्तरात्मा विषादमोहाभिभवाद् विसंज्ञः ।
कृपागृहीतः समवेक्ष्य[18] बन्धूनभिप्रपन्नान्मुखमन्तकस्य ।।११।।

---

१. एवमुत्त्वा हृषीकेशं । २. ....मुत्त्वा तूक्ष्मीं । ३. भगवतमुत्का । ४. ततो ते० । ५. गोविंदमाह । ६. योत्स्य । ७. परिछेयमुसाद्य । ८. तूक्ष्मों । ९. ....०न्नाह ९ । १०. तृषीकेशः । ११. भाइत । १२. ...रुभयार्मध्ये । १३. नमर्जुनं । १४. सक्तोत्साहं तृषीकेशो । १५. वक्ष्यमाण वाग्माह । १६. महात्मान । १७. अर्जुनमत्माज्ञानोपदेशमंतरेण तन्निवृत्तो संभवा० त्तदुपदेणय प्रसंग० ०वाच १० । १८. वीक्ष्य ।

त्वं मानुषेण मानुषजातिसुलभेनानुशयेन[1] मलिनीकृतमनाः। अत एव मृत्योरास्यमाभिमुख्येनागन्तुमारभमाणान् बन्धूनवेक्ष्य[2] दयाभिभूतो मानुषजातिसुलभाभ्यां शोकमोहाभ्यां ग्रहणाद्धेतोर्विसंज्ञो[3] व्यवहितदिव्यज्ञानःसंवृत्त इति। इतश्चोपहासकारणम्। संज्ञानं संज्ञा[4] विशिष्टा बुद्धिः। विगता व्यवहिता वा संज्ञा अस्येति[5] विसंज्ञः। उपहतान्तरात्मा। वृत्त्यप्रसङ्गात् समासो[6] मानुषेणेत्यनेन सापेक्षत्वेपि[7] गमकत्वाद्युज्यत एवेति[8] ॥११॥

कस्माद्विसंज्ञोसीत्याह[9]—

अशोच्यानन्वशोचस्त्वं[10] प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥१२॥

(अशोच्यान् अशोचनीयान् भीष्मादीन्)अनुशोचितवानसि[11]। तेषां हि स्वधर्मानुष्ठानप्रवृत्तत्वेन[12] त्रिवर्गसिद्धेर्भाविनोर्थस्य[13] च नित्यत्वादशोच्यत्वम्। अपि च प्रज्ञावादांश्च भाषसे—पापमेवाश्रयेदस्मान्[14], श्रेयश्चतुं भैक्ष्यमपीह[15] लोके—इति[16]। तदेतदुभयं तव(न) शोभते। यस्माद् गतप्राणानगतप्राणांश्च[17] नानुशोचन्ति पण्डिताः। परिनिष्ठिततत्त्वज्ञानाः[18] पण्डिता उच्यन्ते। अत्र पुनरात्मयाथात्म्यवादिनोभिप्रेयन्ते[19]। तेषां तावदात्मनोविनाशित्वदर्शनादशोकः[20]। तद्वदविनाशित्वं संपद्य मोहशोकौ[21] त्यक्तुमर्हसि इति तात्पर्यार्थः।

१. ०जात्या तुदाशयेन। २. ....गंतुमारन्वंधूनवेक्ष्य। ३. ...मा व्रूमणाद्धेतो०। ४. साज्ञा। ५. संज्ञस्येति। ६. वृत्त्यप्रंसमासासो। ७. ०त्यनेम सापेक्षोपि। ८. युज्यतरवेति। ९. त्याह ११। १०. ...ननुशो०। ११. अशोचनीयान् ....अनुशोचितवासि। १२. तेषां....हि स्त्रधर्मानुष्टानप्रवृत्त्वेन। १३. भांविनोर्थस्य। १४. ....दस्मात्छ्रेय०। १५. भैदमपीह। १६. दति। १७. यस्माद्भूत प्रा०। १८. परिनिष्टित्त्वज्ञा०। १९. ....वादितोभिप्रर्यते। २०. ...दात्मनो विनाशित्वादर्शनादशोकः। २१. तद्वदनविनाविनाशित्वं संपद्यन्मोह।

न पुनरस्यायमर्थः[1]—पण्डिता न शोचन्ति त्वं तु मूढोसीति। नेहातिविनीतस्य[2] मौर्ख्यं[3] सम्पाद्यं तदपनयार्थत्वात्[4] (…) प्रवृत्तेः ॥ १२ ॥

कथं पुनरस्याविनाशित्वमित्युत्साहयितुमाह[5]—

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥१३॥

च-तु-शब्दौ कदाचिदित्यस्मिन्नर्थे वर्त्तेते।[6] नाहं[7] कदाचिन्नासम् अपि तु आसमेव। न त्वं नासीः, आसीरेवेत्यर्थः। नेमे[8] भीष्मादयो[9] नासन् किन्त्वासन्नेव। न च न भविष्यामः। अस्माच्छरीरात् परं[10] शरीरान्तरे भविष्याम एव। अनेन त्रिष्वपि कालेषु सत्ताख्यायते[11]। प्रतिशरीरं क्षेत्रज्ञानां[12] भेदात्तद्भेदव्यपदेशः।

के पुनरमी क्षेत्रज्ञा नाम। परमात्मनोंशाः[13]। तथा च वक्ष्यति—ममैवांशो जीवलोके[14] जीवभूतः सनातनः इति। अग्निविस्फुलिङ्गवन्महाकाशघटाकाशवज्जीवपरयोर्भेदाभेदौ[15]। तत्र स्वाभाविकोभेदः, औपाधिकस्तु भेद इति[16] स्थितिः। एवमुत्तरत्र क्वचिदभेदेन[17] व्यपदेशः (क्वचिद्) भेदेन च भविष्यति। अनादिसिद्धाश्च जीवाः सनातना इति वचनान्न तेषां सर्गादावुत्पादः प्रलयो वान्ते। (त)था च याज्ञवल्क्यः[18]—

---

१. न पुनस्यमर्थः। २. न ह्यनीतस्य। ३. मौर्थं। ४. तदपनपार्थत्वात्। ५. कथं पुरविनाशित्वामेति उत्साधयितुमाह १२। ६. शब्दः…वर्तते। ७. नात्कं। ८. ते मे। ९. भीष्मदयो। १०. अस्माछरीरातपरं। ११. सभाख्यायते। १२. ष्से त्र्यज्ञानां। १३. परज्ञात्मनीशाः। १४. जीवलेके। १५. …घटाकाशवत्र्यतीवपरयोर्भेदाभेदौ। १६. स्वाभाविकोभेदऔपधिकस्तुभेदरिति। १७. एवमत्युत्तरत्र काच्चिदभेदेन। १८. इति तेथा च याज्ञवल्कः।

अहङ्कारेण मनसा गत्या कर्मफलेन च ।
शारीरेण च नात्मायं मुक्तपूर्वः[1] कदाचन ॥ इति ।

एवं चानादित्वे पूर्वकृतकर्मापेक्षया सर्गादौ सुरनरतिर्यग्भेदेन[2] सृष्टिवैचित्र्योपपत्तिः । धर्माधर्मव्यवस्था[2] बन्धमोक्षव्यवस्था[3] चास्मिन् पक्षेवकल्पते[4] ।

येषां पुनः परमात्मैव साक्षादनुप्रविष्टः[5] शरीरेषु तदंशो जीवो नाम नास्तीति मतम्, तेषामेकस्मिन् मुक्ते सर्वमुक्तिप्रसङ्गो बद्धे चैकस्मिन् सर्वस्यापि मुक्त्यभावादिति[6] व्याससूनोः शुकस्यापि मुक्त्यभावः स्यात्[7] । न च परमात्मनः संसारित्वं युज्यते । तस्य च विद्यायोगात् विज्ञानमानन्दं ब्रह्म इति च नित्याकाशानन्दस्वरूपत्वात् । तस्मादीश्वरांशाः प्रतिशरीरं परस्परं भिन्ना[8] जीवा अभ्युपगन्तव्याः । एवञ्च घटधूमदृष्टान्तोपि युज्यते––

यथैकस्मिन् घटाकाशे रजोधूमादिभिर्वृते ।
न सर्वे संप्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः[9] ॥ इति ।

येषामयमीश्वरोत्यन्तभिन्नो[10] जीवात्मानश्च बहवस्ते च सर्वे सर्वगता इति, तेषामपि साङ्कर्यप्रसङ्गः । एकेनाग्निहोत्रे कृते सर्वेषां (तत्कृतं) स्यादेकेन च मद्यपाने[11] कृते सर्वैः कृतं स्यात् । अथ यस्य तच्छरीरं[12] तस्यैव तदिति चेत् ?

---

१. मुन्क्तपूर्वः । २. तिर्यक्यूभेदेन । २. वैचिओपपतिः धर्मधर्मव्यवस्था । ३. बंधसोक्ष्यव्यवस्था । ४. चास्मित्य पक्षेव कल्पते । ५. साक्ष्यादनु० । ६. वाद्धेचैकस्मिन्नेकस्यापि मुक्तभावदति । ७. शुकस्य मुक्तभावः स्यात् । ८. तस्याविघायोगाविज्ञानमानंदं ब्राह्मेति नित्यकाशानंदं'' 'दीश्वराशाः प्रतिशरीरं परस्परभित्रा । ९. ''''सुखादिभिरिति । १०. येषामयीश्वरोत्यंत० । ११. मध्यपाने । १२. यस्यतछरीरं ।

कस्य तच्छरीरम्[1]। सर्वेषां तत् सम्बन्धाविशेषादभिसन्ध्यादिवशात्त्स्याद् व्यवस्थेति[2] चेत् अभिसन्ध्यादिषु चैकतुल्यत्वादेकस्मिन् मनसि[3] सर्वेषां समवायाः संकल्पादयः समानास्तत्पूर्वकं कर्म तन्निमित्तं च शरीरमिति[4] सर्वसाधारण्यान्न[5] कदाचिदसाधारण्यहेतुः शक्यते केनचिद्दर्शयितुम्। अनादित्वस्यास्मत्पक्षेप्यविशेषादणुपरिमाणाश्च जीवा इष्यन्ते[6]। कस्मात्। उत्क्रान्तिगत्यागतिश्रुतेः। लिङ्गशरीरस्य च संकोचविकासधर्मिणोरणुरूपत्वादौपाधिकमणुत्वं[7] जीवस्य गीयते। परमात्मरूपेण तु सर्वगतत्वं जीवस्येति स्थितम्[8] ॥ १३ ॥

(तस्य) नित्यत्वे लोकसिद्धं दृष्टान्तमाचष्टे[9]—

देहिनोऽस्मिन् यथा देहो कौमारं[10] यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति[11] ॥१४॥

यथा बाल्ययौवनस्थाविरेषु[12] सोहमस्मीति प्रत्यभिज्ञानान्नित्यत्वमात्मनः प्रत्यक्षप्रमाणसिद्धम्। देहस्यैवावस्थान्तरापत्तिर्नात्मन इति तथा नित्यस्यैव[13] तत्रावस्थितस्य (आत्मनः) देहान्तरप्राप्तिः। तत्र धीरो धीमान् न मुह्यति। यदि तर्ह्यविनाशित्वमात्मनस्तदिदानीं वृथा ते शोकः[14] समुपस्थितः कथम् ॥ १४ ॥

शीतोष्णादिकृतैः[15] सुखदुःखैः संयोगा (त्तद) नुपरम इति। तच्च[16]—

---

१. कस्य तछरीरं। २. ···संध्यादिवशात्साध्यवस्थेति। ३. चैवतुल्य ०मतसि। ४. तन्निमित्तव शरिरमिति। ५. सर्वसाधारण्यन्नकेनचिद्दर्शपितुम्। ६. द्रष्यंते। ७. लिगशरीरस्य संकोच च विकाश धर्मि णुत्वादौपाधिक०। ८. स्वितम्। ९. दष्टांतमाचष्टे १३। १०. कौमार। ११. मुत्वति। १२. वल्ययौवन। १३. तथानित्यस्यैवाव०। १४. ०दानीमन्यथा मे शोकः। १५. कथं शतोक्ष्मादि कृतैः। १६. तत्र्व १४।

मात्रास्पर्शास्तु कौन्तेय[1] शीतोष्णसुखदुःखदाः[2]।
आगमापायिनोनित्यास्तांस्तितिक्षस्व[3] भारत ॥१५॥

मीयन्ते विषया आभिरिति मात्रा इन्द्रियवृत्तयः। तासां स्पर्शा विषयैः संयोगा[4]: शीतोष्णनिमित्तसुखदुःखहेतवः[5]। ते चानित्याः। कस्मात्। आगमापायित्वात्। आगच्छन्ति अपगच्छन्ति च, न च नित्यसमवेताः पावकौष्ण्यवत्[6]। शीतोष्णग्रहणं[7] प्रदर्शनार्थम्। आध्यात्मिकमाधिदैविकमाधिभौतिकं[8] त्रिविधं दुःखम्(तत्)च त्रिविधमेवेति। यस्मादनित्यास्तेषामुपायेनोपरमः शक्यः कर्तुम्[9]। कोसावुपायः। ज्ञानपूर्विका तितिक्षा। तदाह तांस्तितिक्षस्व इति सहस्वेत्यर्थः[10] ॥ १५ ॥

कथं तत्सहनं तदुपरमहेतुरित्याह[11]—

यं हि न व्यथयन्त्येते पुरुषं[12] पुरुषर्षभ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥१६॥

न व्यथयन्ति न चालयन्ति[13] स्वस्मादात्मस्वरूपात्। समे दुःखसुखे यस्य। यं समदुःखसुखं[14] न चालयन्ति सोमृतत्वाय मोक्षाय कल्पते समर्थो योग्यो भवतीत्यर्थः[15] ॥ १६ ॥

ननु चामृतत्वं न सम्भावयितुं शक्यते, सुखदुःखलक्षणस्य विकारस्य मुक्तेप्यात्मनि सम्भवादात्मनो वा कदाचिद् विनाशोपपत्तिरित्याशङ्क्य आह[16]—

---

१. कौंतेयः। २. शीतोक्ष्मसुखदुःखशं। ३. आगमापायनोनित्यास्तां०। ४. विषयैस्संप्रयोगाः। ५. शातोक्ष्मनित्तसुख०। ६. आगमापायित्वादागच्छंसपगछंति न च नित्यसमवेताः पावकौस्म्यवत्। ७. शीतोम०। ८. आध्यात्मिकामाधिदैनिकंमाभिमौतिकं। ९. कर्तुं। १०. सहस्वत्यर्थः। ११. नदुपरभहेतुरित्याह १५। १२. व्यथयंत्ये पुरुष। १३. न चालपंति। १४. ममेसुख० समदुःखं। १५. योग्येभिवतीत्यर्थः। १६. वेनाशोपत्ति० क्याह १६।

नासतो विद्यते[1] भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥१७॥

आत्मन्यविद्यमानस्य सुखदुःखलक्षणस्य धर्मस्य न कदाचिद् विद्यते[2] भावः । भवनं भूतिरुत्पत्तिरित्यर्थः[3] । सिकतास्विव तैलस्य । उत्पद्यमानस्यैव हि (मानसः) सुखदुःखलक्षणो विकारः शीतोष्णादिनिबन्धनो जायत इत्यनन्तरमुक्तम्[4] । नन्वचेतनत्वादन्तःकरणस्य संवेदनं नोपपद्यते । चेतनत्वात् क्षेत्रज्ञसमवेतस्यैवायं विकारः[5] ।

यथा वैशेषिकाः प्राहुः—नैतदेवम् अन्तःकरणस्थोप्यसौ जीवात्मना संवेद्यते । यथोष्णत्वमग्नित्वसमवेतत्वेनात्मना संवेद्यते[6] । यथा च रूपादयो घटादिस्थाः[7] (इति) । नायं क्षेत्रज्ञधर्म इति च वक्ष्यति—इच्छा द्वेषः सुखं दुःखम्[8]—इति । यद्यपि क्षेत्रज्ञसमवायित्वं सुखदुःखयोस्तथापि तत्स्वरूपस्य न विक्रिया मणिस्वरूपवत् । नीलपीतादीनामेव[9] मणिसमवायिनां परस्परविरोधाद् विक्रिया । विक्रिया हि नाम विनाश उपमर्दः[10] । तथात्मन इति । नाभावो विनाशो विद्यते । सत आत्मनः सोहमिति प्रत्यभिज्ञानान्नित्यत्वोपपत्तेरनित्यहेतोश्चाभावात्[11] । अविनाशी वा अरेयमात्मा इति श्रुतेः । उभयोः सदसतोर्दृष्टो निर्णीतोन्तो मर्यादा अन्त्यावस्थेति[12] यावत् । अन्तशब्दो मर्यादावचनोत्र ग्रामान्त इति[13] यथा । यत्स-

१. वियते । २. कदाचिद्विधते । ३. भवनभूतिरुत्पत्रिरि० । ४. तैलस्य मानसस्यैव हि सुखदुःखलक्षणो विकारः शीतोक्ष्म्यादिनिबंनो जायत इज्य नंतरमुक्तम् । ५. चेतनत्वाक्षेत्त्रज्ञसमवेतरावायं । ६. यथोष्ट्त्वमग्नितमात्माना संवेद्यने । ७. घटादिस्था । ८. इछाद्वेषस्सुखदु० । ९. लीलपीताशेनामेव । १०. विक्रिया हि नासोपमेदस्० । ११. सवितृमलवत् प्रत्यभिज्ञानान्नित्योपपत्तेरनिस्यहेतोश्चाभावा । १२. निर्णीतातः मर्यादात्ववस्था । १३. ग्रामांता इति ।

त्तत्सदेव। यदसत्तदसदेवेति[1]। कैरयं निश्चयः कृत इत्याह—तत्त्वदर्शिभिः[2]। तद्भावस्तत्त्वम्। तदिति[3] सर्वनाम्ना पदार्थमात्रं व्यपदिश्यते। वस्तुयाथात्म्यवेदिभिरित्यर्थः[4]।

अपरे तु मायावादिनोन्यथावतार्य वर्णयन्ति[5]। इतश्च[6] शोकमोहावकृत्वा शीतोष्णादिसहनं युक्तं कर्तुम्। कस्मात्[7]। यतो नासतः शीतोष्णादेर्विद्यते[8] भावः। भवनमस्तिता। कुतः। विकारत्वात्[9]। विकारश्च (प्रत्यक्षादिभिः) प्रमाणैर्निरूप्यमाणो नास्तितां प्रतिपद्यते। यथा घटादिः स्वकारणव्यतिरेकेणानुपलब्धेरसन् एवं सर्वो विकार इति[10]। नन्वेवं सर्वाभावे शून्यवादः प्रसज्येत[11]। नायं दोषः। द्वे बुद्धी[12] सर्वप्राणिप्रसिद्धे भवतः—विशेष्यबुद्धिर्विशेषणबुद्धिश्च[13]। सन् घटः सन् पटः[14] इति। तत्र विशेष्यविषया बुद्धिर्घटादिविषया सत्पटादौ[15] व्यभिचारान्मिथ्याबुद्धिः। या पुनर्विशेषणविषया सद्बुद्धिः सा सर्वत्र वृत्तेरमिथ्या[16]। तस्मात् सैव पारमार्थिकी। सर्वो हि घटादिः शरीरादिश्च प्रपञ्चो मायामात्रमसदिति मन्यन्ते।

एतदन्ये[17] प्रमाणकुशलाः प्रत्याचक्षते[18]। यत्तावदुक्तम्—प्रत्यक्षादिभिः प्रमाणैर्विकारो घटादिर्निरूप्यमाणः स्वरूपं जहातीति तदसत्। आलोकेन्द्रियमनस्संस्कारे[19] सति घटोयं पटोयमिति प्रत्यक्षा बुद्धिरुत्पद्यते। यया बुद्ध्या योर्थः प्रतीयते तयैव तदभावः प्रतीयते[20]

१. युदसत्तदसदेवेति। २. तत्वदर्शिभिः। ३. तदेति। ४ वस्तुयाथात्मावेदिभिर्०। ५. अवतारं वर्णयन्ति इति वा पाठः। ६. मायावादिन्येन्यथावतार वर्णयंतीतश्च। ७. शीतोश्मस० कत्तुं कस्मात्। ८. शीतोक्ष्मादर्वि०। ९ कुजो विकारत्वात्। १०. घटादिस्स्वकारेऽयतिरेकेणानुपलभे रसन्नेवं सर्वोधिकार इति। ११. प्रसज्यते। १२. वुद्धि। १३. विशेष्यवुद्धिर्विशेण०। १४. घटस्सर्पट इति। १५. विशेष्यवु० सपटादौत्यभिचारान्मिथ्यावुद्धिर्या०। १६. ··विषयासंवुद्धिस्सा सर्वत्राव०। १७. मायामात्रमत् मिति मन्यंते तानन्ये। १८. प्रसाचक्षते। १९. आलोकेंद्रियमनस्कारे। २०. जयैव तदभावाः प्रतिपते।

इति को वदेद् यो न तार्किकः । पञ्चभिः प्रमाणैः प्रत्यक्षानुमानोपमानार्थापत्त्यागमैर्वस्तुस्वरूपं परिच्छिद्यते[1] । यत्र पञ्चापि निवृत्तानि तत्र प्रमाणनिवृत्त्या प्रमेयाभावो निश्चीयते । यथा नात्र घट इति[2] । न च व्यभिचारादेवावस्तुत्वं[3] भवति । यथैव घटबुद्धेः पटादौ व्यभिचारादवस्तुत्वं तथा सद्बुद्धेरपि[4] शशविषाणादावपि[5] व्यभिचारादवस्तुत्वं प्रसज्यते । भावबुद्धिरभावान्निवर्तते भावाभावयोः परस्परविरोधात् । अथ (यथा) सद्बुद्धिः सत्तां[6] ज्ञापयति तथा घटादिबुद्धिरपीन्द्रियजन्यत्वाविशेषादनुवृत्तिव्यावृत्तिप्रत्ययग्राह्यत्वाच्च[7]। अवान्तरसामान्यमपि घटत्वगोत्वादि सर्वमभ्युपगन्तव्यम् । तथा च व्यक्तिः सामान्यस्य[8] तद्धर्मत्वात् । परमपरञ्च द्विविधं सामान्यम् । परं सत्तालक्षणम् । अपरं गोत्वादिलक्षणम् । नह्याश्रयस्य धर्मिणो भावोतदाश्रितस्य[9] सामान्यस्य वस्तुत्वमवकल्पते । सतो हि[10] भावः सत्ता । नहि सा निर्दुष्टा[11] स्वतन्त्रा नाम केन(चि)दिह घटाद्याश्रयनिरपेक्षा[12] चक्षुषा गृह्यते । सत्सु द्रव्येषु पृथिव्यादिषु[13] गृह्यमाणेषु तत्समवेता तदव्यतिरिक्ता सत्तापि गृह्यते । (अ)त एव सत्ता द्रव्यधर्मत्वादात्मा न भवति । तत्र सत्तैवात्मा इति (यत्) कैश्चिदुक्तम् (त)दपास्तं भवति । अत एव यदुक्तं केनापि चातुर्विध्याच्च प्रत्यक्षं न निग्राह्यं विपश्चिता[14] इति सत्ताया[15] एव ग्राहकं प्रत्यक्षमित्यभिप्रेत्य तस्य तदप्यपाकृतं[16]

---

१. प्रत्याक्षानु० परिछिद्यते । २. नात्रघ द्रढेति । ३. चारादेवस्तु० ४. संबुद्धेरपि । ५. ०विषणादावयि । ६. वरस्पर....सबुद्धि सत्तां । ७. ०बुद्धिरपीद्रियजत्वाविशेषादनवृत्तिव्यावृत्तिप्रत्ययग्रात्वत्वाच्च । ८. तथा च वाचव्यक्तिस्सामान्यस्य । ९. नह्वाश्रयस्य धर्मिणो.... । १०. सत्तो हि । ११. निषृष्टा । १२. ०टाघाश्रय० । १३. पृथिव्यादिसु । १४. आयुर्विधात् प्रत्यक्ष्यं न निद्धविपश्चितः । १५. सत्राया । १६. तदप्यपापकृतं ।

भवति। सतां हि भाव: सत्ता इति[1] पारतन्त्र्यव्यपदेशात्। न च घटादिबुद्धीनां घटत्वादाववान्तरसामान्ये तद्युक्तौ वा व्यभिचार:। कस्यां(चिद्)[2] व्यक्तौ विनष्टायां व्यक्त्यन्तराणामानन्त्याद् युगपदुच्छेदनानुपपत्ते:[3]।

स्वविषयव्यभिचारो हि बुद्धीनां दोषो विषये तु पटादौ नोत्पद्यत[4] इति किमत्राश्चर्यम्। नहि विषयेन्द्रियालोकसंस्कारसामर्थ्यतायां सत्यां[5] घटबुद्धि: कदाचित् कस्यचिन्नोत्पद्यते। किञ्च कार्यत्वाद् (घटत्व)बुद्धि: कारणमपेक्षते[6]। घटज्ञानस्य घट: कारणं नान्यदिति। यथा बीजाङ्कुर:[7] कारणं बीजमपेक्षते धूमश्चाग्निम् एवमन्यत्रापीति[8]। तस्मान्न व्यभिचारो[9] मिथ्याहेतुरिति दुरुपदेशोयम्। कस्तर्हि मिथ्याहेतु: कारणदोषाबाधकप्रत्ययो वा। तथा चोक्तम्[10]—

यस्य च दुष्टं करणं[11] यत्र च मिथ्येति प्रत्यय:
स एवासमीचीन: प्रत्ययो[12] नान्य:—इति।

तदेवमनुवृत्तिप्रत्ययात् सामान्यं सिद्धं व्यावृत्तिप्रत्ययाद्विशेष इति। सामान्यविशेषात्मकं वस्तु भिन्नाभिन्नरूपमिति स्थितम्। किञ्च सन् घट इति घटत्ववस्तुत्वे सामानाधिकरण्यं बुद्धौ नावकल्पते[13]। ननु तच्चेदमुदकमिति[14] मृगतृष्णिकायां सामानाधिकरण्यं दृश्यते[15]। तत्रापि विद्यमाना अभिमानिन[16]

---

१. भावस्सत्तेति। २. तद्युक्तौ वा व्यभिचार कस्यां०। ३. विनिष्टायां… युगपदुछेदेनानुपपत्ते। ४. नोत्पद्यंत इति। ५. नहि वियद्रियालोकमनस्कारसामर्थ्यां सत्यां। ६. कि च…कारणम ीक्षते। ७. कारणं न पदिभि यथा भपांकुर:। ८. ०वंमन्यत्नत्रापीनि। ९. ०न्नष्यभिचारो। १०. ०वाधकमप्र…तथो चोक्तम्। ११. करणो। १२. …चीनप्रत्ययो। १३. वुड्योर्नाव०। १४. ननु च्चेचेदमुदकमिति। १५. दश्यते। १६. विषमानाभिमानिन।

एत्र सामानाधिकरण्यबुद्धिरुत्पद्यते। यदा तु बाधकप्रत्ययो जायते मृगतृष्णिकेयमत्र नोदकमस्तीति तदा सामानाधिकरण्यबुद्धिरपैति। न चात्र बाधकप्रत्ययोस्तीति दृष्टान्तवैषम्यम्[1]। अतोपव्याख्यानमेतदिति स्थितम् ॥ १७ ॥

सतो भावो नास्तीति सामान्येनोक्तं तदिदानीं विशेषलक्षणेन निवारयितुमाह[2]—

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति[3] ॥१८॥

तुशब्दोवधारणार्थः[4]। अविनाशि तत्। न विनष्टुं शीलमस्येत्यविनाशि[5]। किं तत्। येन सर्वमिदं ततं व्याप्तम्[6]। स्वाभाविकेन परमात्मरूपेण क्षेत्रज्ञो[7] व्यपदिश्यत इति। कस्मादेवं[8] व्याख्यायते। तद्विनाशाशङ्कानिराकरणपरत्वादस्य प्रकरणस्य। नह्यत्र ब्रह्मोपासनमकस्मात्[9] प्रतिपाद्यते। ज्ञानस्वरूपस्योपासनं षष्ठे(ध्याये) विधा(प)यिष्यत इति जीवस्वरूपमेवेदानीं वक्तव्यम्। कस्मादविनाशीत्याह[10] विनाशमव्ययस्यास्य इति। व्ययो विनाशः। निरवयवत्वान्नास्य विनाशमीश्वरोपि कर्तुमर्हतीति ॥१८॥

यदि तर्ह्ययमविनाशी तत्कथं कुतो व्यपदेशः—विनष्टः पुरुष इति। अत आह[11]—

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।
विनाशिनोप्रमेयस्य तस्माद् युद्धयस्व भारत ॥१९॥

---

१ वाधकप्रत्ययोस्तित्तिदृष्टांतवैषम्यम्। २. तदिदांनीं''''आह०। ३. कमर्हत्तुति। ४. ''''शब्दोवधारणार्थ्यः। ५. अविनाश्यवतन्न विनष्टे शीलमस्येत्यविनासि। ६. व्यासं। ७. क्षेत्रज्ञौ। ८. त्कस्मादेव। ९. ०मकक्ष्मात्। १०. वक्तव्यकस्मादविना०। ११. यदि तर्ह्ययमविनाशं तत्किं कृमो व्यपदेशो विनष्टः पुरुष इति देकृत् इत्याह १८।

नित्यस्य शरी(रि)णोप्रमेयस्यान्तवन्तो विनाशिनो देहा उक्ता नित्यानित्यविभागविद्भिः[1]। अन्तवन्तो विनाशिन इति न पुनरुक्त(म्)। अन्तवन्त इत्यस्यार्थं[2] स्वयमेव भगवान् व्याचष्टे—विनाशिन इत्येके वर्णयन्ति।

अन्ये तु वदन्ति कस्यचिदन्तवत्त्वं[3] (न) भवति। यथा पृथिव्या गन्धस्तिरोभूतो नात्यन्तं विनष्टो[4] वृष्टिसंयोगादभिव्यज्यते तथा देहस्यान्तो भवेद् नात्यन्तं विनाश इति। तन्मा भूदिति विशिनष्टि—विनाशिन इति[5]। अस्मिन्नपि व्याख्यानेन्तवद्ग्रहणमतिरिक्तम्[6]। तदकृत्वा विनाशिन इत्येव वक्तव्यमभिप्रेताविनाशसिद्धेः।

अपरे तु पाठान्तरं कुर्वन्ति—अविनाशिनोप्रमेयस्य इति। तेषामपि नित्यस्याविनाशिन[7] इति पुनरुक्तम्। न तु पृथिव्यादिवदापेक्षिकं नित्यत्वं गौणं गृह्यते। अत्यन्तनित्यस्य मुख्यस्य नित्यशब्दार्थस्यासम्भवादविनाशिन[8] इत्युक्तेप्यापेक्षिकं किन्न गृह्यते। तस्य व्याख्यान्तरकरणं[9] व्यर्थम्। का[10] तर्हि गतिः। विनाशिनो[11] देहा इति प्रतिज्ञातम्। तत्रान्तवन्त इति[12] हेत्वभिधानार्थमन्तवद्ग्रहणं देशतः कालतश्च परिच्छिन्नत्वात् कूटादिवदिति[13] व्यतिरेकाद्धेतुवचनम् अप्रमेयस्येति। कस्मादात्मा नित्यः। अप्रमेयत्वाद्देशतः (कालतश्चेति) स स्वधर्मे प्रवर्त(ते) इति[14] भगवान् (आह)।

---

१. ०विभागवद्भिः। २. पुनरुक्त अंतवत इत्यस्यार्थं। ३. ०चिदंतवंत्त्वं। ४. नात्यंतं विनष्टो। ५. विनाशित इति। ६. ०नेंतवद्ग्रहणमति तदतद०। ७. अविशिनत०। ८. ०भवादनाशित०। ९. व्यावांतरकरणं। १०. किं। ११. विनाशो। १२. तत्रांतवत्वादिति। १३. ···परिछिन्नत्वादूटादि०। १४. रस्वधर्मे प्रवर्त इति।

ननु शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रं न प्रवर्तकम् । अत्रोच्यते—न साधु तात्पर्यं[1] भवता परामृष्टम् । युद्धं प्रक्रम्य शोकमोहापनयस्येदमेव प्रयोजनम् कथं नाम युद्धे प्रवर्तेतेति । इतरथा द्वारिकायां स्थित्वा गीताशास्त्रं प्रणयेत्[2] स्वधर्मपरित्यागेन ज्ञानमात्राद्यदि मोक्षोभिप्रेतोभविष्यत्[3] । इदानीं प्रणयनस्येदमेव प्रयोजनम्[4] अर्जुनस्यान्येषां च ज्ञानसहितात् स्वधर्मानुष्ठानान्निःश्रेयसमुपदेक्ष्यामीति[5] ॥१९॥

एवं[6] तावदविनाशित्वमात्मनः (प्र)तिपाद्य स्वयं च[7] मन्यसे हन्ताहमेषामिमे मया हन्यन्त इति तच्च मृषा[8] । कथम्—

य एनं वेत्ति[9] हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न (वि)जानीतो नायं हन्ति न हन्यते ॥२०॥

नभस इवास्य हननक्रियया विनाशः कर्त्तु[10] न शक्यते निरवयवत्वात् । सावयवस्यावयवविश्लेषादिना[11] शक्यते विनाशः सम्भावयितुम् । तस्मादुभावप्येतावज्ञौ[12] हन्ताहम् इति यो मन्यते यश्च हतोहम् इति (मन्यते च) ॥२०॥

इदं प्रतिज्ञामात्रेणोक्तम् । हेत्वपेक्षायां षण्णामपि भावविकाराणामात्मन्यभावादिति हेतुमाचष्टे[13]—

न जायते म्रियते[14] वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोयं[15] पुराणो न हन्यते हन्यमाने शरीरे ॥२१॥

---

१. साधुर्तत्पर्यं । २. प्रवर्तेते तीरथा द्वारीकायां स्थित्व गीताशास्त्रं मणयेत् । ३. ज्ञातमात्राद्यदि मोक्षामीमेतोभविष्यत् । ४. प्रणपतस्यैतव्य-प्रयोजनम् । ५. स्वधर्मातुष्टानान्नि० । ६. दावं । ७. स्वयश्च । ८. मन्यसे हंताहमेषामिति न क्षमन्यसें हंताहमेषामिति तच्च छ मृषा कथं १९ । ९. वेति । १०. कर्तु । ११. सावयुवस्यावपव० । १२. तस्मादुभवप्येतावज्ञो । १३. ''मात्रेणोत्त्क हेत्वपेक्षायां यस्मामपि भावविकाराणामात्मन्युभावा'''' । माचष्टे २० । १४. म्नियते । १५. शश्वतो ।

न जायत इति जन्मलक्षणो भावविकारः प्रतिषिध्यते। वाशब्दश्चार्थे। न चायं म्रियत इति विनाशलक्षणो[1] भावविकारः प्रतिषिध्यते। कथमेतत्। भूत्वा नायं न[2] भविता। भूयः पुनः। किं तर्हि[3]। भवितैव। भाविन्यपि काले सत्तां न हास्यतीत्यर्थः। वाशब्दादभूत्वा भावः प्रतिषिद्ध्यते। नायमभूत्वा[4] भवति। किं तर्हि। भूत्वैव भविता। भूतकालेपि सत्तां न जहावित्यर्थः[5]। भूतकालेपि सत्तां बभारेत्यर्थः। यस्त्वभूत्वा[6] भवति भूत्वा च न भवति स जन्मविनाशाभ्यां युज्यते यथा घटादिरिति। सत्तापि जन्मपूर्विका घटस्येवास्य नेष्यते। निरवधिकैवास्य सत्तेति[7] घटादि(भ्योस्य) वैलक्षण्यम्। उपसंहरति—अजो नित्य इति। जन्मविनाशप्रतिषेधेनैव मध्यवर्त्तिनो भावविकाराः प्रतिषिद्धा[8] भवन्ति। तथापि मन्दबुद्ध्यनुग्रहार्थं[9] स्वशब्देन प्रतिषेधति। शाश्वत इत्यपक्षयो निषिध्यते। स्वाङ्गापचयः साधनापचयो वास्य[10] नास्तीति। यथा कृष्णो राजा हस्त्यश्वादिभिर्वा हीन इति[11]। पुराण इति वृद्धिल(क्ष)णो भावविकारः प्रतिषिध्यते[12]। नायं शशिवत् कलाभिरुपचीयते[13]। न हन्यते हन्यमाने शरीर इति विपरिणामो निषिध्यते। विपरिणामोवस्थान्तरापत्तिः यथा शशस्य मांसावस्था।

अन्ये पुनरप्यन्यथा वर्णयन्ति—नायं भूतो भविता वा न भूय इति पाठान्तरं कृत्वा परब्रह्मोपासनमनया गीतया लक्ष्यते।

---

१. काशश्चार्थेन चायं स्तियते इति विना इति विनाश०। २. न न। ३. कि तर्हि। ४. नयमभूत्वा। ५. न हास्यतीत्यर्थः। ६. यो स्व भूत्वा। ७. सत्तेंति। ८. प्रतिविष्ट्वा। ९. मंदबुघनुग्रहार्थं। १०. इत्यपक्षया निषिद्धाते स्वांगायचपस्साधनापचयो वास्य। ११. यथा कृशो राजाहस्सक्ष्वादिभिर्वाहीन इति। १२. प्रतिषिद्यते। १३. कालभिरुप०।

नायं भूत इति च मृत्पिण्डवत्कारणत्वं निषिध्यते । भविता वा इति[1] घटा(दि)वदुत्पाद्यत्वं निषिद्ध्यते[2] । कार्यकारणभावो ब्रह्मण्यौपाधिको न पारमार्थिक[3] इत्युक्तं भवतीति । तदिदं श्रद्धामात्रेण[4] ब्रह्मोपासनमुत्प्रेक्षितं न श्रुतिलिङ्गप्रकरणगम्यम् । प्रकरणं हि यच्छोक-मुच्छोषणमिन्द्रियाणाम् इति पठनात्[5] तदपनोदनपरम्[6] । षड्भावविकारनिवृत्तिपराणि न जायत इत्यादीन्यक्षराणि । लिङ्गं सामर्थ्यमुच्यते । तच्च शब्दानां तावन्मात्रे पर्यवस्यति[7] । तन्नोपासनमाक्षिपति ।

अज्ञानमेव तावदिदानीं निरसनीयम्[8] । किमतित्वरया ब्रह्मोपासनं कल्प्यते । पाठान्तरकरणं चाहोपुरुषिकामात्रम् । ब्रह्मणो हि[9] जगत्कारणत्वं श्रुतिसिद्धम्—सदेव[10] सौम्ये-दम् इति । कार्यत्वं पुनर्न जायते इत्यनेनैव निषिध्यते[11] । तस्माद्यत्किञ्चिदेतदेवं तु पाठान्तरं कुर्वन्तोर्थान्तरं[12] स्वमतिपरि-कल्पितं वर्णयन्तो[13] बहवो व्याख्यातारोभियुक्ताश्चोच्यन्ते । उक्तञ्च—शीलदोषादगृह्णन्तं[14] लोकमाकुलीकुर्वन्ति इति वा ॥ २१ ॥

प्रतिज्ञातमर्थमविक्रियात्वादिभिः प्रत्याख्यायोपसंहरति[15]—

वेदाविनाशिनं नित्यं य एनमजमव्ययम्[16] ।
कथं स पुरुषः[17] पार्थ कं घातयति हन्ति कम् ॥२२॥

---

१. मविता वेति । २. तिषिद्ध्यते । ३. ब्रह्मरायोपाधिको न पारथिक । ४. श्रद्धामात्रैण । ५. मुछोकमुछोष्रणमिंद्रियाणामिति पटनात् । ६. पनोपरं । ७. पर्यवसति । ८. अज्ञानमेव तावदिदांनी निरसनीय । ९. हे । १०. सदेष । ११. निषिद्धं । १२. कुर्वतोर्थौंतर । १३. वर्णमंत्रो । १४. व्याख्यातारोमियुक्तौश्चरंतैरुक्तं....गृह्तं । १५. कुंर्वतीति ..मर्थवि....प्रत्याध्योपसंह्रति २१ । १६. पदानमज० । १७. कथ स पुरु.ः ।

वेद जानाति[1]। य एनमुक्तप्रकारकमात्मानमविनाशिनम्[2]। कथं केन प्रकारेण[3]। स पुरुषः। तं[4] क्षेत्रज्ञं कं[5] घातयति। उपायविशेषो हेतु कर्तृत्वं च निषिद्ध्यते। कथं वा हन्तीति स्वयं कर्तृत्वमपि पश्चान्निषिध्यते। नह्यविनाशी च यो भावोऽव्यभिचारादिना (स) स्वयमुद्यमेन (परकर्तृक)निपातनेन वा विनाशयितुं शक्यो[6] गगन(व)दिति।

अत्र क्लेशभीरवः केचित्[7] स्वमतं भगवत्यारोप्य वर्णयन्ति विदुषः सर्वकर्मप्रतिषेध एव प्रकरणार्थोऽभिप्रेतो भगवतः (इति)। हन्तिग्रहणमुदाहरणार्थम्[8]। यानि कर्माणि शास्त्रे विधीयन्ते[9] तान्यविदुषो विहितानीति[10] भगवतो निश्चय[11] इत्यत्राभिधीयते।

नहीदं पूर्वपदानुसन्धानरहितमभिप्रायवर्णनं[12] लक्ष्यते। कथं युद्धे प्रवृत्त्यर्थमात्म(नः) सत्त्वोपवर्णनमत्र[13] क्रियते। तस्माद्युद्धचस्व भारत इति तमभिधाय तत्सिद्धचर्थमेव जायत इति। आरम्भाद्यदि च सर्वकर्मत्याग एवाभिप्रेतः स्यादयं श्लोकोऽर्जुनाय न वक्तव्यः स्यात्। भगवतोक्तश्च षड्भावविकाररहित आत्मा। यदि विदुषः कर्मासम्भवं चेदस्तु[14]। तस्यापि तत्समानमित्यप्रवृत्तिरेव स्यात्। उत्तराश्च[15] गीताः सर्वा न संगच्छेरन्[16]। अतो नेयं मृषाशा[17] कर्तव्या।

---

१ ज्ञानाति। २. परानमुक्त०। ३. प्रकारण। ४. पुरूषस्तं। ५. कं। ६. हतीति स्वयं कर्तृत्वमया पश्चातिषिध्यतेनन्ह्यविनश्चये भावोभिचारादिना स्वहोद्यमनतिपातनेन वा विनाशयितु शक्यः। ७. केधित्०। ८. हंतिग्रहणानुदाहरणाथम्। ९. विधीयते। १०. तान्याविवदुष्येहितानीति। ११. निश्चित। १२. तहिदं पूर्वापदानुसंधातरहित०। १३. ....प्रवृत्त्यर्थमात्मसतत्त्वोपवर्णनमत्र। १४. श्लोकेर्जुनाय न वव्यस्याद्भगवतोक्तश्च .... रहितात्माविदो विदुषः कर्मासंभवश्चेदतु। १५. स्यादत्तराश्च १६. संगछेरन्। १७. सृष्टाशा।

स्वधर्मत्यागेनाकृष्टचेतसः सुखमासीना[1]मोक्षं लभेमहि इति। उत्तरत्र च ज्ञानकर्मसमुच्चयं न्यायतो निपुणतरमुपपादयिष्यामः[2] ॥२२॥

हननासम्भवादविनाशित्वमुक्तं तत्क(थ)मिवेत्याह[3]—

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि[4] संयाति नवानि देही॥२३॥

यथा जीर्णानां[5] कार्याक्षमाणां वस्त्राणां परित्यागस्तथा शरीराणाम्। अभिनवानां चोपादानम्। अन्यन्नवतरं कल्याणतरं रूपं कुरुते[6] इति च ब्राह्मणम् ॥२३॥

यानि च विनाशकारणानि शस्त्रादीनि[7] प्रसिद्धानि तान्यप्येनं (न) विनाशयन्तीत्याह[8]—

नैनं छिन्दन्ति[9] शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥२४॥

नैनं छिन्दन्ति शस्त्राणि असिप्रभृतीनि[10] निरवयवत्वादाकाशवत्। नैनम् अग्निर्भस्मीकरोति। नैनमापोवयवविश्लेषणाय[11] क्लेदयन्ति चर्मवत्। नैनं मारुतः शोषयति स्वेदापनयेन[12] ॥२४॥

तदस्याः प्रतिज्ञाया हेतुरुच्यते। यस्मादयं[13] छेदनाद्यर्हो न भवति। कथम्[14]—

अच्छेद्योयमदाह्योयमक्लेद्योशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलोयं सनातनः॥२५॥

नित्यत्वात् (सर्वगतः) सर्वगतत्वात् स्थाणुः स्थाणुत्वादचल इत्यक्षरयोजना[15]। सनातनश्चिरन्तनः। कुतश्चित्कारणान्नायं

१. स्वधर्मत्या०...चेतसत्सु०। २. न्यायनोनिपुणतरमुप०। ३. तत्किमिवेत्याह २२। ४. जीणीनन्यानि। ५. नीर्णानां। ६. कुरेते। ७. पानिचविनाशकाराणानिशास्त्रादीनि। ८. तान्यस्येनं विनशंयंतीत्याह २३। ९. छिंदंति। १०. ०प्रमृंतीति। ११. नेनमापोवषवविश्ले०। १२. स्नेहापेणं। १३. ....तुरुत्यते। तस्मादयं। १४. मवति कथम् २४। १५. ०क्षरायोजना।

निष्पन्नोभिनव[1] इत्यर्थः। नात्र पुनरुक्तदोषश्चोदनीयः। दुर्बोधत्वादात्मवस्तुनः पर्यायशब्दैः पुनः पुनस्तदेवोच्यते सुखप्रतिपत्तये ॥ २५ ॥

किञ्च[2]—

अव्यक्तोयमचिन्त्योयमविकार्योयमुच्यते।
तस्मादेवं वि(दि)त्वैनं नानुशोचितुमर्हसि[3] ॥२६॥

इन्द्रियागोचरत्वादव्यक्तोत एवाचिन्त्यः। य इन्द्रियगोचरो गवादिः स व्यक्तश्चिन्तनीयः[4]। यो हि व्यक्तः स विकार्यः। अयं त्वविकार्यः। तस्मादिति निगमनम्। स्वरूपतस्तावदात्मनोविनाशित्वं तथोक्तम्[5] ॥ २६ ॥

अथ शरीरेन्द्रियोपाधिविनाशाद्विनाशं[6] तदुत्पत्त्या चोत्पत्तिमात्मनो मन्यसे तथापि[7] शोको न युक्तः कर्तुमित्याह[8]—

अथ चैनं[9] (नित्यजातं) नित्यं वा मन्यसे[10] मृतम्।
तथापि त्वं महाबाहो नानुशोचितुमर्हसि[11] ॥२७॥

कस्मात्। औपाधिकयोर्जन्मनाशयोरपरिहार्यत्वात् तदाह[12]—

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येर्थे न त्वं शोचितुमर्हसि ॥२८॥

येन कर्मणा जन्मारम्भस्तस्य कर्मणः क्षये ध्रुवो भावी मृत्युः। मृतस्य[13] चावश्यं भावि शरीरग्रहणम्। शरीरान्तरारम्भकारणानामन्येषां[14] विद्यमानत्वात् पुनः शरीरं पुनः कर्मेति

---

१. निष्पन्नोभितव। २. किंच २५। ३. नानुशोचिन्नतुमर्हसि। ४. ''''चिंस० योंद्रियगोचरोगवादिस्म''''चिंततीयश्च। ५. तवोत्क्नम्। ६. शरीरैद्रियोपाधि०। ७. नथापि। ८. कर्तुमित्याह २६। ९. अथच्चैनं। १०. मत्यसे। ११. नानुशोचित्नुमर्हति। १२. कस्मादौयाधिकयोर्जुन्मनाशयोरपरिहार्य्यत्वान्नदाह २७। १३. जन्मारव्रंतस्य कर्मणः क्षेपे ध्रुव भावीमृत्युर्मृतस्य। १४. भाविशरीरग्रहणं तरीरांतरारंभकारणामन्येषां।

संसारचक्रस्यानादित्वात्[1] । एवं व्याख्यायमाने ध्रुवं जन्म मृतस्य (च) इति श्लोकार्थोवकल्पते[2] । नैरात्म्यवादिदर्शनाभ्युपगमेन व्याख्याने मृतस्य पुनर्जन्माभावादनुपपत्तिः स्यात्[3] ॥२८॥

इतश्च शोककरणमयुक्तम्[4]—

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत[5] ।
अव्यक्तनिधनान्येव[6] तत्र का परिदेवना ॥२९॥

अव्यक्तं पञ्चभूतानां सूक्ष्मावस्था प्रकृतिः तदादिर्येषां भूतानां तानीमानि अव्यक्तादीनि[7] । व्यक्तं मध्यं येषां तानि व्यक्तमध्यानि । व्यक्तं स्थूलावस्थोच्यते[8] । कारणे प्रचरत्वात् । अव्यक्ते निधनं विनाशः[9] प्रलयो येषां तान्यव्यक्तनिधनानि स्वकारणे प्रलीनानि कार्यकारणसंघातात्मकानि भूतानि । तत्र का परिदेवना[10] । शोकनिमित्तः[11] प्रलापः परिदेवनोच्यते ।

सत्कार्यवादिनां त्वौपनिषदानां सांख्यानां[12] च त्रिष्वपि कालेषु सर्वे भावाः सन्ति आविर्भावतिरोभावमात्रत्वादुत्पत्तिविनाशयोः[13]। यथा घटश्चूर्णरूपेण स्वकारणे विद्यमानः कुम्भकारव्यापारेणाविर्भवति मुद्गरादियोगेन[14] तिरोभूतः शक्त्यात्मना पुनरपि कारणं प्रविशति ।

अपरे त्वाहुः—अव्यक्तमदर्शनम् । तदादिर्येषां तान्यव्यक्तादीनि इति । अत्रोच्यते—यदि स्वदर्श(ना)भावोदर्शनं तस्याद्यन्तता[15] नोपपद्यते अभावस्य भावोत्पत्तिहेतुत्वनिराकरणात्[16] । कथ-

---

१. संसारनक्रुस्यानादि० । २. श्लोकार्थो० । ३. नैरात्म्यवादि···भावादसुपपत्ति स्यात् । ४. ···युक्तंम् २८ । ५. ष्यक्तमध्यानि भारन । ६. अव्यक्तनिधनानेव । ७. तानीमान्यव्यक्तादानि । ८. स्थुलावस्थोच्यते । ९. निधानंविनाश । १०. परिदेवता । ११. शोकनिमिन्नः । १२. स्वौपनिषदानां संस्यानां । १३. भावस्संत्याविवेतिरोभाव० । १४. स्वकारेण मुदरादियोगेन तिरोभूतः । १५. तस्यादिस्यंता । १६. भावोक्षत्ति हेतु० ।

मसतः सज्जायेत इति। तिरोहितं हि द्रव्यं द्रव्यान्तरस्योत्पादकम्। मृत्सुवर्णादौ अतिप्रसिद्धमेतल्लोके[1]। अथादर्शनमिन्द्रियागोचरत्वाद्व्यक्तमभिप्रेतं ततो नास्ति विसंवाद इति[2]। एवं तावदात्मनः स्वरूपाविनाशत्वान्न युक्तः शोकः कर्तुमित्युक्तम्[3] ॥ २९ ॥

दुर्विज्ञेयश्चायमात्मा यस्माद् भूतसंघाते[4] सत्युपलभ्यते त (स्माद्) एव बहवो मोमुह्यन्ते। केचिद् भूतचैतन्यं[5] प्रतिजानते व्यतिरिक्तमात्मानं[6] पश्यन्ति अपरे विज्ञानसन्तानं क्षणिकमिच्छन्तीति[7]। तदेतदत्र[8]—

आश्चर्य(व)त् पश्यति कश्चिदेन-[9]
माश्चर्यवद्वदति तथैवमन्यः।
आश्चर्यवच्चैनमन्यः[10] शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित् ॥३०॥

यथाश्चर्यमद्भुतं[11] कश्चित् कदाचित् पश्यति तद्वदेनमात्मानं तथाश्चर्यम् इव(पश्यति कश्चित्)। यदैनं[12] कश्चिद्वदति रूपादिरहितममूर्तं स्वसंवेद्यं चेतनस्वभावमाश्चर्यमिव कश्चिदेनं[13] शृणोति। आत्मश्रवणपराङ्मुख एव हि प्रायेण जन्तुः[14]। श्रुत्वाप्येनं न च वेद कश्चित्। तदप्याश्चर्यमेवेति[15]। तस्मादात्मतत्त्वमुक्तलक्षणं[16] सम्यगवधार्यं तन्न विस्मरणीयमित्यभिप्रायः।

केचिदस्य श्लोकस्यार्थं[17] स्वमतिकल्पनया वर्णयन्ति—

---

१. निहतं...द्रव्यातरस्योत्पादकं मृत्सुवर्णादीन्यति०। २. ···दर्शनमिंद्रिषागोचर०। ३. तावदात्मनरूपाविनाशत्वान्न युक्तःशोकर्तुमित्युक्तं। ४. ···संषाते। ५. वहोवो० केनिद्भूत०। ६. ····मात्मां न। ७. क्षणिकमिच्छति। ८. तदेतत्र २९। ९. कश्चदेनं। १०. च्चैनमभ्यः। ११. यथाश्चर्यमभ्दुतं। १२. तथश्चर्य०। १३. यदेनं···वदतिं···ममूर्तं स्वसंर्वधं····कश्चिदोनं। १४. प्रापेण जः तः। १५. त च कंश्चिन्नदप्याश्चर्य०। १६. तस्मादात्मतत्त्यमु०। १७. केविदस्य श्लोकस्यार्थं।

आत्मा वारे द्रष्टव्यः श्रोतव्य इत्यस्याः श्रुतेरर्थः प्रतिनिर्दिश्यत[1] इति। तदेतद् व्याख्यानं श्रोत्रियेष्वेव शोभते[2]। नहि तदर्थप्रत्यभिज्ञानमिह[3] विद्यते। विधिप्रत्ययस्तत्र श्रूयते। वर्तमानोपदेशश्चायम्[4]। न च तत्राश्चर्यवद् द्रष्टव्य[5] इत्यर्थोभिधीयते। न चाक्षरमात्र(सा)दृश्यात् प्रदेशान्तरगतोर्थः शक्यः कल्पयितुम्[6]। न च प्रकृतार्थोपयोगित्वमस्याः[7] कल्पनायाः। किञ्च—

श्रवणायापि बहुभिर्यो न लभ्यः
शृण्वन्तोपि बहवो यं न विद्युः[8]।
आश्चर्यो वक्ता कुशलोस्य लब्धा[9]
आश्चर्यो ध्याता कुशलोनुशिष्टः[10] ॥

इत्यस्य मन्त्रस्य योर्थः सोत्र कथ्यते ॥३०॥

दुर्लभोयमात्मोपदेश इति वर्णयितुमथेदानीं प्रकरणार्थोपसंहारः क्रियते[11]—

देही नित्यमवध्योयं[12] देही सर्वस्य भारत।
तस्मात् सर्वाणि[13] भूतानि नानुशोचितुमर्हसि ॥३१॥

यत एवं तस्माद् भीष्मादीन् अनुचिन्त्य[14] न त्वं शोचितुमर्हसि ॥३१॥

आत्मविषयमनात्मधर्मपरिकल्पितमपनीय[15] अशोच्यान्—

---

१. श्रुतेरर्थोप्रतिनिदेश्यते। २. तदेदतध्याख्यानं श्रोत्रियेधेव शोमते। ३.""प्रतिभिजान०। ४. वर्तमानापदेशश्चायं। ५. दुष्टव्यं। ६. चाक्षरमात्रदश्यात्."' काल्पयितुं। ७. प्रकृतार्थैपयोगित्वमस्याः। ८. शृंरावतो वहवोपं न विधुः। ९. लधा। १०. आश्चार्यो ताता कुशलेनानुशिष्ट इति। ११. दुलभो''' वर्णयितुं अथेदाना प्रकरणाथोपसंहारः क्रियते ३०। १२. नित्यमवध्योय। १३. तस्मा सर्वाणि। १४. तस्माद्धीष्मादिनि अनुचिंत्य। १५. परिकल्पत।

इत्यादि यदुक्तं तदुपसंहृतम् । अधुना[1] धर्मविषयमधर्माध्यारोपणम् । तन्निरासाय प्रज्ञावादांश्च इत्युक्तं (यत्) तत्प्रस्तूयते[2]—

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोन्यत्[3] क्षत्रियस्य न विद्यते ॥३२॥

धर्मादनपेतं[4] धर्म्यं युद्धम् । ततोन्यन्न[5] विद्यते श्रेयस्करम् । क्षत्रियग्रहणं प्रदर्शनार्थम्[6] । अन्येषामपि स्वधर्मानुष्ठानं[7] श्रेयस्करम्[8] । तदनेन[9] प्रकारेण श्रेयस्करे ज्ञानं कर्म च समुच्चिनोति[10] ॥३२॥

इतश्च युद्धं कर्तव्यम्[11]—

यदृच्छया चोपपन्नं[12] स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते[13] युद्धमीदृशम् ॥३३॥

अयत्नोपनीतं स्वर्गस्य द्वारमपावृतम् उद्घाटितम् । सुखिनः सुखभागिनो हि लभन्ते युद्धमीदृशं नेतरे[14] । अथवा किं सुखिनः क्लेशभीरवो लभन्ते । मन्दभाग्या इत्यभिप्रायः ॥३३॥

यदि चेत्थं कर्तव्यं प्राप्तम्[15]—

अथ चेत्त्वमिमं धर्म्यं[16] संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं[17] च हित्वा पापमवाप्स्यसि ॥३४॥

ततः स्वधर्मं कीर्तिं[18] च महादेवादियुद्धनिमित्तां[19] हित्वा पापं प्रतिपद्यसे ॥३४॥

---

१. ०याशोच्यामित्यादि ···संदतमधुना । २. तत्मस्ते ३१ । ३. युद्राछ्रेषो० । ४. ०दनेपते । ५. ततोन्यत्र । ६. प्रद्रर्शनार्थम् । ७. ०मातुष्रातं । ८. श्रयस्करं । ९ तद्रतेन । १०. समश्चिनोति । ११. कर्तव्य ३१ । १२. यदछया चोपपन्न । १३. क्षत्रियाः पार्थ लभंतो । १४. अयत्नीपनंतं ०मुद्वाटितं सुखिनस्सुवाभागिवो हि लभंते··· । नेनरे । १५. चेत्यं कर्तव्यं प्रातम् ३३ । १६. अथ चेत्त्वं धर्म्यमिम । १७. स्वधर्मकिर्ति । १८. कीर्ति । १९. ···निमितां ।

न केवलमेतावदेवेति शेषः[1]—

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्[2] ।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते[3] ॥३५॥

अव्ययां सन्ततां दीर्घकालामित्यर्थः । शौर्यादिभिश्च गुणैः संभावितस्याकीर्तिर्मरणादतिरिच्यते[4] । ततो मरणं वरमित्यर्थः[5] ॥३५॥

किञ्च[6]—

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां[7] च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥३६॥

कर्णादिभ्यो भयादुपरतं मंस्यन्ते[8] त्वामश्वत्थामप्रभृतयो महारथाः । बहुमतो बहुभिर्गुणैः धर्माशयस्त्वमञ्जसा[9] शूर इत्यादिभिः (गुणैः बहु)मतो यास्यसि लघुभावम् । तदपि कष्टतरम् ॥३६॥

किञ्च[10]—

अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः[11] ।
निन्दन्तस्तव[12] सामर्थ्यं ततो दुःखतरं नु किम् ॥३७॥

अहिताः शत्रवः । ततो दुःखतरं नु किम् । नु इति वितर्के । ततो नान्यद् दुःखतरमस्तीत्यर्थः ॥ ३७ ॥

युद्धे तु क्रियमाणे गुणा एवोभयत्रेत्याह[13]—

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्[14] ।
तस्मादुत्तिष्ठ[15] कौन्तेय[16] युद्धाय कृतनिश्चयः ॥ ३८ ॥

मोहं त्यक्त्वोत्तिष्ठ[17] । यद्वा (म)यावश्यं कर्तव्यं हि युद्धमित्येवं कृतनिश्चयः ॥ ३८ ॥

---

१. ...मेतावदेवशेषः ३३ । २. चपि .. कथयिष्यंति तेव्ययां । ३. कीर्तिंर्मरणा० । ४. संतंतां....गुनसंभावितस्यचा कीर्तिंर्मरणादतिरिच्यते । ५. मरणंवमित्यर्थः । ६. किंच ३५ । ७. येसां । ८. मन्यंते । ९. गुणै धर्माशय स्तमंजसः । १०. किंच ३६ । ११. तवाहिनाः । १२. तिदंतस्तव । १३. ...त्याह ३७ । १४. महीम् । १५. ०दुत्तिष्ट । १६. कौंतेय । १७. मोहं त्यत्कोत्तिष्ट ।

तत्र च युद्धप्रवृत्तस्य बुद्धिसाम्यमुपदेष्टुमाह[1]—

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥३९॥

सुखे हर्षो दुःखे विषादः[2]। तावकृत्वा। तयोः किन्निमित्तमित्याह[3]–लाभालाभौ (समौ कृत्वा) लाभे सुखमलाभे दुःखमुत्पद्यते। तयोः पुनः को हेतुरित्याह[4]–जयाजयौ। जये लाभो विपर्य(ये) अलाभ इति। (इ)दमुक्तं भवति–जयाजयावसंकल्पयन् युद्धाय घटस्वेति। एवं च स्वधर्मं कुर्वन्न पापं[5] प्रत्यवायम् अवाप्स्यसीति। तदेवोपसंहृतम्[6]। अन्यथा पापशङ्कानुपपत्तेरिह स्वधर्मं[7] कुर्वतो यत्पापं[8] भवति तन्निषिध्यते[9]। अथवा पापमिति संसारव्यसनम्। तन्नैवमवाप्स्यसि। ज्ञानकर्मसमुच्चयानुष्ठानम् एवमिति[10] व्यपदिश्यते साम्यपर्यन्तम् ॥३९॥

इदानीं ज्ञानप्रकरणमुपसंहरति कर्मण्युपायविशेषो वक्तव्य इति विभागज्ञापनाय[11]—

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं[12] प्रहास्यसि ॥४०॥

यद्यपि सांख्यशब्दः कापिलतन्त्रे रूढः[13] गुणपुरुषविवेकज्ञानं[14] यत्रोपदिश्यते तथापि तदिह न गृह्यते। न तत्सादृश्यादात्मयाथात्म्यविवेकः[15] सांख्यशब्देनात्र व्यपदिश्यते[16]। तद्विषया बुद्धिरुक्तेत्यर्थः। योगः कर्मानुष्ठानोपायः। फलसंकल्परहितत्वं[17] समत्वम्। कृतस्य क्रियमाणस्य वा (कर्मणः) ईश्वरार्पणमिति। त्वमिमां बुद्धिं[18] शृणु। तां विशिनष्टि श्रोतुश्चित्तसमाधानाय[19]।

---

१. युद्धप्रवृन्तस्य बुद्धिसाम्यमुपदेष्टमाह ३८। २. सुखहर्षो दुःखे विषादः। ३. किन्निमित्र०। ४. हितुरित्याह। ५. पाप। ६. ····संतृतम्। ७. पापा ···खधर्मं। ८. कुर्वतः पापं। ९. यन्निषिद्धते। १०. मेवेमिति। ११. ०णमुपसंदरतिं ···३९। १२. कर्मबंधं। १३. ०तंत्रेगूत। १४. ····वत्रेकनानं। १५. गृह्यतेतत्सादृश्यात्। १६. शब्देनात्र व्ययदिश्यते। १७. कल०। १८. वाद्रेश्वरायणामिति तयां बुद्धिं। १९. श्रोतुश्चितुसमा०।

यया बुद्धया युक्तः कर्मबन्धं कर्मैव बन्धः[1] कर्मानेकजन्मसञ्चितं प्रहास्यसि त्यक्ष्यसि ।

केचिदत्र साङ्ख्यशब्देनोद्गीथाद्युपासनानामतिमोक्षस्य सम्पदश्च विधायकं[2] शास्त्रमेतत्सर्वं व्यपदिश्यत इति ब्रुवते ।

अत्रोच्यते । तदेतदप्रस्तुतमनुपयोग्यमाकस्मिकमुपन्यस्तमिति नः प्रतिभाति । कुतः[3] । पुरुषविशेषविषयास्तूपासनासम्पदोतिमोक्षश्च[4] । न च ता आत्मोपासनाः । अत्र च शोकमोहाकुलितचेतसस्तदपनयनायात्मयाथात्म्यवर्णनार्थं[5] प्रकरणम् । एवञ्च क्वोद्गीथादयः क्वेदं[6] प्रकरणम् । न च साङ्ख्यशब्दः परिभाषया विनातिमोक्षादिषु वर्तत । तस्मात् पौर्वापर्यपर्यालोचनया[7] सम्बध्यमानो योर्थः स साङ्ख्यशब्दयोग्यो[8] व्याख्येयः । स चास्माभिरुक्त इति ।

योगशब्दोप्यत्र—समत्वं योग उच्यते—इत्युपसंहारवचनादनुष्ठानोपायवचनो[10] नान्यत्र योजनीय इति ॥ ४० ॥

बुद्धियुक्तस्य[11] कर्मणो गुणान्तरमुच्यते[12]—

नेहाभिक्रमनाशोस्ति[13] प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य[14] धर्मस्य त्रायते महतो भयात् ॥ ४१ ॥

अतिक्रामति संसारदुःखं येन बुद्धियुक्तेन[15] कर्मणा सोतिक्रमः । अभिक्रम इति केचित् पठन्ति[16] । अर्थस्तु स एव ।

---

१. बुध्या कर्मबंधं कर्मैबंधः । २. उद्‌गीथा द्युपासनान्यतिमोक्षास्संपदश्च धायकं । ३. कुत । ४. विषयास्तु उपासासंपदोतिमोक्षाश्च । ५. ···कुलितचितसस्तदपनपनायात्म याथात्म्य वर्णनार्थं । ६. क्वोद्गीथादयः केदं । ७. वर्तते···पूर्वंपर्यालोचनया । ८. सांख्यशव्दोयोग्योव्याख्येय । ९. स चस्माभिरुक्त इति । १०. इत्युषसंहारवचनादनुष्टानो पापवाचनो । ११. ···युक्षस्य । १२.···मुच्यते ४१ । १३. नेहातिक्रम० । १४. स्पल्पमप्यःय । १५. बुद्धियुक्तौन । १६. पवंति ।

नाशो निष्फलत्वम् । इह मोक्षमार्गवस्थाय क्रियमाणस्य[1] कर्मणो निष्फलत्वं नास्ति, यथा कृष्यादेरनेकान्तिकफलत्वं नापि चिकित्सककृतधर्मवत्[2] प्रत्यवायो विद्यते । प्रत्युत स्वल्पमपि यथाशक्त्यनुष्ठितस्य[3] धर्मस्य सम्बन्धि त्रायते[4] रक्षत्यनुष्ठातारं महतः संसारभयात् ॥ ४१ ॥

आत्मविषया कर्मविषया बुद्धिरेकैवैकफलत्वादिति दर्शयितुमाह[5]—

व्यवसायात्मिका बुद्धिरेकैव कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥४२॥

समुच्चिताभ्यां[6] ज्ञानकर्मभ्यामपवर्गोवाप्यते यथाग्नेयादिभिरितरेतरं युक्तैर्यागैः स्वर्गः[7] । सा चेयं व्यवसायात्मिका बुद्धिरेका । अव्यवसायिनां तु केवलकर्मिणां केवलज्ञानवादिनां च कर्माकरणे प्रयतमानानां बहुशाखा[8] बहुप्रभेदा असङ्ख्येयाश्च बुद्धयो भवन्ति ॥ ४२ ॥

तत्र केवलकर्मिणोधिकृत्याह[9]—

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥४३॥

यामिमां वक्ष्यमाणां पुष्पितां फलप्रसवित्रीं[10] वाक्यलक्षणां वाचमनात्मविदो विपश्चितो वेदवाक्येषु—अग्निहोत्रं जुहुयात्स्वर्गकामः—इत्यादिषु रताः कर्मणा निरतिशयसुखं स्वर्गशब्द-

---

१. क्रियमाणस्य । २. ···कृताहर्मवत्प्रत्युवायो । ३. यथाशक्तनुष्ठितस्य । ४. नायते । ५. दर्शयितुमाह ४२ । ६. समुश्रिताभ्याम् । ७. युक्तैर्यागस्वर्गः । ८. बहुणरवा । ९. ···कर्मिणौधिकृत्याह ४३ । १०. ···सवित्री ।

वाच्यं[1] प्राप्यते। ततोन्यदपवर्गाख्यं सुखं नास्तीति[2] वादिनो वदनशीलाश्च (प्रवदन्ति) ॥४३॥

इतः—

कामात्मानः[3] स्वर्गपरा जन्मकर्मफलप्रदाम्।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४४ ॥

अप्राप्तस्य प्राप्तीच्छा कामः। तदनुरक्तचेतस इत्यर्थः[4]। स्वर्गः परः पुरुषार्थो येषां ते स्वर्गपराः स्वर्गप्रधानाः। जन्मकर्मफलप्रदाम्। कर्मणः फलं कर्मफलम्। जन्मयुक्तं कर्मफलं प्रददातीति जन्मकर्मफलप्रदाम्। वाचमित्यधिक्रियते। पुनरपि किंविशिष्टाम्। क्रियाविशेषबहुलाम्। क्रियाणां विशेषा (अ)तिबहुला बहुप्रकारा यस्यां वाचि ताम्। किं[5] प्रति प्रवृत्तामित्याह—भोगैश्वर्यगतिं प्रति। भोगश्चैश्वर्यश्च[6] तयोर्गतिः प्राप्तिस्तामुद्दिश्य[7]। भोगः सुखवेदना। (अह)मेषां पतिः स्वामीति यत्राभिमानो जायते तदैश्वर्यम्। अथवा गतेरेवोभयं[8] विशेषणम्। कीदृशगतिं[9] प्रति। जन्मकर्मफलप्रदां क्रियाविशेषबहुलां प्रति। पुष्पितां वाचं (प्र)तीत्यर्थः॥ ४४ ॥

तेषां चैवं वदताम्[10]—

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्[11]।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥४५॥

तया पूर्वोक्तया वाचापहृतविवेकज्ञानानां[12] (ज्ञान)कर्मसमुच्चयलक्षणा व्यवसायात्मिका[13] बुद्धिः (समाधौ)। समाधीयतेस्मिन्

---

१. सुखं गशब्द वाच्यं प्राप्येते। २. ···न्यदय वर्गाख्यसुखं नास्तिति। ३. ···शीलाः चेत कामा०। ४. प्राप्तेछा कामंस्तदनुरक्वेतस इत्यर्थः। ५. विशोषाति···वाचितो किं। ६. गतं भोगश्चैर्यं। ७. तामुदिश्य। ८. कीदशं गतिं। ९. गते वोभयं। १०. वदतां ४५। ११. तयापहतचेतसां। १२. ···पतृतविवेकज्ञानाना। १३. व्यत्सायात्मिका वुद्धिः।

चित्तमिति[१] समाधिरात्मा । तस्मिन्नात्मनि न विधीयते न सम्भवतीत्यर्थः । अथवा समाधानं समाधिस्तद्विषया बुद्धिः ।

अपरे पुनर्युक्तं व्याख्यानमननुसरन्तस्तत्प्रतिमानं कल्पयन्तो वदन्ति । सर्वेषां किल कर्मकाण्डगतानां वाक्यानां हि (द्वि)विधं फलमन्वयनिबन्धनं तात्पर्यसमधिगम्यं च[२] । तत्रान्वयिकं स्वर्गब्रह्मवर्चसादिफलमन्वयनिबन्धनम् । शमदमादिहेतुतयानुष्ठातॄणां व्यवसायात्मिकायां बुद्धौ योग्यतापादनं तत्रान्वयफलमेव स्वर्गादि ये वदन्त्यविपश्चितस्ते तात्पर्यफलमजानन्त इति योजयन्ति[३] ।

अत्राभिधीयते । तदेतच्छब्दप्रमाणबाह्यं पुरुषबुद्धिप्रभवं न्यायविद्भ्यो[४] नातिरोचते । नहि स्वर्गकामो यजेत--इत्यस्य वाक्यस्य द्वावर्थौ[५]—तत्र यागेन स्वर्गं प्राप्नुयादित्ययमेवैकोऽर्थो विधीयते[६] । पदार्थसंसर्गो हि वाक्यार्थः । न पुनर्यागानुष्ठानेन[७] ज्ञानयोग्यतां कुर्यादिति[८] कस्यचित्पदस्य तात्पर्यो दृश्यते[९] । पदार्थपूर्वकश्च वाक्यार्थो ज्ञाने निमित्तमिति स्थितिः । न च पुरुषेच्छावशाद्[१०] वाक्यस्य शक्तिर्जायते । फले श्रूयमाणे समाप्तत्वाद् निराकाङ्क्षं[११] वाक्यं नार्थान्तरमाक्षिपति । ये हि श्रूयमाणमर्थमनादृत्य[१२] वाक्यस्यार्थान्तरं कल्पयन्ति[१३] त एव सुतरामविपश्चितो न मीमांसका[१४] ये शब्दप्रमाणवृत्तं[१५] ब्रुवते शमदमादयो यागानुष्ठानसाध्या इति[१६] । किं तर्हि । शान्तो दान्त उपरतः[१७]

---

१. समाधीयेतस्मिश्चिन्नमिति । २. ०निबंधनं तात्पर्यं समाधिराम्यं च तत्रान्वियकं । ३. तौतात्पर्यफलमजामंतः इनि योजयंति । ४. न्यायविम्द्योतेरुरोवच्यते । ५. द्वावर्थो । ६. प्राप्नुयदित्ययमेवैकोथो विधियते । ७. संसर्गे··· यागानुष्टानेन । ८. कुपीदिति । ९. त्पायारो दश्यते । १०. पुरुषेछुवशाद्वाक्यस्य । ११. ···न्निराकाद्दयं । १२. श्रूयमाणमर्थनामनादत्य । १३. कल्पनीयंति । १४. मीमो एका । १५. शाब्द० । १६. समदमादयगानुष्टानसाध्याः । १७. शांता दांता उपरत ।

इत्यादिवचनगम्याः संसारदोषदर्शनेन चित्तवृत्तिनिरोधात् साधनाग्रन्थगौरवभयादुपरम्यते[1] । प्रतिश्लोकञ्चैवमन्ये चान्ये व्याख्यातारो पूर्वमर्थमुत्प्रेक्षमाणा[2] आहोपुरुषिकां लोके प्रथयन्ति। तत्र यत्प्रामाण्यवृत्तमुक्तं तदत्रभवन्तो विदाङ्कुर्वन्तु[3] ।

आत्मज्ञानेन तु नित्यकर्मणां समुच्चयो[4] वचनान्तरेण—तमेवं वेदानुवच(ने)न—इति, नियतस्य तु संन्यासः कर्मणो[5] नोपपद्यते—इति च त्यागप्रतिषेधात्तेषामेवात्मनाम्[6] ॥ ४५ ॥

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो[7] निर्योगक्षेम आत्मवान् ॥४६॥

त्रयाणां सत्त्वरजस्तमसां गुणानां कर्म त(त्) त्रैगुण्यम्। स विषयः प्रकाशयितव्यो[8] येषां वेदानां ते त्रैगुण्यविषयाः। गुणानां च संसारप्रवर्तनं कर्म। तद्विषया वेदाः। तत्र सत्त्वमुपसर्जनम्। रजस्तमसी तूत्कटे[9] । ताभ्यां वशीकृतः पुरुष इहामुत्रफलेषु कर्मसु प्रवर्तमानः संसारचक्रं नातिवर्तत इति तात्पर्यार्थः[10]। त्वं तु[11] निस्त्रैगुण्यो भव। त्रैगुण्यमतिवर्तस्व। कथम्। निर्द्वन्द्वः नित्यसत्त्वस्थः[12]। कामक्रोधौ[13] रागद्वेषौ सुखदुःखे शीतोष्णे[14] इति द्वन्द्वानि[15] तानि सहस्वेत्यर्थः। सत्त्वगुणस्थो भूत्वा धैर्यमवलम्ब्य। निर्योगक्षेमश्च। अप्राप्तस्य स्वीकरणं योगः प्राप्तस्य परि(रक्षणं) क्षेमः। तयोर्यतमानस्य[16] न व्यवसायात्मिका[17] बुद्धिः। आत्मवानप्रमत्त इत्यर्थः[18] ॥ ४६ ॥

---

१. चिन्नवृत्तिनिरोधात् साधतदति ग्रंथगौरवभयादुपम्यते। २. पूर्वमथनमुत्प्रेक्षमाणा। ३. प्रमाणवृन्तमुक्तं तंत्रभवंतो विदांकुर्वंतु। ४. समुच्चये। ५. कर्मणा। ६. मेवमात्मनाम् ४६। ७. निर्द्वंष्ट्वो···सत्वस्थो। ८. प्रकाशयितत्यो। ९. रजस्तमसोतूत्काटे। १०. तत्पर्यार्थः। ११. त्वं मुनिस्त्रैगुण्यो भव। १२. नित्त्यसत्त्यस्थः। १३. क्रोधो। १४. ···शीतोस्मे। १५. द्वंद्वानि। १६. तषोर्यतमानस्य। १७. नव्यस्तयात्मिका बुद्धिः। १८. आत्मवान प्रमन्नमन्न इत्यर्थः ४७।

न च त्रैगुण्यविषयेषु वेदेष्वध्ययनश्रवणव्याख्यानादिपरेण त्वया कृत्स्नमायुः पर्युपयोक्तव्यम्[1]। किं कारणमित्याह—

यावदर्थ उदपाने सर्वतः संप्लुतोदके।
तावान् सर्वेषु वेदे(षु) ब्राह्मणस्य विजानतः ॥४७॥

कूपतडागादौ यावानर्थः स्नानपानादिः[2] पुरुषस्य तावानर्थः सलिलपूर्णे देशे प्रावृट्समये[3] नाधिको विद्यते। यथायं दृष्टान्तस्तथा[4] ज्ञानकर्मसमुच्चयप्रतिपादनपरे वेदभागे[5] यावानर्थस्तावानेकाहाहीनसत्रप्रतिपादके[6] कृत्स्नवेदे। अतः काम्यकर्माभियोगं[7] विहाय ज्ञानकर्मनित्यकर्मप्रतिपादनपरभागेभियोगवता भवितव्यमिति।

अपरेषां व्याख्या—यावानर्थः सर्वतः संप्लुतोदके तावानुदपाने तत्कार्यं तत्रैवान्तर्भवतीत्यर्थः[8]। तथा विजानतः संन्यासिनो ज्ञाने सर्वतः संप्लुतोदकस्थानीये(षु[9]) सर्वेषु वेदेषु तावानर्थः। तत्रैव समस्तकर्मप्रयोजनमन्तर्भवतीत्यर्थ[10] इति।

तदस्मिन् व्याख्याने[11] यदि ज्ञानमाहात्म्यं तदानीमभ्यनुज्ञातं ज्ञानस्यैतन्माहात्म्यं यत्कामात्मनां[12] कर्म संसारहेतुर्भवति तदात्मीयस्वभावं विहाय तत्सम्पर्कादुत्कर्षहेतुत्वं[13] प्रतिपद्यते। यथा रसस्पृष्टताम्रवर्णता[14] सुवर्णतां प्रतिपद्यते। रसोपि ताम्रसम्पर्कात् पुरुषार्थसाधनम्[15]। एवमन्योन्यसमुच्चितमपवर्गार्थमित्युक्तम्[16]। तथा च वसिष्ठेनोक्तम्[17]—

---

१. पर्यपयो क्तव्यं। २. ...तादुकोदौपावर्थस्न्नानयानादिः। ३. प्रावृट समये। ४. यथां यं वृष्टांतात्तथा। ५. ···पादनं परे वेटभाग। ६. ···सत्त··· प्रतिपादके। ७. कास्यकर्म०। ८. यावनर्थस्सर्वतस्संस्तुदके तावानुदयानेतत्कार्यं तेत्रैवांतर्भवति। ९. संस्तुतोदक०। १० प्रयोजनमंतर्भवतित्यर्थः। ११. व्याख्याते। १२. कामात्मंनां। १३. ···संयार्कादुत्कषहेतुत्वं। १४. रसस्पृष्टं ताम्रवर्णता। १५. ···संपार्कात्पुरुषार्थसाधतम्। १६. ···समुश्चितमप०। १७. वसिष्टेनोक्तम्।

यथान्नं मधुसंयुक्तं मधु चान्नेन संयुतम्[1]।
एवं तपश्च विद्या च संयुक्ता भेषजं महत् ॥ इति ।

अथैतद्व्याख्याने[2] कर्म निष्प्रयोजनं वक्तव्यम्[3]। ज्ञानादेव केवलादपवर्ग इत्यभिप्रायेण । तदसदित्युच्यते[4]। शाब्दप्रमाण-बाह्यत्वादस्यार्थस्येत्युक्तम्, अन्यत्र[5] च निपुणतरं वक्ष्यते। ब्राह्मण-स्येति च सामान्यश्रवणं न संन्यासिन इति विशिष्टम्। तस्मात् सर्वाश्रमाणां सर्वद्विजानां च मुक्तिः । तथा च जनकादयः स्मर्यन्ते । तस्माद् व्यवसायात्मिकायां[6] बुद्धौ स्थातव्यमिति स्थितम् ॥ ४७ ॥

तत्र यदुक्तम्—योगे त्विमाम्—इति कोसौ योग इत्याह[7]—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि ॥ ४८ ॥

स्वाश्रमविहितेषु कर्मस्वधिकारः। फलेषु चानधिकारः[8]। मेति(शब्दः) प्रतिषेधवाची। नास्त्यधिकारः[9]। कर्मण्येवेत्येव-कारः फलव्यवच्छेदार्थो न ज्ञानव्यवच्छेदार्थः[10]। तस्य - एषा तेभिहिता - इत्याद्युपदिष्टत्वात्[11]। ननु कर्मण्ये(व)कारः फलव्यवच्छेदार्थो[12] न पुरुषस्याधिकारे स्वव्यापारत्वात्[13]। फलं हि क्रियासाध्यम्। न तत्रापि प्रसक्तोसौ येन प्रतिषिध्येत इत्याशङ्क्याह[14]—मा ते संगोस्त्वकर्मणि ॥ ४८ ॥

---

१. संयुतं। २. अथैतद्यारत्यानं। ३. निष्पयोजनं वक्रव्यं। ४. तदानमृष्यते। ५. ···०मन्नरत्र। ६. ···स्मंर्यते तस्मादवस्थायात्मिकां। ७. इत्याह ४९। ८. फले सुधातिकारो। ९. नात्स्यधिकारः। १०. कर्मण्येद्येत्येवकारः फल-व्यवछेदार्थो न ज्ञानव्यवछेदार्थः। ११. ···हितोत्युपदिष्ट०। १२. ···व्यवछे-द्यर्थो व। १३. ···कारस्वत्यापारत्वात्। १४. प्रसक्तो येन प्रतिसिद्धते इत्याद्य-क्याह।

अकरणे सक्तिर्न कर्तव्या । कथं तर्हि कर्तव्या इत्याह[1]—

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते[2] ॥४९॥

यानि नित्यानि कर्माणि संध्याराधनसंग्रामादीनि[3] तानि योगस्थः[4] कुरु । फलसङ्गं त्यक्त्वा । फलसङ्गेन हि क्रियमाणे[5] कर्मणि सिद्ध्यसिद्ध्योर्वैषम्यम्[6] । सिद्धौ हर्षः फलासिद्धौ विषाद इति । ईश्वराराधनार्थे[7] तु क्रियमाणे नास्ति वैषम्यम् । स एव[8] कर्ता । तदात्मकं च कर्मेति क्रियमाणं तत्सि(द्धि)हेतुत्वं प्रतिपद्यत इत्यर्थः । तदिदं समत्वं योग उच्यते ॥ ४९ ॥

समत्वबुद्धित्वादस्मात्[9] कर्मणः केवलम्[10]—

दूरेण ह्यवरं[11] कर्म बुद्धियोगाद्धनञ्जय[12] ।
बुद्धौ शरणमन्विच्छ[13] कृपणाः फलहेतवः ॥५०॥

हि-शब्दो हेतौ । ज्ञानरहितं कर्म दूरेणातिविप्रकर्षेणावरं[14] जघन्यम् । युज्यत इति योगः कर्म । बुद्धियुक्तात् कर्मणः सकाशादित्यर्थः । यत एवं[15] तस्माद् बुद्धौ[16] शरणमन्विच्छ बुद्धिमाश्रयेत्यर्थः[17] । कर्मप्रवृत्तिकाले[18] । (यतः कृपणाः फल)हेतवः । केवलं कर्मणः फलं प्रवृत्तिहेतुर्येषां[19] ते फलहेतवः[20] ॥ ५० ॥

बुद्धियुक्तः कुर्वन्नेव[21] किन्तु फलं प्राप्नोतीति तदुच्यते—

बुद्धियुक्तो जहातीमे उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥५१॥

---

१. कर्तव्यानीत्याह ४९ । २. सिद्धासिःधोस्समोभूत्वा समत्व योग उच्यते । ३. ···सग्रामादीनि । ४. योगस्यः । ५. क्रिसमाणे । ६. कर्म्राणिसिद्धांसिद्धेवैंषभ्यम् । ७. इश्वरागुधनार्थों । ८. राव । ९. त्वबुद्धित्त्कादः० । १०. केवलं ५० । ११. रेणत्ह्यवरं । १२. घनंजप । १३. ···न्विछ । १४. द्वरेणतिप्रकर्षे० । १५. रावं । १६. वद्धौ । १७. न्विछवुद्धमाश्रय० । १८. कर्मनिवृत्तकाले । १९. येयां । २०. फलदेवत ५१ । २१. कुवन्नेव ।

ईश्वराराधनार्थं[1] कर्मेत्यनया बुद्ध्या युक्तः कर्म कुर्वन् परित्यजत्यनारब्धफले जन्मान्तरकृते[2] शुभाशुभकर्मणी। ये त्वारब्धफले तयोर्भोगेनैव क्षयः[3]। अस्मिन् शरीरे तयोर्भोगरूपेण[4] परिणतत्वात्। तथा च श्रुतिः—तस्य तावदेव चिरं याव(दस्माच्छरीरा)न्न विमोक्ष्यतेथ सम्पत्स्यत इति। यावदस्माच्छरीरान्न विमोक्ष्यते[5] तावदस्य विदुषश्चिरमित्यवधिकरणात्। तस्मात् समत्वयोगाय[6] युज्यस्व। कः पुनर्योगः। (योगः) कर्मसु कौशलम्। इदं तावद् ब्रह्मणि[7] समर्पणं कर्मणः फलसङ्कल्परहितता च ॥ ५१ ॥

किं पुनरेवं कृते स्यात्[8]—

कर्मजं[9] बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः[10]।
जन्मबन्धविनिर्मुक्ताः[11] पदं गच्छन्त्यनामयम्[12] ॥ ५२ ॥

शुभेतरकर्मजं फलं त्यक्त्वा[13] मनीषिणो मनस ईषिणो[14] ब्रह्मभावापादितमनोवृत्तयो[15] जन्मैव बन्धस्ततो विनिर्मुक्ताः[16] पदं विष्णोः स्थानं गच्छन्त्यनामयं सर्वोपद्रवरहितम् ॥ ५२ ॥

कदा पुनरेवं क्रमस्त्वं शुद्धतरबुद्धिर्निर्वेदं प्रतिपद्यसे। तदाह[17]—

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥५३॥

---

१. इश्वराराधनार्थं। २. ···नारब्रकले जन्मांतरकृते। ३. भोगेनेव क्षया। ४. तयाभोगरूपेण। ५. यावदस्माछरीरान्न विमोद्यत। ६. समत्वं योगाय। ७. तद्यद्वद्नणि। ८. पुनरवेंकृते स्यात् ५२। ९. कर्मज। १०. त्यक्का मनिषिणः। ११. अन्मबंधविनिमुक्ताः। १२. गंछत्यना०। १३. त्यक्का। १४. इषिणो। १५. ···वृतयी। १६. ···मुक्तः। १७. ···पुनरेवंकमः स्त्वंतरबुद्धिनिर्वेदं प्रतिपद्यने तदाह ५३।

कलिलं गहनमुच्यते । तथा चाभिधानकोशे—कलिलं गहनं विदुः—इति । मोह एव कलिलम् । मोहः अज्ञानम् । एतदुक्तं भवति—अज्ञानं दुर्गं यदा व्यतिक्रमिष्यसि तदा गन्तासि निर्वेदं श्रोतव्यस्य[1] शास्त्रस्य श्रुतस्य च । तदा च मोहदुर्गं व्यतितीर्य ते बुद्धिः स्थिरमवस्थास्यत[2] इति ॥ ५३ ॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥५४॥

अचला इति पुनर्विवक्ष्यते[3] । तदा परमात्मयोगमवाप्स्यसि । ततः[4] पूर्वोक्तमुपपन्नम्—पदं गच्छन्त्यनामयम्—इति ॥ ५४ ॥

अनन्तरवृत्तेन श्लोकद्वयेन बुद्धेर्निश्चलत्वे प्रतिपादिते परमात्मनोभिमुखीकरणायावसरं लब्ध्वार्जुन उवाच[5]—

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत[6] किमासीत व्रजेत किम्[7] ॥५५॥

स्थितप्रज्ञः केन लक्षणेन भाष्यते व्यपदिश्यत इत्यर्थः । स च स्थि(त)धीः किं प्रभाषेत किमसौ वक्तीत्यर्थः[8] । किम्परो भूत्वासीतेत्यर्थः[9] । (अ)कर्मकत्वादस्य धातोरेवं[10] योज्यते । किं वा व्रजेत गच्छेत् प्राप्नुयादिति[11] । व्यत्ययेनात्मनेपदम् ॥ ५५ ॥

तत्र—का भाषा—इत्येतत्प्रथमं निरुच्यते[12]—

---

१. श्रुतव्यस्य । २. व्यतिधिरमवस्थास्यते । ३. विवक्ष्यते । ४. ततो । ५. अनंतरवृतेन श्लोकदयेन परमात्माभिमुखाया बुद्धेनिश्चलत्वे प्रतिपादिते वसरलघ्यातुर्न उवाच ५५ ॥ ६. प्रभासेत । ७. व्रजोत किम् । ८. वक्रत्यर्थः । ९. किं परा भूत्वासीतित्यर्थं । १०. ध्येतोरेवं । ११. व्रजेतराछेत्प्राप्नु० । १२. इत्यतत्प्र···निरुच्यते ५६ ।

श्रीभगवानुवाच—

ऐश्वर्यस्य स(म)ग्रस्य धर्मस्य (य)शसः श्रियः ।
वैराग्यस्याथ मोक्षस्य षण्णां[1] भग इति ध्वनिः ॥

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः[2] स्थितप्रज्ञस्तदोच्यते ॥५६॥

बाह्यार्थविषयान्[3] नानासङ्कल्पान् यदा त्यजति (तदा) बाह्यविषयसङ्कल्पाभावे कायं वर्तते[4]। केन तुष्टश्चरतीत्याह— आत्मन्येवानन्दस्वरूपेमोहितेनात्मनान्तःकरणेन[5] जन्ममरणजमोहादिविषादेन महौषधब्रह्मामृतपानास्वादजनितप्रेमप्रबन्धप्रतिबद्धनिश्चलवृत्तिना परितुष्टः[6] स्थितप्रज्ञस्तदोच्यते ।

यानीह स्थितप्रज्ञलक्षणानि वक्ष्यन्ते (तान्येव) साधनानि प्रयत्नतोनुष्ठेयानीति । नह्यननुष्ठीयमानानि सत्तां लभमानानि[7] लक्षणानि भवन्तीति । तत्र यदेतदुच्यते[8] पूर्वावस्थायां लक्षणम्[9]— इति तदनुपपन्नम् । तस्मिन्नेव काले साधनत्वं तस्मि(न्नेव च काले) लक्षण(त्व)म्—इति तदनुपपन्नम्[10] । (न) तस्मि(न्) यौगपद्यं साधनत्वलक्षणत्वयोः ॥ ५६ ॥

किंच—

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५७ ॥

---

१. षस्मां । २. आत्मनस्तुष्ट । ३. बाह्यार्थविषयान् । ४. त्कायं वर्तनः । ५. ०स्वरूपेमाहितेमात्मानांतकरणेन । ६. जन्मजमरणमहाराविषादेन महोषधी निश्चलबृत्तीनः परितुष्ट । ७. ···प्रपत्नतोनुष्टेपानि । नह्यनुष्टीयनि सत्तां लभधमानानि । ८. यत्त्वेतदुच्यते । ९. पूर्वावस्थायां वस्थायां । १०. तदनुपपन्नं ।

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यः स्थितप्रज्ञस्तदोच्यते ॥ ५९ ॥

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ६० ॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६१ ॥

तानि संयम्य मनसा युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६२ ॥

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
संगात् संजायते कामः कामात् क्रोधोऽभिजायते ॥ ६३ ॥

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६४ ॥

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६५ ॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६६ ॥

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ६७ ॥

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६८ ॥

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६९ ॥

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ७० ॥

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥७१॥

विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥ ७२ ॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेपि ब्रह्मनिर्वाणमृच्छति ॥ ७३ ॥

इति श्रीभगवद्भास्करकृते गीताभाष्ये
द्वितीयोध्यायः ॥

अथ तृतीयोध्याय:

अर्जुन उवाच—

ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १ ॥

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोहमाप्नुयाम् ॥ २ ॥

भगवानुवाच—

लोकेस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥ ३ ॥

(अस्मिन् लोके निष्ठा द्विविधा स्थितिः लक्षणहेतुः । ज्ञानमेव योगः । तेन साङ्ख्या ज्ञानिनो लक्ष्यन्ते ।) यथा[1] त्रिदण्डेन त्रिदण्डोनाश्रमी लक्ष्यते । एकार्थत्वात् । एवं कर्मयोगेन योगिनां समत्वम् अयोगवतामीश्वराराधनार्थं कर्म कुर्वतां साक्षात्कर्मणोपि ज्ञानोत्पत्त्युपायत्वात्[2] । तथा चोक्तम्—

ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः ।
यथादर्शतलप्रख्ये[3] पश्यन्त्यात्मानमात्मनि ॥

(आत्मनि) बुद्धावित्यर्थः । पापक्षयश्च[4] धर्मात्—धर्मेण पापमपनुद—इति, तपसा ब्रह्म विजिज्ञासस्व—इति च श्रुतेः । तेषां यमनियमवत्त्वादल्पमपि[5] ज्ञानसामान्यमस्तीति । अतः क्वचित् किञ्चित् प्रधानमिति । एतावान् विशेषोत्र—समुच्चयः

---

१. यथा त्रिदंडेन त्रिदडनाश्रमी लक्ष्यते कार्थं चास्सेव कर्मयोगेन योगिनां समत्व··· । २. कर्मणोत्पत्युपायत्वात् । ३. तत्रादर्शतलप्रख्ये । ४. बुद्धयावित्यर्थः पापक्षयाश्च । ५. ०नियमवादुल्पं ज्ञानमपि ।

(ज्ञानकर्मणोः प्रतिपादितः)। नह्यत्र स्मार्तेन कर्मणा श्रौतेन वा ज्ञानस्य समुच्चय[1] इति। अयमपि विशेष उपयुज्यते[2]— यथा प्राक्तनेन कर्मणा ऐहिकस्य कर्मणः समुच्चयस्योपपत्तिः। न त्वत्राश्रमविकल्प[3] आश्रमसमुच्चयो वा भगवता विवक्षितः। (आत्मनः) साक्षात्करणात्[4] प्रागवस्थायां कर्मप्राधान्यमुत्तरत्र ज्ञानप्राधान्यमित्युपदेशात्। अतः स्थिरं[5] प्रतिपुरुषमपवर्गाधिकारे ज्ञानकर्मणी समुच्चीयेते इत्येतत्परमिदं[6] शास्त्रमिति सम्यग् दर्शितम्। तद्वाक्यानि च तथैव व्याख्यातव्यानि।

अन्ये पुनः पत्त्रैरिव[6] फलानि छादयन्तः प्रश्नमुत्तरं चान्यथा वर्णयन्ति। प्रजहाति यदा—इत्यारभ्य[7] सर्वकर्मत्यागिनां साङ्ख्यानां ज्ञानादेव केवलान्निःश्रेयसः प्राप्तिरुक्ता। मम च— कर्मण्येवाधिकारस्ते—इति कर्मैव केवलमुपदिष्टम्। न तत एव श्रेयःप्राप्तिरित्याकुलितबुद्धिरर्जुन उवाच—ज्यायसी चेत्— इति। उत्तरश्च[8] भागवतमुपपद्यते—साङ्ख्यानां केवलाज्ज्ञानान्निःश्रेयसप्राप्तिः[9]। कर्मयोगिनां तु निष्ठयैवेति[10]। द्वे निष्ठे भिन्नपुरुषविषये इति सर्वकर्मत्याग एव सम्यग्दर्शिनां[11] साङ्ख्यानामितिहासपुराणोपनिषत्सु[12] च दर्शितः।

न च नित्यकर्माकरणे संन्यासिनां प्रत्यवायो भवति, अधिकारस्य निवृत्तत्वात्[13]। अधिकारिभिस्त्यज्यमानं[14] कर्म दोष-

---

१. विशेषोत्र समुश्च नघात्र स्मातेन कर्मणा स्रोतेन वा समुश्चय इति। २. उपयोज्यते। ३. यथा प्राप्तेन कर्मणा समुश्चयोपापतेः न चत्रश्रमविल्प। ४. साक्षात्कारणात्। ५. अतस्थिरं। ६ समुश्चीयते। दत्पपरं सम्यग्दर्शतानि व्याख्यानामासेः पत्रैरिव। ७. देसारभ्य। ८. उत्तर च। ९. साख्यानां केवलाज्ञानान्नि०। १०. कर्मयोगिनां तु कर्मनिष्ठेवेति। ११. सर्वकर्मस एव सम्यग्दर्शिनां। १२. ०मितिहास पुराणयोहमनिषत्सु। १३. निवृन्तत्वात्। १४. ···भिस्स्यज्यमानं।

मा(व)हति। न चाकरणादभावात् प्रत्यवायोत्पत्तिः[१]। तस्माद्विविदिषावतामनुत्पन्नज्ञानानामपि विदुषां चोत्पन्नज्ञानानां[२] कर्मत्याग[३] एवेति ब्रुवते।

अथान्ये[४] श्रुतौ तु सांख्यानां ज्ञानादेव[५] निःश्रेयसमुक्तम्। आत्मनश्च[६] कर्म कर्तव्यमुक्तमिति श्रुतिस्मृतिन्यायनिपुणाः प्रत्याचक्षते[७]। (ते)नैवमपि योजयितुं[८] शक्यते—सांख्यानां ज्ञानादेव निःश्रेयसमुक्तमात्मनश्च कर्म कर्तव्यमुक्तमिति विवेकेनार्जुनोव[९]-गतवान् यदि तत्कथं तस्याकुलीभावः—तदेकं[१०] वद—इति च नोपपद्यते। भागवतं चोत्तरं[११] न सङ्गच्छते—द्विप्रकारोक्ता निष्ठेति।

तत्रैवं[१२] वक्तव्यम्। स्यात्कर्म(ण्येव)ाधिकारस्ते न निःश्रेयस्सु निष्ठयोर्भिन्नपुरुषविषयत्वात्। ज्ञानं कस्यचिदेव कस्यचित् कर्मैवेति प्रकारमात्रोपदेशाय। तदुक्तम्—विविदिषावतो[१३] विदुषश्च सर्वकर्मसन्न्यास[१४] इति। तच्छ्रुतिस्मृतिन्यायबाह्यं[१५] विरुद्धश्च। यदि तावदुत्पन्ने ज्ञाने प्रयोजनाभावात् कर्मत्यागे[१६] हेतुर्विद्यते, यदि वा विद्वद्भिस्त्रैवर्णिकैः[१७] कर्म त्यज्येत स्वच्छन्दतया सर्वे कर्मिणो ब्रह्मविदः समुद्रं प्रविशेयुः[१८]। विविदिषावतामपि कर्मयोगमेव दर्शयति—तमेतं[१९] वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसेति[२०] च।

---

१. प्रत्यवायोरत्पत्रि०। २. ···त्पन्नजानानां। ३. कर्मसाग। ४. अन्यान्ये। ५. श्रुतिसांख्यानां ज्ञानादिव। ६. आत्मतश्च। ७. स्मतिन्यायनिपुणः प्रत्यांचक्षते। ८. नैवं प्रयोज०। ९. विवेकना०। १०. तदेकं वद्येति च। ११. चोतरं न संगछ्ते। १२. तत्रैव। १३. निःश्रेषसु निष्टयौ भिन्नपुरुषविषयत्वं कस्य विमेव कस्यचित्कर्मैवति प्रकारमात्रोपदेशायदथुक्तं विविदिषो। १४. ···सस्न्यासा। १५. तत्छतिस्मृति०। १६. ०त्वागे। १७. विद्वभ्दिस्त्रै०। १८. स्वछंदतया सर्वकर्मविद्यपस्समद्रं पुशेनवि। १९. ०मेवं ततमेतं। २०. विवेदिषंति यज्ञमानेन तपसेति

यदि चाविदुषोपि कर्मत्याग एव विहितः स्याद् विदुषः कर्मानर्थक्यादिति[1] हेत्वभिधानमनुपपन्नम्[2] । तदेवं विरुद्धं भाषमाणः[3] कथं ग्राह्यवचनः स्यात् । न चोपनिषत्सु सर्वत्यागगमकं लिङ्गमस्ति[4] । न कर्मणा प्रजया धनेन त्यागेनैकेनामृतत्वमानशुः—इत्यत्र प्रजासाहचर्याल्लोकप्राप्त्यर्थं काम्यकर्मत्यागो गीयते । इतरापि श्रुतिः[5]—न्यासमेषां तपसातिरिक्तमाहुः—इति न्यासशब्देन तत्र ब्रह्माभिधीयते न कर्मत्यागः । प्रकृतां वाचमित्यत्र दमशमादीनां तपसां च तत्प्राप्तिसाधनत्वात्तदपेक्षयातिरिक्तवचनम्[6] । प्राप्तव्यं हि प्राप्तिसाधनादतिरिक्तं भवति ।

अन्यैश्च सन्न्यासशब्दोत्र न्यासशब्दस्यानर्थान्तरे प्रयुक्तः । यथा आज्यैः स्तुवते[7]—इत्याज्यशब्दः स्तोत्रेषु लोके घृतवचनः[8] । तदिह भ्रान्त्या तस्य त्यागार्थकत्वं[9] कल्पितम् । तथा हि—

ध्वनिमात्रकृतो ह्येव जनानां मतिविभ्रमः ।
पौर्वापर्यापरामृष्टः[10] शब्दोन्यां कुरुते मतिम् ॥ इति ।

इतिहासे च तत्र तत्र मोक्षार्थिभिः कर्म कर्तव्यमित्युक्तम् । तथा हि शुकानुप्रश्ने[11]—

कर्मणा मनसा वाचा यो धर्मनिरतः सदा ।
अफलाकाङ्क्षसिद्धश्च स मोक्षमधिगच्छति[12] ॥ इति ।

---

१. विपः कर्मानर्थर्थ्यात् । २. ०धानमन्नपन्नं । ३. ०याभाषमाणः । ४. त्यागसत्वकं लिंगमस्ति । ५. ···मृतत्वमादुरित्यत्र प्रजासार्यचर्याल्लोकप्रत्थर्थकाम्यकर्मत्यागायते रति ःरोयश्रु० । ६. व्राह्मा०···प्रकृतावां च सत्रदमशमादीनां तपसां तत्प्रातीसाधन० । ७. ०शब्दोत्र च न्यासशब्दोर्थांतरे प्रयुक्तो यथा—दयैस्स्तुवते । ८. घजवचनः । ९. भ्रांत्यागाथत्व । १०. ···पएमृष्टः । ११. ···०प्रश्ने । १२. वित्तश्च स मोक्षमधिगछति ।

यत्तु—त्यज धर्ममधर्मं च—इति, तस्योत्तरश्लोकादर्थनिर्णयः—त्यज धर्मं सङ्कल्पजम्[1]। त्यजाधर्ममहिंसया इति। फलसङ्कल्पत्यागो न स्वरूपत्याग इति।

यदुक्तमकरणे प्रत्यवायो नास्तीति, तदसत्। अकुर्वन् विहितं[2] कर्म—इति स्मृतेः। न च शास्त्रे यः स्वेच्छाकृतस्त्यागः[3] प्रत्यवायनिवारणे समर्थः। न चाकरणस्याभावस्य प्रत्यवायनिमित्तत्वं नास्तीति शक्यं वक्तुम्। राजाज्ञया नियुक्तानां[4] भृत्यानामुक्ताकरणे वधबन्धादिदोषदर्शनात्[5]। कथमसतः सञ्जायेत इति द्रव्याभिप्राया श्रुतिः। असतो द्रव्यान्तरस्योत्पत्तिर्नास्तीति तत्रार्थः। द्रव्यस्य हि सुवर्णादेरेव स्वीकार्यम्। न चावस्थावत्त्वमन्तरेणावस्थयोपपद्यते[6]—इत्यभिप्रेत्यासदुत्पत्तिनिषेधः[7]। तथा विहितानुष्ठानेपि प्रयोजनमस्ति मोक्षार्थिनां दुरि(त)क्षयोन्येषामभ्युदयः। तस्माद् गीताशास्त्रेन्यत्र[8] वा कर्मणां मोक्षार्थता[9] न कर्तव्येति स्थितम्।

अन्ये पुनरन्यथा श्लोकं प्रस्थापयन्ति। कर्माद्भुतमुद्गीथाद्युपासनम्[10]। तेन योगात् कर्माण्यपवर्गभोग्यानि भवन्तीत्येव कृत्वोक्तम्[11]—ज्ञानयोगेन सांख्यानाम् इति। कर्मणा नित्यनैमित्तिकेन[12] योगात् कर्मयोगः। तेन योगिनां परमात्मोपासकानां निष्ठोक्तेति[13]। तदेतद(नृ)तं भाषितमिति[14] (ते) मन्यन्ते।

---

१. ···श्लोकादधतिर्णयस्त्यज धर्ममसंकल्पा। २. तदसद कुर्वेन्विहितं। ३. ०कृतस्सागः। ४. राजायुक्तानां। ५. वधवेधादिदोष०। ६. सुवर्णादेरवस्थी कार्या न चावस्थावंर्तमंतरेणावस्थोपपद्यत इ०। ७. तदुपनिषेधः। ८. तस्माद्गीताशास्त्रे०। ९. कर्मणा न्मोक्षाथा न। १०. कर्माभ्दुतामुदीथाद्युपासनं। ११. ···०वर्गभागोपानि भवंती त्येवं०। १२. ०योगाकर्म। १३. निष्टोक्तति। १४. तदेददमनुतं भाषितम्।

कथमुद्गीथावयवाद्युपासनकर्मणः समृद्धयर्थत्वान्नापवर्गयोगित्वम्[1]। ओमित्येतदक्षरमुद्गीथमुपासीत—इत्युद्गीथावयवस्यौङ्कारस्योपासनं[2] तत्र विहितं न ब्रह्मोपासनमिति तत्रैवं स्थितम्[3]। न चोद्गीथाद्युपासनसम्बन्धादस्यापवर्गहेतुत्वम्। किं तर्हि[4]। यज्ञेन दानेन इति। आत्मज्ञानसहकारितया विनियोगादिकं च[5] गीताद्वितीयाध्यायोक्तेन ज्ञानकर्मप्रविभागप्रज्ञापनार्थमित्युक्तम्[6]। योगश्च तत्र—कर्म(सु) कौशलम्—इत्युक्तं न परोपासनमित्यलं प्रसङ्गेन ॥ ३ ॥

साङ्ख्या परिव्राजका ब्रुवते—केवलादेव ज्ञानान्मुक्तिः सर्वं श्रौतं स्मार्तञ्च कर्म त्यक्तव्यमहेतुत्वाद्[7] इति। तेषां प्रत्याख्यानाय भगवानुवाच—

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोश्नुते।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति[8] ॥ ४ ॥

निष्कर्मणो भावो नैष्कर्म्यम्। कर्मशब्देन पुण्यापुण्ययोर्ग्रहणम्। तद्रहितं मोक्षमित्यर्थः। अनारम्भान्मोक्षं पुरुषो नाश्नुते न प्राप्नोति। अर्थादेतदुक्तं[10] भवति—आरम्भात् प्राप्नोतीति। कर्मसापेक्षाज्ज्ञानान्मुक्तिर्न केवलादित्यभिप्रायः[11]। अथ मन्य(से) किं कर्मणा परिव्रज्यासहिताज्ज्ञानान्निःश्रेयः सम्भविष्यतीति[12] चेन्नेत्याह—न च सन्न्यसनादेव—ज्ञानसहितात् सन्न्यासादेव

१. कथमुभ्दीथावपवध्युपासनत्कर्मसमृद्धयर्थत्वान्नापावर्गोपयोनिगत्वम्। २. ···क्षरमुद्धीथमुपासीत्युदीथावयवस्योंकारस्योपासनं। ३. तत्रवस्थितं। ४. न चोद्धीथाद्युपासनसंवंधादपवर्गहेतुत्वं किं तार्हे···दानेन तेत्यात्म०। ५. विनयोगादिपंच। ६. ···ध्यायोक्तृणजानकर्मप्रविभागप्रज्ञापनार्थेत्युक्तं। ७. केवलादेववज्ञानार्मुक्तिस्सर्वं श्रोतस्मार्तकर्मत्यक्तव्यं न हेतुत्वादिति। ८. सल्पसनादेवसिद्धिंसमधिगछति। ९. नैष्रुर्म्यम्। १०. अर्थादेनदुक्तं। ११. आरम्भात्माप्नोतीति कर्मसापेक्षाज्ञानान्मुक्तिर्न०। १२. परिव्रज्याश्रमसहिताज्ञानान्निश्रेयसं भविष्यतीति तच्च नेत्याह।

तुर्याश्रमग्रहणात् सिद्धिं मोक्षं नाधिगच्छति[1]। कर्मसहितमेव ज्ञानं सिद्धिसाधनम्। आश्रमपारतन्त्र्यान्मनसः। सर्वेषामाश्रमाणां[2] समुच्चयात् सिद्धिरिति भागवतं मतं सुनिश्चितम्।

यथेदमेव[3] सांख्यदर्शनमाश्रित्य सर्वधर्मत्यागमेकवैणविनो वदन्ति। तेपि ह्येतेनापास्ता वेदितव्याः[4], निराकरणन्यायस्याविशेषात्[5]।

अत्र ते प्रत्यवतिष्ठन्ते—अस्मद्दर्शनेपीयं[6] गीता घटते। कथं कर्मारम्भादेव नैष्कर्म्यमश्नुते[7] ज्ञानोत्पत्त्युपायत्वात्[8] कर्मणाम्। तस्मात् कर्म कर्तव्यम्। ततो ज्ञानोत्पत्तिः। ततो मोक्ष इति[9]। न च सन्न्यसनादेव ज्ञानरहितात् सिद्धिं समधिगच्छतीति[10]।

तदिदमपव्याख्यानमन्ये प्रत्याचक्षते। यदि ताध्दयमर्थो नैष्कर्म्यं निष्कर्मता[11] कर्माभाव इति स्यात्[12] तदा विरोधोत्र[13]। न कर्मारम्भात् कर्माभावः। किं तर्ह्यनारम्भादेव[14]। अथ नैष्कर्म्यशब्देन ज्ञाननिष्ठतोच्यते[15] कर्माकृत्वा ज्ञानोत्पत्त्यसम्भवादिति[16]। तथाप्यविदुषां सर्वकर्मत्यागोपदेशो भवतो विरुद्ध्येत। तथा चोक्तमुपदेशग्रन्थे—त्वंपदार्थविवेकाय सन्न्यासः सर्वकर्मणाम्[17]—इति।

अस्यायमर्थः—

नैष्कर्म्यं[17] मोक्षः। कर्मारम्भान्मोक्षं[18] प्राप्नोतीति। एवमपि

---

१. तुमाश्रमग्रहणात्सिद्धिर्मोक्षं नाधिगछति। २. आश्रमप्रतियातेरतन्त्रमनस्सर्वेषामाश्र०। ३. भागवतं मंतं मुद्रितं ययीदमेव। ४. तेप्यपदस्तेनापास्ता वेदितथा। ५. निराकारण०। ६. ···अत्त ते प्रत्यवतिष्टन्तेऽस्मवर्शनेपीयं। ७. कर्मरम्भादेवैनैष्क०। ८. ज्ञानोत्पक्षुपायत्वात्। ९. मोक्ष्यरति। १०. ···गछतीति। ११. निघुर्मता। १२. यात्। १३. विरोचोत्र। १४. किर्ह्यनारंभात्। १५. ···निष्टतो०। १६. ज्ञानोत्पत्यत्त्यासम्भवादिति। १७. अथापमर्थः नैष्कर्म्यं। १८. कर्मारंभात्मोक्षं।

केवलकर्मिणां मोक्षः प्रसज्यत इति ज्ञानोपदेशानर्थक्यम्[1]। अथ ज्ञानसहितात्कर्मणस्तत्प्राप्तिरित्येवं सत्यङ्गीकृतोऽस्मत्पक्षो[2] भवता भद्रमुखेन[3]। एवं च पूर्वार्धे व्याख्याते[4]—न च सन्न्यसनादेव—इत्यतिरिच्यते। कर्मत्यागमाशङ्क्य—न[5] कर्मणामनारम्भात्—इत्युक्तम्।

सन्न्या(स)शब्देनापि कर्मत्याग एव त्वत्पक्षेऽभिधीयते। न च ज्ञानरहितात्कर्मत्यागान्मोक्षः[6] केनचित् प्रतिज्ञातो[7] येनेदं निराकरणार्थं स्यात्। यदि चाविद्वांसः कर्माकुर्वाणा[8] मुच्येरन् युगपदेव कृत्स्नं[9] जगन्मुच्येत। न च ज्ञानकर्मणोर्विरोधात्कर्मत्यागो (वरम्) विरोधस्यासिद्धत्वात्। किन्न पश्यसि भगवन्तम्[10]—वर्त एव च कर्मणि—इति वदन्तम्। साक्षाद् ब्रह्मैव स्वयमेवार्जुनस्य सारथ्यं गतवत्[11]।

किञ्चायं विद्वान् ब्रह्मीभूतोऽभेदमेकान्तेन न पश्यति। तस्यामवस्थायां न कर्म कर्तव्यमिति ब्रूमः। यदि तु व्युत्थितचित्तोऽशनयानादिषु कर्तृत्वमनुभवति तस्यैव सन्ध्योपासनादि[12] कर्तव्यं स्यात्। विशेषहेतुर्वा वक्तव्यः। यच्चोक्तमात्मोपदेशीयोऽयं ग्रन्थः। तत्राशङ्क्ये किलोत्तङ्केन गृहीतममृतम्[13]। यथा कर्मनाशभयाज्जन्तोरात्मज्ञानाग्रहस्तथेति तथ्यपर्यालोचिनमुक्तम्। उत्तङ्कस्य युक्तसूत्रद्वारविनिर्गतत्वाद् अमृतधाराया[14] सूत्रभ्रान्त्यात्म-

१. ज्ञानापदेशानर्थक्यं। २. सत्यंगीधुतोस्मत्पक्षो। ३. भद्रसुखेन। ४. पूर्वार्द्धव्याख्याते। ५. ···परित्यागमाशंक्ये न०। ६. ०धियते···जीनरहितात्०। ७. प्रतिज्ञातं। ८. चांविद्वंसः कर्म कुर्वाणा। ९. युगपदकत्मंजग०। १०. भगवतं। ११. वदतं साक्षाद्ब्रह्मैवमंस्वयमेवार्जुनस्य सारथ्यं गतवान्। १२. व्युस्थितच्चित्तोशनयानादिसु कर्तत्वमनुभवति तानेवसन्ध्योपासनंदि। १३. यश्चोक्तमात्मीयोपदेशग्रथसत्राशंकः किलोतं कोनाग्रहोदमृतं। १४. भयाडंतोरात्म...तथेतितप्यपर्या···क्तं उतं कष्नयुक्त सूत्रद्वारविनिर्गतत्वात् अमत० धारायासूत्र···भ्रांत्या उरुग्रहणम्।

ज्ञानाग्रहणम् । इह त्वात्मज्ञानान्मुक्तिमिच्छतां[1] कथमात्मज्ञानाग्रहः । यदि च कर्म मुक्तिकारणं स्यात् ततस्तत्परिरक्षणे प्रयतेरन् । तत्र[2] यदि समुच्चयान्मोक्षावाप्तिस्तदोभयत्र प्रवृत्तिः । अथ केवलाज्ज्ञानादपवर्गः स्यात् (इति) त्वत्पक्षो वर्तते[3] कर्मश्रेयस्करत्वाद्विषवत्परित्याज्यं श्रेयस्कामैरिति[4] । यत्किञ्चिदेतत् । कर्मणश्च यथा बन्धहेतुत्वं[5] नास्ति तथा वक्ष्यामः ॥ ४ ॥

कर्माकुर्वतः केवलादेव ज्ञानात्सिद्धिरित्ययमर्थो न[6] केनचिदनुन्मत्तेन शक्यते प्रतिज्ञातुमिति[7] । तत्र हेतुमाह—

न हि कश्चित्क्षणमपि[8] जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः[9] कर्म सर्वः प्रकृतिजैर्गुणैः[10] ॥ ५ ॥

हीति हेतौ । नेति प्रतिषेधे[11] । यस्मात्कश्चिदपि पुरुषः क्षणमात्रं जातु[12] न कदाचित् तिष्ठत्यकर्मकृत्[13] । तस्मात् कर्मयोग-(प्रतिषेध)प्रतिज्ञानुपपन्ना । कथं पुनरकर्मकृन्नास्तीत्याह । कार्यते ह्यवशः कर्म । अवशोऽस्वतन्त्रः पुमान् कर्म कार्यते बलात्कर्मणि प्रवर्त्यते[14] । केन । प्रकृतिजैर्गुणैः । प्रकृतिर्महाभूतानां सूक्ष्मावस्था[15] । ततो जातैः कार्यकरणैः सत्त्वादिगुणाधिष्ठितै(र्गुणैः) ।

त्रिविधं कर्म—कायिकं वाचिकं मानसं चेति । तत्रावश्यमन्यतमेन[16] भवितव्यम् । कर्म त्यक्तव्यमित्युक्तिमात्रे(ण)

---

१. ०ज्ञानात्मुक्तिमिछतां । २. तत्परिरक्षणं प्रयतेरंस्तत्र । ३. केवलाज्ञानादपवर्गस्त्वात्पक्षवर्त्तंतः । ४. श्रेयस्कमैरिति । ५. ···श्चयावंधहेतुत्वानास्ति । ६. केवलादिवज्ञानासिद्धिरित्य० । ७. ···०चिदनुत्पत्तेन···ज्ञातुमिमित । ८. किंचित्तक्षणमपि । ९. कर्यते त्यवशः । १०. प्रकृतिजेर्गुणैः । ११. हीति हेतेति प्रति० । १२. ज्ञातुं । १३. तिष्टत्य० । १४. कमकार्यते वलात्कर्तणिप्रवर्तते । १५. सूक्ष्मवस्था । १६. तत्रावश्यंमन्यतमेन ।

वाचिकं[1] कर्म कृतमेव भवति। मौनावस्थानेपि[2] मानसं (कर्म) दुष्परिहरं विद्युल्लतावच्चञ्चलत्वात्तस्य[3]। अशनशयनसंक्रमणादीनि[4] छायेवानुगतानि ॥ ५ ॥

यस्तु चोदितं कर्म न करोति मनसा च विषयान्भोजनादीनभिलषति स केन शब्देनोच्यत इत्याह[5]—

कर्मेन्द्रियाणि[6] संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान् विमूढात्मा[7] मिथ्याचारः स उच्यते ॥ ६ ॥

यस्तु चोदितमनुतिष्ठति[8] स यथोक्तकारित्वान्मार्गस्थ[9] इत्याह—

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन[10]।
कर्मेन्द्रियैः[11] कर्मयोगमसक्तः स विशिष्यते ॥ ७ ॥

फलासङ्गरहितः[12] ॥ ७ ॥

यत एवमतः—

नियतं कुरु कर्म त्वं कर्म ज्यायो[13] ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥ ८ ॥

नियतं[14] नित्यं सन्ध्योपासनादि। सामान्ये आसङ्गादि[15] विशेषे कर्म कुरु यस्मात्कर्म ज्यायोधिकतरमकर्मणः। अकरणात् सकाशा(द)दृष्टे विषये मन्दकरणमपि श्रेयस्करम्[16]। कथम्। शरीरयात्रा शरीरस्थितिरपि न ते प्रसिद्ध्येदकर्मणो निर्व्यापारस्य।

---

१. याचिकं। २. सौनावस्थानेपि। ३. लक्तचंचलत्वातस्य। ४. ···०श्यनचंक्रमणादीनि। ५. विषयान्मोजनादीतभिलाषति स कोब्दश्च उच्यते रत्याह। ६. कर्मद्रियाणि। ७. विमूमात्मा। ८. ···तिष्ठति। ९. पथोक्त···मार्गस्था। १०. ···यम्याभरतेंर्जुन। ११. कर्मद्रियैः। १२. कलासंग०। १३. न्यायो। १४. विगतं। १५. सामान्येसंगादि। १६. विषपेथकरणमप्प्रेयस्करं।

यदत्र केचिदश्रुतं विशेषणं स्वमनीषिकया प्रक्षिपन्त्यज्ञेनाधिकृतेन[1] कर्म कर्तव्यमिति, तदसत्। शरीरस्थितिर्न सिद्ध्यतीति[2] विदुषोविदुषश्च समानं हेत्वभिधानम्। विद्वानपि परिव्राजको[3] भोजनकाले भिक्षाटनादौ प्रवर्तत एव[4], अन्यथा शरीरस्थित्यभावात् ॥ ८ ॥

यच्च[5] मन्यन्ते सांख्याः सर्वं[6] कर्म बन्धात्मकमिति तदसदित्याह—

यज्ञार्थात्कर्मणोन्यत्र लोकोयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ९ ॥

यज्ञशब्देनात्र कालान्तरस्थायी धर्मोभिधीयते यमपूर्वमिति मीमांसका ब्रुवते। तस्य चाधिदेवता विष्णुः। यज्ञो वै विष्णुः—इति श्रुतेः। तयोरभेदेन व्यपदिश्यते[7]। एतदुक्तं भवति—ईश्वराराधनार्थत्वात्[8] कर्मणः श्रुतिस्मृतिविहितः[9] पुरुषव्यापारः कर्मशब्देनोच्यते। ततोन्यत्र तं वर्जयित्वा[10] लोकोयं कर्मबन्धनः। फलार्थं यत्क्रियते तेन बध्यते जन्तुः। तदर्थं[11] यज्ञार्थं केवलधर्मसिद्ध्यर्थं कर्म मुक्तसङ्गः[12] फलासक्तिरहितः समाचर। इतीदमेवं धारयेन्मोक्षायेति। शास्त्रमेवात्र प्रमाणम्[13]। यथायं धर्मोयमधर्म इति ॥ ९ ॥

प्रजापतिवचनाच्च श्रेयस्करं कर्म। अतोनुष्ठेयमिति[14] दर्शयन्नाह—

---

१. प्रक्षियोत्पाज्ञेनाधिकृतेन। २. सिधतीति। ३. परिव्रातको। ४. प्रचतंत एव। ५. यश्च। ६. साख्याः सर्वं। ७. यजो वै···व्यापदिश्यते। ८. ईश्वराराधनाथात्। ९. ···विहतः। १०. व्रजीयित्वा। ११. यत्कियते तेन वद्यतेजुंतुस्तदर्थं। १२. मुक्रसंगः। १३. ०चरेतिद्रेवंधायेदे मोक्षायेति शास्त्रमेवाप्रत्रमाणं। १४. रप्रजापतिवचनाश्चश्रेपरकरंकर्मातोनुष्टेयमिति।

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच[1] प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्[2] ॥ १० ॥

सह यज्ञेन वर्त्तन्त इति सहयज्ञा ब्राह्मणाद्याः प्रजाः[3] सर्गादौ सृष्ट्वा ताः पुरोवाच[4]—अनेन प्रसविष्यध्वम् । प्रसवो वृद्धिः । तां प्राप्नुत । एष वो युष्माकमिष्टकामधुगस्तु[5] । कामान् दोग्धीति कामधुक् ॥ १० ॥

कथं पुनः कामधुगित्याह[6]—

देवान् भावयतानेन ते देवा[7] भावयन्तु वः ।
परस्परं भावयन्तः[8] श्रेयः परमवाप्स्यथ ॥ ११ ॥

अनेन देवान् भावयत विभूत्या योजयत[9] । ते चेन्द्रादयो देवा[10] भावयन्तु युष्मान् विभूत्या योजयन्तु[11] वृष्टिप्रदानादिना । एवमन्योन्यं भावयन्तः श्रेयः परं स्वर्गार्थिनः स्वर्गम् अपवर्गार्थिनोपवर्गं प्राप्स्य(थ)[12] ॥ ११ ॥

प्रत्युपकारमकुर्वतोनिष्टार्थप्राप्तिमाह[13]—

इष्टान् कामान् हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते[14] स्तेन एव सः ॥१२॥

इष्टान् कामानिति । पूर्वार्धेन पूर्वश्लोकानुवादः[15] । तैर्देवैर्दत्तान् भोगान् यो भुङ्क्ते[16] तेभ्योदत्त्वा तानुद्दिश्य यागमकृत्वा स्तेन एव सः । कर्तव्यमकुर्वन्[17] प्रत्यवैतीत्यर्थः ॥ १२ ॥

---

१. पुरीवाच । २. प्रसाष्यधमेषवोस्तिष्टकामधुक् । ३. प्रजा । ४. सृष्ट्वें-वाच । ५. वै पुष्माकमिष्ट० । ६. कामां…कमधुगित्याह । ७. भूता । ८. भावयन्त । ९. विधूत्पायोतयत । १०. देवान् । ११. योनयंतु । १२. ०मवर्गार्थेनोपवंर्गप्राप्स्य । १३. …कुर्वतोनिप्रार्थमाह । १४. तेर्दत्तानप्रदाषेभ्यो ये भूंक्ते । १५. पूर्वार्द्धेनुवादैस्तेर्देवदत्तान् । १६. भुक्ते । १७. …मकुर्वत्पत्प्रवेतीत्पर्थः ।

ये तु पुनः—

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ १३ ॥

यज्ञार्थं निरुप्तं द्रव्यम् । तेन यज्ञे निर्वर्तिते[1] यदवशिष्टं (द्रव्यं) तदशितुं शीलं येषां ते यज्ञशिष्टाशिनः[2] (सन्तो सर्वकिल्बिषैर्मुच्यन्ते) । ये पुनरात्मार्थं केवलं पचन्ति तेघं पापमेव भुञ्जते[3] ॥ १३ ॥

जगच्चक्रप्रवृत्तिहेतुत्वाच्चावश्यं[4] कर्म कर्तव्यमित्याह—

अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः[5] ॥ १४ ॥

अन्नादुपभुक्ताद्रेतोभूताद् भूतानि[6] जायन्ते । तस्य च समुद्भवः पर्जन्यात्[7] । स च यज्ञाद्भवति[8] । यज्ञश्च कर्मसंभवः । यजमानर्त्विग्व्यापारः[9] कर्म । तदभिव्यङ्ग्यमपूर्वं धर्मशब्दवाच्यं जगद्वैचित्र्यकारणम् ॥ १४ ॥

तच्च—

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्[10] ।
तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ १५ ॥

कर्म ब्रह्मोद्भवम् । ब्रह्म वेदः । तत्प्रकाशितम् । ब्रह्म चाक्षरसमुद्भवम्[11] । अक्षरमिति परमात्माख्या—तस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः[12]—इति श्रुतेः । यत एवं तस्मात् सर्वगतं ब्रह्माक्षराख्यं[13] सर्वगतमिति विशेषणात् । इतरत्

---

१. निरुप्तं द्रव्य तेन यज्ञे निवर्तते पद० । २. यज्ञशिष्यशिने । ३. पापमवं भुजते । ४. ···त्वाच्चावधकर्म । ५. ···समुभ्दवः । ६. अन्नादुपयुक्ता···भ्दूतानि । ७. समुद्भवात्यजंन्यान् । ८. यज्ञाभ्दवति । ९. यजमानद्विग्व्यापारः । १०. समुभ्दवं । ११. वाक्षप्समुद्भव । १२. मतद्यदग्वेदो यर्जुवैद । १३. ब्रह्माक्ष्यराक्यं ।

पुनर्ब्रह्म वेदाख्यं विकारत्वादसर्वगतं तदक्षराख्यं ब्रह्म नित्यं[1] सर्वदा यज्ञे प्रतिष्ठितम्[2]। यज्ञेनोपायभूतेन प्रख्यातमिति तत्प्रतिष्ठमुच्यते। यथोपायक्रियायां प्रतिष्ठाशब्दः[3] (वेदाः साङ्गाः सत्यमायतनं प्रतिष्ठा)—इति ॥ १५ ॥

उक्तेन प्रकारेण कर्ममूलं जगच्चक्रम्। अतस्तदकुर्वतो जीवनं व्यर्थमित्याह—

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥

एवमित्युक्तपरामर्शः। प्रवर्तितं मयाजातिना[4] चक्रमिव जगच्चक्रम्[5]। कर्मभ्यो भूतानि भूतेभ्यः कर्मेति। तत्र यः कर्म न करोति तेन जगच्चक्रं नानुवर्तितं भवति। निमित्ताकरणान्नैमित्तिकमेव[6] नाशितं भवतीत्यर्थः। सोयमघायुः पापायुरिन्द्रियैराराम आक्रीडा विषयेषु[7] यस्यासौ इन्द्रियारामः[8]। मोघं वृथैव हे पार्थ[9] स जीवति ॥ १६ ॥

किं काचिदवस्थास्ति यस्यां कर्मत्याग इष्ट इति[10]। अस्ति लोकव्यवहारः। अतस्तस्य ब्रह्मभूतस्य तत्प्रागवस्थायामित्याह[11]—

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च[12] मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥ १७ ॥

यस्त्वात्मरतिरेव स्यात्। तुशब्दोवधारणार्थः। अस्यामेवावस्थायामधिकारहेत्वभावात् कर्मत्यागो भवति[13]। आत्मन्येव

१. तित्यं। २. प्रतिष्टितं। ३. यथापायक्रियायां प्रतिडोदव इति। ४. मजायतिना। ५. चक्रमिव चक्रं। ६. निमित्ताकरणान्नेनिमित्तिकमेव। ७. सोपमघायुः पार्यंयुरिंद्रियैराराम०। ८. ईंद्रियारामः। ९. वृर्थैवहपार्थ। १०. ०त्यागा इत्यस्ति। ११. लोकव्यवहारातो तस्य ब्रह्मभूतस्य न प्रागवस्थायामित्याद। १२. ०दयस्त्वात्मरतिरेव स्यादात्मतृसश्च। १३. हेत्वाभावात् कर्मत्यागो न भवति।

रतिर्यस्य न विषयेष्वसावात्मरतिः । एवशब्दोवधारणार्थः । मनागपि विषयेषु रतिर्नास्ति । आत्मनैव[1] च तृप्तो नान्नरसादिना । आत्मन्येव च सन्तुष्टो नान्यार्थलाभेन । तदेवं त्रिविधेन विशेषणेन[2] विशिष्टस्य शरीरेन्द्रियविषयव्यवहारातीतस्य[3] परं ज्योतीरूपसम्पन्नस्य[4] कार्यं[5] न विद्यते । किमतः परं साध्यं स्यात् । इयं हि फलावस्था ज्ञानकर्मसमुच्चयानुष्ठानस्य ॥ १७ ॥

कार्यं न विद्यत इतीदं[6] स्पष्टीकर्तुमाह—

नैव तस्य कृतेनार्थो नाकृतेनेह कश्च(न) ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः[7] ॥ १८ ॥

कृतेन[8] यागादिनास्य प्रयोजनं नास्ति । नाकृतेनेह[9] कश्चन प्रत्यवायपरिहारलक्षणोर्थः[10] । न च तस्य सर्वभूतेषु[11] ब्रह्मादिषु कश्चिदर्थव्यपाश्रयः प्रयोजनमपेक्षा[12], स एव तद्भवतीति श्रुतेः[13] । यस्तु शरीरेन्द्रियधर्मैरनुरुध्यते शयनादींश्च करोति[14] व्यापारान् कथमसावात्मरतिरात्मतृप्त एव वा स्यात् । इयं चावस्था कर्मत्यागस्य भगवता नियता तामेतां[15] स्वयमेवालोच्य कर्म हातव्यमनुष्ठेयं (वा) । नान्यस्येदानीन्तनस्य दुरुपदेशः श्रोतव्यः प्रमाणीकर्तव्यो (वा) व्यामुह्यमानत्वादालस्यात्[16] ।

---

१. विषयेसु रतिर्नास्मात्मनैव । २. तदवं त्रिविधेन विशेषणोन । ३. शरीरेद्रिय० । ४. ज्योतिरुप० । ५. कार्य । ६. विष्वत इत्येदं । ७. कश्चदर्थव्यपाश्रयः । ८. कृतेमः :यागा० । ९. रुचाकृतेन । १०. प्रत्यवाहपरि० । ११. '''भूतेसु । १२. कश्चिदयोजनापेक्षा । १३. सखाद्भवतीति श्रतेः । १४. शरीरेद्रियधर्माननुरुत्यते शनयनादीं च करोति । १५. तामतां । १६. व्यागृह्यमालत्वादालस्यात् ।

तथा चाहुः—

केचिदज्ञानतो नष्टाः केचिन्नष्टाः प्रमादतः ।
केचिज्ज्ञानावलेपेन केचिन्नष्टैस्तु[1] नाशिताः ॥ इति ॥१८॥

यतो[2] जीवतः कर्मत्यागानुपपत्तिः—

तस्मादसक्तः सततं कार्यं[3] कर्म समाचर ।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः[4] ॥ १९ ॥

फलेष्वसक्तः कार्यं कर्म यदवश्यं कर्तव्यं तत्समाचर[5] । किम्प्रयोजनम् । (य)स्मादसक्तो ह्याचरन् कर्म परं परमात्मानमाप्नोति पूरुषः[6] ॥ १९ ॥

आत्मज्ञैश्च राजर्षिभिरासेवितोयं[7] (मार्गो) यस्मात्त्वयापि निर्विशङ्केनास्थेयम्[8] इति दर्शयन्नाह—

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥ २० ॥

कर्मणैव[9] हि संसिद्धि मोक्षमास्थिताः प्राप्ता[10] जनकाश्वपतिप्रभृतयः । हिशब्दो हेत्वर्थे । एवकारोवधारणार्थो निपातितः । कर्माभावव्यवच्छेदः[11] क्रियते न ज्ञानपर्युदासः । यद्यपि[12] कृतकृत्यमात्मानं मन्यसे[13] लोकसंग्रहमेव (तथा)पि सम्पश्यन् कर्तुमर्हसि । लोकसंग्रहो लोकपरिपालनमुक्तेन[14] न्यायेन । परमार्थतस्तु स्वार्थमेव कर्म कर्तव्यम् । केवलस्य ज्ञानस्यापवर्गं प्रति

१. केनचिन्नष्टैस्तु नाशिता इति । २. यता । ३. कार्यं । ४. कर्म परं परमात्मनमप्नोतिपुरुषः । ५. समाचरः । ६. प्रयोजनमस्मादसक्तो ह्याचरन्कर्मं ···माप्नोति पुरुषः । ७. अत्मज्ञैश्च । ८. युष्पास्त्वपापिनिर्विशंकेनास्थेप । ९. कर्मणेव । १०. प्रास्ता । ११. कर्मभावयुवछेदः । १२. यवपि । १३. मन्यसो । १४. लाकपरिपालिनक्तेन ।

साधनभूतस्यापि (ज्ञानस्य) कर्तव्यस्थानीयं[१] कर्म सहकारित्वेनापेक्षणीयम् । तस्माल्लोकपरिपालनमानुषङ्गिकं प्रयोजनम् ।

अत्र केचिदङ्गुलिभङ्गं[२] कुर्वन्तो व्याचक्षते—यदि जनकादयः प्राप्तसम्यग्ज्ञानास्ततो[३] लोकसंग्रहणार्थं कर्मणैव संसिद्धिमास्थिताः[४], कर्मसंन्यासे प्राप्तेप्यसन्न्यस्यैव प्रवृत्तकर्मत्वादिति । अथाप्राप्तज्ञानाः कर्मणा सत्त्वशुद्धिद्वारेण[५] ज्ञानोत्पत्तिमासाद्य[६] मुक्ताः—इति व्याख्येयः श्लोक इति ।

तदेतदसदर्थोत्प्रेक्षणम्[७] । जनकादयो हि ब्रह्मविदः स्मर्यन्ते[८] । मोक्षधर्मेषु[९] विष्णुधर्मेषु जनकानां षट्सप्ततिर्मोक्षं[१०] गता स्मर्यन्ते[११] । अत्र च कर्मणा मोक्षं गता इत्युच्यते । न पुनः कर्मणा लोकसंग्रहं कृतवन्त इति । श्रुतहानिरश्रुतपरिकल्पना चैवं स्यात् । न च तेषां कर्म(सु) प्रवृत्तत्वादिति कर्मप्रवृत्तौ हेतुः । उत्पन्नायां (कर्मप्रवृत्तौ) ऊर्ध्वं[१२] सर्वो हि प्रवृत्तकर्मैव । यदि सम्यग्दर्शने[१३] समुत्पन्ने कर्माकर्मसंन्यासो[१४] जनकादिभिरप्यवश्यं कर्म कर्तव्यं प्राप्तम् । नहि खण्डमोदकभक्षणवत्[१५] प्रीत्या कश्चित् कर्मणि प्रवर्तते क्लेशात्मकत्वा(त्) । तस्मात् कर्मणा विना संसिद्धेरसम्भवात् कर्म कुरु इति गीतार्थः[१६] ॥ २० ॥

अवश्यं लोकसंग्रहार्थमपि[१७] भवता कर्मणि य(ति)तव्यम् । कुतः[१८] । श्रेष्ठत्वात्तदाह—

---

१. साधितृभूतस्यापि इति कर्त्तव्य स्थानीयं सह कर्मकारित्वेनापेक्षणीयं । २. केचिगुलिभंगं । ३. ···सम्यग्ज्ञनोस्ततो । ४. संस्थिसिद्धिमास्थिताः । ५. ०शुद्धित्वारेण । ६. ज्ञानोत्पन्तिमासाद्य । ७. तदेतदसथं त्प्रक्षणे । ८. स्मर्येने । ९. साक्षधर्मेषु । १०. धसप्ततिर्मोक्षं । ११. गते स्मयंते । १२. ···हेतुरुत्पनया दुर्ध्वंसर्वो । १३. ···दर्शने । १४. ···सत्र्यासो । १५. खंडमोदकरक्ष्यणवत्० । १६. संसिद्धिरसंभवात् कर्मकृत इति गीतार्थः १९ । १७. ···सग्रहार्थं० । १८. कुरुतः ।

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः[1]।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते[2] ॥ २१ ॥

गुणाधिकः श्रेष्ठ[3] उच्यते। तेन यदनुष्ठितं[4] तत्तदितरः प्राकृतो जनोनुतिष्ठति[5]। स यत्प्रमाणं कुरुते[6] लौकिकं वैदिकं वा करोति तदेव प्रमाणीकृत्य लोकोनुवर्तते[7] ॥ २१ ॥

मां च किं न पश्यसि—

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन[8]।
नानवाप्तमवाप्तव्यं[9] वर्ताम्येव च कर्मणि ॥ २२ ॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु साध्यम्। यतो[10] नानवाप्तमप्राप्तं प्राप्तव्यं वास्ति[11] अथ च वर्ताम्येव च (कर्मणि)। वर्त एवेति[12] केचित् पठन्ति, आत्मनेपदित्वाद् (वृत)धातोः। तेषामितिहासपुराणवद्गीताया पञ्चमवेदत्वाच्छान्दसप्रयोगबाहुल्यादार्षपाठविनाशनमेव प्रसज्यते सर्वत्र पाठान्तरं कुर्वताम्[13] ॥२२॥

यदि पुनरहमेव कर्म न करोम्यन्योपि[14] न कुर्यादित्याह—

यद्यहं न प्रवर्तेय जातु कर्मण्यतन्द्रितः।
मम वर्त्मानुवर्तेरन् मनुष्याः पार्थ स(र्व)शः ॥ २३ ॥

यदि त्वहं[15] न वर्तेय। जातु कदाचित्। अतन्द्रितोनलसः[16]। ततो मम वर्त्म मदीयं मार्गमकरणलक्षणमनुवर्तेरन्[17] (मनुष्याः सर्वशः) ॥ २३ ॥

---

१. यघदाचरतिश्रेष्टस्तत्र देवेतरो जनः। २. लोकसदनुवर्तते। ३. श्रेष्ट। ४. यदनुष्टितं। ५. ततेदः प्राकृतोजनोनुतिटति। ६. प्रमाणभ्कृतं। ७. लोकेनुवर्तते २०। ८. पार्षस्ति···किचन। ९. ···मवामव्यं। १०. रुतो। ११. नानावाप्तमप्राप्तं प्राप्तव्यमस्ति। १२. वर्ताम्येव कर्त एवेति। १३. पवंति। आत्मनेपदिताद्धातोस्तेषामितिहासपुराणयः पञ्चवेदत्वाछांदस प्रयोगवादुल्यादार्षयागविनाशनमेव प्रसज्यते सवत्र यावांतर कुर्वताम् २१। १४. पुनरहे कर्मतकरोम्यन्यायिन। १५. स्वहं। १६. कदाचितद्रितो०। १७. ···मनुवर्तते।

ततः को दोष इत्याह—

उत्सीदेयुरिमे लोकाः न कुर्यां कर्म[1] चेदहम् ।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥

उत्सीदेयुर्विनश्येयुर्लोका यदि (अहं कर्म) न कुर्याम् । संकरस्य च कर्ता स्यामर्थाद्यभावात्[2] । ततश्चोपहन्यामिमाः प्रजाः । तस्मान्मयापीश्वरेण[3] सता लोकसंग्रहणार्थं कर्म क्रियते । सोयमुभयतः शास्त्रानुसारेणात्मार्थं परार्थं वा[4] कर्म कर्तव्यमेव । न ज्ञानित्वाभिमानेन कर्म त्यक्तव्यम्[5] । मनुष्यस्याधिकारित्वाच्छास्त्रस्य[6] भगवतोपि मनुष्यशरीरे[7](व)र्तमानस्य धर्माधिकारात् कर्मसंन्यासानुपपत्तेः[8] । कर्मणि प्रवृत्तौ[9] हि मनुष्यशरीरं विहाय देवो वा परमात्मा वा संवृत्तो यदा तदा तस्याधिकाराभावः । तदुक्तम्[10]—यस्त्वात्मरतिरेव स्यात्—इति । अतो यावद्भेदविज्ञानमनुवर्तते तावत्कर्माधिकारः स्वार्थं परार्थं वेति भागवतं मतं मुद्रितम्[11] ॥ २४ ॥

तत्र च[12] कर्मणि प्रवृत्तस्य विदुषोविदुषश्चायं[13] विशेषः—

सक्ताः कर्मण्यविद्वांसो[14] यथा कुर्वन्ति भारत ।
कुर्याद् विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम्[15] ॥ २५ ॥

फलाभिलिप्सया कर्मणि सक्ता अविद्वांसो यथा कुर्वन्ति[16] भारत तथा महतोत्साहेन वित्कुर्यात् सदसदर्थोपवर्गार्थम्[17] ।

---

१. लोकात् कुर्यं किंर्म । २. स्याम्मर्थादाभावात् । ३. तस्यान्मया० । ४. सोयमुभयतस्माशारत्र्रात्मार्थपरार्थंवा । ५. त्यक्त्कंलभ्य । ६. मनुष्यादिकारित्वाछास्त्रस्य । ७. ···शरीर । ८. ···सन्न्यासानुपन्तेः । ९. प्रवृत्तौर्हिं । १०. संवृन्तस्यस्याधिकाराभवस्तदुक्तं । ११. मुद्रितम् २३ । १२. तन्व च । १३. विदोषोविदुषश्चायं । १४. सक्तः कर्मण्यविद्वंसो । १५. विद्वंस्तथा०··· लोंमसंग्रहम् । १६. कुर्वंतिं । १७. वित्कुर्यादसदसद्दथोपवगार्थं ।

किञ्चैतदपरमान्तरीयकं प्रयोजनम्[1] । चिकीर्षुः कर्तुमिच्छुर्लोकसंग्रहम्[2] ॥ २५ ॥

यदि चायं कर्म न कुर्यादज्ञानां[3] बुद्धिभेदः स्यादित्याह—

न बुद्धिभेदं[4] जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत् सर्वकर्माणि विद्वान् युक्तः[5] समाचरन् ॥ २६ ॥

न बुद्धिभेदं जनयेदज्ञानामित्यज्ञग्रहणं ज्ञापकम्[6]—तत्र तत्र पूर्वत्र ज्ञस्यैव[7] कर्मकर्तव्यता भगवतोपदिष्टेति । जोषयेदित्युत्साहयेत्[8] । सर्वकर्माणि स्वयं युक्तः समाचरन्[9] ॥ २६ ॥

अविद्वान् केन प्रकारेण कर्मणि सज्जत इत्याह[10]—

प्रकृतेः क्रियमाणानि गुणैः कर्माणि भागशः ।
अहङ्कारविमूढात्मा कर्ताहमिति[11] मन्यते ॥ २७ ॥

प्रकृतेस्तेजोबन्नलक्षणायाः[12] कार्यकारणरूपैर्गुणैरचेतनैः[13] । क्रियमाणानि । शरीरेन्द्रियमनस्सु हि सर्वाणि लौकिकानि वैदिकानि च कर्माणि वर्तन्ते[14] नात्मनि । आत्मनस्तु सन्निधिमात्रेणायस्कान्तवदयसः[15] प्रवृत्तौ औपाधिकमेव कर्तृत्वं न स्वाभाविकम्[16] । यथेन्धनसंयोगे धूमजनकत्वमग्नेस्तथा शरीरेन्द्रियसंयोगे आत्मनः कर्तृत्वम् । (तस्य) कर्तृत्वं स्वेन निरतिशयानन्दरूपेणावस्थितस्य[17] नास्तीति निर्णयः । तत्रायमज्ञोहङ्कारविमूढात्मा स्वभावत

---

१. चेदसपंरंनांतरीकयं प्रयोजनं । २. कर्तुमिछुर्नाकसंग्रहम् । ३. कुयाद० । ४. बुद्धिभेदे । ५. विद्वात्युक्तः । ६. जनयेजानामित्याज्ञम्नहणं ज्ञापकं । ७. जस्यैव । ८. जाषयेत्मीत्साहतेत् । ९. समाचरन् २५ । १०. कर्मणि सजुत इत्याहं । ११. विमूरात्मा कतहिमिति । १२. प्रकृति तेजो० । १३. ···करणरवैगु० । १४. वर्तते । १५. आत्मा तु सन्निधि···मात्रेणाधस्कांतवदपसाः । १६. प्रवृत्तौ तु रौपाधिकमेव कर्तृत्वान्नरवाभाविकं । १७. यथेंधनसंयुगेधूमतनंकत्त्वमग्नेस्तथाशरीरेंद्रियसंयोगे प्रादुर्भवंति कर्तृत्वे स्वेन निरतिशयानंदरूरूपेणाव० ।

एवाहं[1] कर्तेति मन्यते । सोयमनेन मिथ्याभिमानेन बध्यते[2] ॥ २७ ॥

यः पुनस्तत्त्वविन्नासौ बध्यत इत्याह—

तत्त्ववित्तु[3] महाबाहो [4]गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त[5] इति मत्वा न सज्जते ॥ २८ ॥

गुणविभागस्य कर्मविभागस्य च यस्तत्त्वं वेत्ति (स तत्त्ववित्)। कः[6] पुनर्विभागो गुणानां देहेन्द्रियाणां कर्मणा(म)ात्मन इति । कर्मविभागश्च फलोद्देशेन क्रियमाणः फलार्थः, ईश्वरार्थः क्रियमाणोपवर्गार्थ इति[7]। सोयं गुणा[8] देहादयो गुणेषु स्वव्यापारेषु[9] स्वभावतः प्रवृत्ता इति मत्वा न सज्जते सक्तिं न[10] करोति ॥ २८ ॥

ये पुनस्ते—

प्रकृतेर्गुणसम्मूढाः सज्जन्ते[11] गुणकर्मसु ।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्[12] ॥२९॥

प्रकृतेर्गुणसम्मूढा इत्युक्तस्यानुवादः[13] कश्चिद्विशेषं वक्तुम् । तानकृत्स्नविदो[14] मन्दान् इत्यकृत्स्नविदः केवलकर्मविदो याज्ञिकान्[15] कृत्स्नविज्ञानकर्मविज्ञानकर्मसमुच्चयकारी[16] न विचालयेन्न बुद्धिचालनं[17] सम्पादयेत् । तेषां गुणकृतेषु हि कर्मसु तेषां

---

१. एव हि । २. वध्यते २६ । ३. तत्त्वविन्नु । ४. गणकर्म० । ५. गुणागुणेपु वर्तत । ६. यत्तत्वंवेभिकः । ७. कर्मविभागं चफलोदेशेन क्रियमांणं वलार्थमी श्वरार्थंक्रियमा०···णमपर्गार्यमिति । ८ गुणो । ९. स्वव्थापारेषु । १०. सक्तिर्न । ११. गुणस्संमूढास्सज्जंते । १२. कृत्सविन्न विघालपेत् । १३. ०सम्पूटा इत्युक्ता अनुवादः । १४. मदा । १५. यातिकान् । १६. कत्स्नविज्ञानकर्मविसुश्चकारी । १७. युद्धिचालनं ।

सक्तत्वाच्छरीरपातेनापि न ते बोधयितुं शक्यन्ते[1]। यत्पुनरागत्य पृच्छेयुस्ततो बोधयितव्या इति ॥ २९[2] ॥

कश्चिद्विशेषमुपदर्शयन् प्रकरणार्थमुपसंहरति—

मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा[3]।
निराशीर्निर्ममो भूत्वा युद्धयस्व[4] विगतज्वरः ॥३०॥

मयि परमेश्वरे ब्रह्मणि सर्वाणि (कर्माणि) कृत्वा (तानि) सन्न्यस्य निक्षिप्य सर्व एवायं क्रियाकलापो ब्रह्मणोधिकारश्चेतनत्वात्[5]। कार्यकारणयोश्चानन्यत्वात्तदात्मकत्वं[6] प्रतिपद्य तत्प्राप्तये कल्पत इत्यध्यात्मचेतसा फलप्रार्थनारहितः। निर्गतं ममत्वं यस्यासौ निर्ममः। नास्ति मे कर्म ब्रह्मण एव तत् कृतं मयि। एवं[7] सङ्कल्पो भूत्वा युद्ध्यस्व विगतशोक इति ॥३०॥[8]

ये विद्वांसः स्वार्थं लोकसंग्रहार्थं च कर्म न त्यजन्ति[9] तेषामयं गुण इत्याह—

ये मे मतमिदं नित्यमनुवर्तन्ति मानवाः।
श्रद्धावन्तोनसूयन्तस्ते[10] विमुच्यन्ति कर्मभिः ॥ ३१ ॥

ये[11] पुनरेतन्नाभिनन्दन्ति [12]सांख्यादिदर्शनविभ्रान्तचेतसस्तेषामधःपातं दर्शयन्नाह—

(ये त्वेतदभ्यसूयन्तो नानुवर्तन्ति मे मतम्।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥ ३२ ॥)

---

१. कर्मसु ते सक्तात्तानमरीचतेनापि न ते वाधयितु शक्यंते। २. यदि पुनरागत्पृछेयुस्नतो वोधयितव्या इति २८। ३. ०चेतसा। ४. निराशोर्निममो भूत्वा युझ्यस्व। ५. ब्रह्मणोधिकारो चेतनत्वात्। ६. ···करणयोश्चानन्यत्वान्नदात्मकत्वं। ७. मयीवं। ८. इति २९। ९. य विद्वांसंस्स्वार्थं लोकसंग्रहार्थं च कर्मणत्यजंति। १०. श्रद्धावंतीनसूय०। ११. थे। १२. साख्यादिदर्शनविभ्रात०।

ये त्विति। ये पुनर्मे मतं नानुवर्तन्ते तान् सर्वेभ्यो[1] ज्ञानेभ्यो विमूढान् विद्धि नष्टान् स्वर्गापवर्गप्राप्त्यभावान्निरयगामित्वात्[2] ॥ ३२ ॥

कस्मात् पुनर्विद्वांसोपि सन्तः[3] केचिद्भगवतो मतं नानुवर्तन्त इत्याशङ्क्याह[4] —

(सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥३३॥)

सदृशमिति[5]। ज्ञानवानपि प्रकृतेरनुरूपं चेष्टते। प्रकृतिर्जन्मान्तरकृतं[6] कर्म वासनारूपेण[7] चेतस्यवस्थितं वाससीव रागः। तत्र प्रकृतिमेव यान्ति भूतानि। निग्रहः शास्त्रकृतो नियमोनुशासनमिदं कर्तव्यमिदं नेति। स तेषां किं[8] करिष्यति। अतो युक्तं केचिन्मे मतं नानुवर्तन्त इति[9] ॥ ३३ ॥

ये पुनर्मदीयं मतमनुवर्तन्ते जन्मान्तरकृतपुण्योपचयवशात्तेषामयमुपदेशः[10] —

(इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥)

इन्द्रियस्येति। इन्द्रियस्यार्थे चक्षुषः श्रोत्रस्यार्थे[11] स्वे स्वे विषयेनुकूले[12] रागः प्रतिकूले[13] द्वेषः। तयोर्न वशमागच्छेत्।

---

१. नानुवंर्तते तान् सार्वेभ्यो। २. स्वगायवर्गप्राप्तभावान्निरयगामित्वात् ३१। ३. कस्यात्पुनीर्वद्वांसोपि संतः। ४. मतां नानुवंर्तत इत्याशङ्याह। ५. सदशमिति। ६. ०तिजेन्मांतरकृतं। ७. वासनानुपेण। ८. कि। ९. अतोयुक्तंचित्मेमतांवांनानुवर्तत इति ३२। १०. पुनर्मदिंयं मतमनुवर्तते जन्मांतरकृत्पुण्योपचयवशात्रषामसुर्देशः। ११. इद्रियस्येति इद्रियस्येंद्रियस्यार्थे श्रीत्त्रस्यार्थे। १२. वियपनुकुले। १३. प्रतिकुले।

यतस्तौ हि मुमुक्षोः परिपन्थिनावन्तरायौ विघ्नकारिणौ[1] । तस्मात्तस्कराविव तौ दूरतः परित्यजेत् ॥ ३४ ॥[2]

न च परधर्मे रागात् प्रवर्तितव्यम् । स्वधर्मे च युद्धादौ प्राणापहारितया द्वेषान्निवर्तितव्यमित्याह[3]—श्रेयश्चर्तुम् इत्यर्जुनोक्तमनुस्मरन्—

(श्रेयान् स्वधर्मोऽधिगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मोदयादपि ॥ ३५ ॥)

श्रेयानिति[4] । स्वधर्मोधिगुण इति कर्तव्यताहीनोपि यथाकथञ्चिदनुष्ठितोपि[5] श्रेयान् प्रशस्ततरः[6] । कुतः । परधर्मात् स्वनुष्ठितात्[7] । [8]सम्पूर्णेतिकर्तव्यताकात् । कस्मादेतदेवम्[9] । यतः स्वधर्मे वर्तमानस्य संग्रामादौ निधनं मरणं श्रेयः परधर्मकृतादुदयाज्जीवनादित्यर्थः । अपिरभ्युपगमे । यद्यपि[10] स्वधर्मे निधनमनभ्युदयः (वरम्) परधर्मकृतोभ्युदयो (न) वरम्[11] । न पुनरेतदेवम्[12] । किन्तु स्वधर्मादभ्युदयः परधर्माश्रयादनभ्युदय[13] इति । स्वधर्मः कर्तव्यः[14] । अर्थवादोयम् ॥ ३५ ॥

जानन्नपि[15] तत्परित्यागे न केनायं प्रेरितः । पापमेवानुधावतीत्यर्जुन उवाच—

(अथ केन प्रयुक्तोयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥)

---

१. ···र्नघश्यमागछेधतस्त्यौ हि मुमुक्षोषरियथिनावंतरायोविघकारिणै । २. तस्मान्तस्कराविर्वतो हरतः परित्यजेत् ३३ । ३. प्राणाद्विहारितया द्वेषात्यर्थब्दतो इत्याह । ४. श्रेयान्निति । ५. ···चिदनुतिष्टतोपि । ६. पशस्तरतः । ७. परधर्मान्स्वनुष्टितात् । ८. संपूर्णेनिक । ९. कस्मादितदेवं । १०. यघापि । ११ परधर्मकृतो नभ्युदयो वरं । १२. न पुनरेतद्वेवं । १३. परधर्माश्रानभ्युदय । १४. कर्तषो । १५. जानन्तपि ।

अथ केनेति। केनायं प्रयुक्तः प्रेरितः पापमाचरति। अनिच्छन्नपि[1] बलादिवाक्रम्य गले पादुकया[2] प्रयोजितः प्रेरित इति॥ ३६॥

भगवानुवाच—

(काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥ ३७॥)

काम एषेति। कामः सूक्ष्मः[3]। स एव केनचित् प्रतिहतः क्रोधः संपद्यते। प्रार्थितवस्त्वप्रतिपद्यतो[4] हि क्रोधो जायते। रजोगुणः समुद्भव उत्पत्तिस्थानं[5] यस्य सोयं रजोगुणसमुद्भवः। महदशनं यस्यासौ महा(श)नस्त्रैलोक्यमपि ग्रसते। महांश्चासौ पाप्मा समस्तव्यसनहेतुरित्यर्थः। विद्धि जानीहि। इह मोक्षमार्गे वैरिणमेतम्॥ ३७॥[6]

अर्जुन[7] उवाच—

(भवत्येष कथं कृष्ण कथं चैव विवर्धते।
किमात्मकः किमाचारस्तन्ममाचक्ष्व पृच्छतः॥ ३८॥)

भवतीति॥ ३८॥

(श्रीभगवानुवाच—

(एष सूक्ष्मः परः शत्रुर्देहिनामिन्द्रियैः सह।
सुखतन्त्र इवासीनो मोहयन् पार्थ तिष्ठति॥ ३९॥)

एष सूक्ष्म(:) परः शत्रुर्देहिनामिन्द्रियैः सहेति सुखतन्त्र इवासीनो[8] मोहयन् पार्थ तिष्ठति॥ ३९॥

---

१. अनिछन्नपि। २. पादकया। ३. सूक्ष्मा। ४. पतीघतो। ५. उत्पतिस्थानं। ६. वेरिणतेतम् ३५। ७. अर्जन। ८. मुखतंत्र इवासानो।

स एव कलुषः[1] क्षुद्रश्छिद्रप्रेक्षी[2] धनंजय।
रजःप्रवृत्तो[3] मोहात्मा मानुषाणामुपद्रवः॥ ४० ॥
कामक्रोधमयो घोर[ः] स्तम्भहर्षसमुद्भवः[4]।
अहङ्काराभिमानात्मा[5] दुस्तरः पापकर्मभिः॥ ४१ ॥
हर्षमस्य निवर्त्यैष शोकमस्य ददाति च।
भयं चास्य करोत्येष मोहयंस्तु मुहुर्मुहुः॥ ४२ ॥

इति सांख्यमतानुसारिणः[6] केचनाधीयते। ते (च) पञ्च श्लोका न व्याख्याताः॥ ४०–४२ ॥

कथं वैरित्वमिति दृष्टान्तेन दर्शयति—

(धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्॥ ४३ ॥)

धूमेनेति। यथोल्बेन गर्भवेष्ट(ने)नावृतो गर्भस्तथा तेनेदमावृतं दृष्टम्॥ ४३ ॥

शब्देन किमुच्यत इति विवृणोति[7]—

(आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन वा॥ ४४ ॥)

आवृतमिति। एतेन[8] ज्ञानमावृत(म्)। कस्य (केन)। ज्ञानिनो[9] नित्यवैरिणा कामरूपेण नानारूपेण। ज्ञानिनो ह्यसौ नित्यवैरी। कथम्। कामं दूरतः[10] कृत्वापवर्गमधिगन्तुमिच्छति[11] ज्ञानी। कामश्च[12] तदीयं ज्ञानं तिरस्कृत्य संसारे क्षेप्तुं[13] यतते।

१. धनुष। २. क्षुद्रद्रपेक्षी। ३. ०प्रवृतो। ४. स्तंभहर्षक्षुमुद्भवः। ५. अहंकारीभिमानात्मा। ६. सांखसतानुसारिणः। ७. दष्ट...विवृणोति ३६। ८. एतेत। ९. ज्ञानीनो। १०. हरतः। ११. ...मधिगछतुमिछति। १२. कामतश्च। १३. क्षेप्तु।

पुनरज्ञो यत्नं[1] कृत्वा काममेवानुवर्तते । न तस्य विरोधस्तेन[2] । ज्ञानम् इत्युपपन्नं विशेषणं नित्यवैरिणेति । दुष्पूरेण दुःखेन पूर्यते दुष्पूरः । न विद्यते अलं पर्याप्तिरस्येत्यनलः ॥ ४४ ॥

किमधिष्ठानोसौ ज्ञानमावृणोतीत्याह[3]—

(इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४५ ॥)

इन्द्रियाणीति[4] । इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमाश्रयः[5] । तैरिन्द्रियादिभिर्ज्ञानमावृत्य देहिनं मोहयति मोहयित्वा कार्येषु वर्तयति ॥ ४५[6] ॥

यत एवम्—

(तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहीह्येनं ज्ञानविज्ञाननाशनम् ॥४६॥)

तस्मादिति । इन्द्रियं[7] मनो बुद्धिं[8] (च) नियम्यादौ प्रथममेव पाप्मानमेनं[9] शत्रुं जहि विनाशय । ज्ञानविज्ञाननाशनम् । ज्ञानमात्मयाथात्म्यपरिज्ञानम्[10] । विज्ञानम् (विशिष्टं तज्ज्ञानम्) । तदुभयनाशनम्[11] । तदपि पृथक्कर्तव्यतया विधीयते श्रुतौ—विज्ञाय प्रज्ञां कुर्वीत—इति । अन्यथा ज्ञानविज्ञानशब्दयोरर्थे भेदो न स्यात्[12] ॥ ४६ ॥

कस्य सन्निधौ कामस्तिष्ठतीति साक्षाद्दर्शयितुमाह स्थूलं शरीरमपेक्ष्य—

---

१. जत्मिं । २. ···वर्तते न तस्य विरोधे न बोधवे । ३. ०त्याह ३७ । ४. इंद्रियाणिति । ५. ···माश्रेयः । ६. वर्तयति ३८ । ७. इंद्रियम । ८. बुद्धिनि० । ९. प्रथमतेस्याक्ष्मतमेनं । १०. ज्ञानमत्मयथात्मपरिज्ञानं । ११. तदुयासिनं । ।१२. ···शद्दयोरर्थेभेदो न स्पात् ३९ ।

(इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४७ ।)

इन्द्रियाणीति । इन्द्रियाणि पराण्याहुर्विषयग्राहकत्वेनोत्कृष्टत्वाच्च परस्त्वम् । इन्द्रियेभ्यः[१] परं मनः सौक्ष्म्यात् प्राधान्याच्च[२] । मनसस्तु परा बुद्धिः[३] । स एव हेतुः । अथ बुद्धिमनसोः[४] को भेदः । संकल्पविकल्पवृत्तिहेतुर्मनः । बुद्धिरध्यवसायात्मिका । यथा स्थाणुर्वा पुरुषो[५] वेति संशये स्थाणुरेवायमित्यध्यवसायः[६] । यो बुद्धेः परतः स कामः परामृश्यते[७] तस्य प्रकृतत्वात् । न पुनरात्मा स इति निर्दिश्यते पूर्वत्रासंकीर्तनात् ॥ ४७ ॥

इदानीमुपसंहरति—

(एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥४८॥)

एवमिति । एवमुक्तेन प्रकारेण बुद्धेः परं कामं बुद्ध्वा[८] जहि शत्रुं महाबाहो । कामरूपं दुःखेनासदनीयम्[९] । किं कृत्वा । संस्तभ्यात्मानमात्मनि[१०] संस्तभ्य निरुद्ध्य चात्मानं क्षेत्रज्ञमात्मनि[११] परमात्मनि संयोज्यैकीकृत्य[१२] ब्रह्मरूपेणावस्थाप्य कामं[१३] जहीति तात्पर्यार्थः[१४] ॥ ४८ ॥

इति श्रीभगवद्भास्करकृते[१५] गीताभाष्ये
तृतीयोध्यायः ॥

---

१. ०त्वेनचोत्कृष्टात्वात्यस्त्वं इद्रियेभ्र्यः । २. प्राधान्याश्च । ३. मतसस्तु परा बुद्धिस् । ४. ···०मनसो । ५. पुरोषो । ६. स्थाणुस्वैत्यध्यवसायः । ७. बुद्धिः परतस्स कामः परामृष्यते । ८. बुद्धेपरं कामबुद्धा । ९. कामरूपदुःखेनासदनीये । १०. संस्तंभ्यात्मानम् । ११. क्षेत्रज्ञात्मनि । १२. युज्यैकीकृत्य । १३. ···वस्थापकामं । १४. तत्पार्यार्थः ४१ । १५. ···भगवभ्दकरकृते ।

अथ चतुर्थोऽध्यायः

श्रीभगवानुवाच[1]—

(इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥)

इममिति । विवस्वानादित्यः तस्मै[2] प्रोक्तवानहमव्ययम् । नित्यत्वं[3] नित्यवेदविहितत्वात् । स च विवस्वान् स्वपुत्राय मनवे[4] दण्डधराय (प्राह) मनुरादिराजायेक्ष्वाकवेऽब्रवीत्[5] ॥ १ ॥

(एवं परम्पराख्यातमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥ २ ॥)

एवमिति । एवं परम्पराख्यातमाचार्यपरम्परया[6] कथितमिमं राजर्षयो विदुः । राजानश्च ते दर्शनशक्तियुक्ताश्चेति[7] राजर्षयः । स योगः कालेन महतेह लोके[8] कथञ्चिद्विषयासक्तचेतसं राजानमासाद्य[9] नष्टः । परान् शत्रूंस्तापयतीति हे परंतप[10] ॥ २ ॥

(स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥)

स एवेति । स एव सनातनो योगो मया प्रोक्तः । कस्मात् । भक्तोऽसि मे सखा चेति[11] । रहस्यं ह्येतन्मयोक्तमप्रकाशितम् । यन्मयि भक्तत्वसखित्वाभ्यां[12] नैतदवज्ञातुमर्हसि । इदानीं

---

१. श्रीभगवाच । २. स्वानादिग्त्यस्तस्मै । ३. नित्यं । ४. मतवे ।
५. …राजायेक्ष्वाकव्रवीत् । ६. परस्पुराख्यातमा० । ७. दर्शनशक्तियुक्तेश्चेति ।
८. त्वोके । ०९. थ्रिचिद्विषयत्सक्तचेतसां राजामासाद्य । १०. परतप ।
११. सख्या चेति । १२. हेतन्मयोक्तमप्रकाशतीयमयिभक्तुत्व० ।

युद्ध(ाय) प्रोत्साहनार्थं प्राप्तावसरं[1] प्रोक्तमित्यभिप्रायः ॥ ३ ॥

पूर्वापरविरोधं पश्यन्नर्जुन उवाच—

(अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥)

अपरमिति। भवतो जन्मापरमिदानीन्तनम्[2]। परमादित्यस्य सर्गादौ। कथमेतद्विजानीयां ज्ञातुं शक्नुयाम्। त्वमादौ प्रोक्तवानिति[3]। यथाविरोधस्तथा मां प्रतिपादयेः ॥ ४ ॥

अमरजीवव्यतिरिक्तेश्वरप्रतिपादनद्वारेणोत्तरं[4] दीयते—

(बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥ ५ ॥)

बहूनीति[5]। बहूनि मे व्यतीतानि[6] प्रादुर्भावरूपाणि। मयि सर्वाणि—इति वचनमिदानीं सिद्धं[7] भवति। अन्यथा व्यतिरिक्तेश्वराभावे[8] क्व कर्माणि सन्न्यसेरन्। तान्यहं वेद। त्वं तानि न वेत्थ जानास्यनीश्वरत्वात्[9] ॥ ५ ॥

कथं पुनरीश्वरोजः[10] सन् सम्भवतीति[11] चोद्यमाशङ्क्य[12] निराकरोति—

(अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ ६ ॥)

---

१. युद्धप्रोत्साहनार्थं प्रासावसरं। २. ०मिदांनीततं। ३. ज्ञातु न शक्नुयात्त्वमोदौ प्रोक्तवनिति। ४. भरजीव्यतिरिक्रश्वर प्रतिपादनद्वारोणोत्त०। ५. वहुनीति। ६. वद्वनि मे व्यतीत्तान्दि। ७. मपित्साणीतिवचनमिदांनीं सीद्धं। ८. ष्यतिरिक्लेश्वराभवि। ९. वेद तातामिनास्यनीश्वरत्वात्। १०. पुनरीश्वराजः। ११. सभ्यवसीति। १२. चोघमाशक्य।

अज इति। न जायते अविनश्वर आत्मा स्वरूपं यस्या-
सावव्ययात्मा। प्रकृतिं स्वामवष्टभ्य। प्रकृतिस्तेजोबन्नलक्षणा[1]
परमेश्वरादुत्पन्ना। (ताम्) अवष्टभ्य आश्रित्य सम्भवाम्यात्म[3]-
मायया। मायाशब्दः प्रज्ञावचनः। स्वेच्छयेत्यर्थः[4]। नाहं
धर्मप्रयोज्यः संसारी[5]। वश्यप्रकृतित्वाद्देहोपादानान्यसौ[6]
स्वेच्छया ग्रहीष्यतीति (अ)विरोधः[7] ॥ ६ ॥

कदा पुनरात्मानं सृजसीत्याह—

(यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ७ ॥)

(यदेति)। यदा हि धर्मस्य वर्णाश्रमादिलक्षणस्य
ग्लानिर्हानिः[8]। अभ्युत्थानं वृद्धिरधर्मस्य। तदात्मानं सृजा-
म्यहम् ॥ ७ ॥

तत्—

(परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ८ ॥)

(परित्राणायेति[9]।) परित्राणाय साधूनां स्वकर्मनिरतानाम्।
विनाशाय च दुष्कृताम्। एवं धर्मसंस्थापनाय युगे युगे
(सम्भवामि) ॥ ८ ॥

(जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥)

जन्मेति। जन्म मथुरादिषु[10]। कर्म च साधुपरित्राणलक्षण-

---

१. न जायतविनश्वर…तेजोवन्नलक्षणा। २. आधोवष्टभ्याश्रित्य। ३. संभावाभ्यात्म०। ४. स्वेघयेत्यर्थो। ५. संसारि। ६. …प्रकृत्वादेहोपदा०। ७. समेछमा न भविष्यत इति विरोधः। ८. लानिर्हानिः। ९. परित्राणापिति। १०. जन्म मृथुरादिषु।

मुक्तप्रकारं दिव्यममानुषं (यो वे)त्ति स त्यक्त्वा[1] देहं पुनर्जन्म न गच्छति[2]। मामेव प्राप्नोतीति। ननु[3] चैवं शब्दश्रवणमात्रेण[4] सर्वलोको मुच्येत[5]। उपनिषदुक्तपरमात्मज्ञानोपासनाभ्यां[6] यावज्जीवं कृताभ्यां स्वाश्रमविहितकर्मयज्ञाभ्यां[7] मुक्तिरिति स्थितम्[8]। इहापि च यज्ञानुष्ठानादपवर्ग[9] इति स्थापितं प्रत्युद्ध्रियेत[10]। अत्रोच्यते—नायं विरोधोस्ति। ईश्वरः स्वतन्त्रः समस्त(संसार)परिपालनाय[11]। प्राकृतस्तु तत्परस्तदुपासनया मुच्यत इत्यनवद्यम्[12] ॥ ९ ॥

उत्तरश्लोके चायमर्थः स्पष्टीक्रियते—

(वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥)

वीतेति। (वीताः) रा(गश्च भयं च क्रोधश्च ते विगता ये)भ्यस्ते[13] वीतरागभयक्रोधाः। क्वचिद्वस्तुनि स्नेहमात्रं रागः। मन्मया (मा)मात्मत्वेनाभिप्रपन्ना नित्यमेवं स्वरूपं चेतसा[14] मामेव चोपाश्रिताः[15]। नान्योस्माकं[16] शरणमस्तीत्युभयविशेषणोपादानम्। यथा कश्चित् स्त्रीमयो भवति न शरणं प्रपन्नः। किन्तु राजानं योगक्षेमावहं ज्ञानतपसा ज्ञानं च त(प)श्च ज्ञानत(पः। त)योर्द्वन्द्वैकवद्भावः[17]। सर्वो द्वन्द्वो एकवद् भवति—इति[18]

---

१. ···व्यमानुष्यत्तिं स त्यक्त्वा। २. गछति। ३. न तु। ४. शश्रवर्णमात्रे। ५. मुच्यत। ६. नाषत्स च परमात्मज्ञानोपासनाभ्यां। ७. कृताभ्यास्वाश्रमाविहितकर्मार्यक्षाभ्यां। ८. स्थीतम्। ९. इहापिश्चमानुष्टानादयवर्ग। १०. प्रत्युद्धियेत। ११. विरोधोस्तीस्वरः स्वतंत्रः समत्सपरि०। १२. प्रातत्परस्तुदुपासनषा मुच्यत इत्यनवधं। १३. वोतेति ग्वेबाताश्यस्तेवीत०। १४. नित्यमेव स्वरूपस्मचेतसो। १५. चापाश्रिता। १६. तान्योस्माकं। १७. द्वंद्वैकधभ्दावः। १८. द्वंद्वो भवभ्दवतीति।

स्मरणा(त्)। ज्ञानेन तपसा च पूता इत्यर्थः। ज्ञानमेव[1] तपो ज्ञानतपः[2] इति केचित्। तदयुक्तम्[3]। ज्ञानस्य तपःशरणानर्थक्यात्[4]। ज्ञानेन[5] पूता इति सिद्धत्वात्। नहि ज्ञानेन सदृशम्—इति[6] चोक्तत्वात्॥ १०॥

ननु ज्ञानतपोभ्यां (भक्ता एव) मद्भावं प्रतिपद्यन्ते[7] नेतरे। किन्नु[8] खलु कारणम्। अत आह—

(ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥ ११॥)

य इति। ये फलार्थिनो मां (यथा) प्रपद्यन्ते तांस्तथैव भजामि फलप्रद(ानेन)। येप्यपवर्गार्थिनो (मां) भजन्ते तांश्चापवर्गप्रदानेनानुगृह्णामि[9]। तथा च वाजिनां श्रुतिः—तं यथा-यथोपासते—इति। अतो मम वर्त्म फलार्थिनो[10] मोक्षार्थिनश्चोभयार्थिनो मनुष्याः सर्वशः सर्व एव तृतीयस्य राशेरभावात् (अनुवर्तन्ते)॥ ११॥

ते च फलार्थिनो मो(क्षं न काङ्क्षन्तीत्याह[11])—

(काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा॥ १२॥)

काङ्क्षन्त इति[12]। कर्मसम्बन्धिनीं[13] सिद्धिं काङ्क्षन्तो यजन्ते

---

१. जानामेव। २. ज्ञानतपो–ला। ३. यदंयुक्तम्–ला। ४. शरर्णनर्थक्यात्। ५. तानेन। ६. शदशमिति। ७. …तपोभ्यांर्वप्रतिपद्यंते। ८. किन्न। ९. यं इति–व षे फजाथिनो मां प्रति पद्यंनतां…फलप्रात्थार्थोप्य…०त्याह पवगोर्थिनो भअंते तांश्वापवर्गप्रदाने नातु गृह्णामि–व। १०. वस्त्रार्थं फलार्थि०। ११. व–कोषे मो इति नास्ति, ल–कोषे तु मो इत्येत्तस्यानन्तरं कांक्षन्नि इत्यस्मात् पूर्वमिषद्रिक्तं स्थानं वर्तते। १२. कांक्षत हति–व। १३. संबंधिनो–व।

देवता यागेन पूजयन्ति । यतः क्षिप्रं[1] हि मानुषे लोके (इति) अनुवादः[2] । कर्मविपरिणामस्यानियतकालत्वात्[3] मानुषे लोक इति नियमार्थम् ।

कर्मजा सिद्धिर्मनुष्यलोक एव (मनु)ष्याधिकारत्वाच्छास्त्रस्य[4] । ज्ञानजा तु सिद्धिर्ब्रह्मलोका(दाव)पि[5] भवति । श्रुतिरपि--तद्यो यो देवानां[6] प्रत्यबुद्ध्यत स एव तदभवत् (तथ)र्षीणां तथा मनुष्याणाम्[7]—इति । तत्रैव ज्ञानप्रकर्षमासाद्य[8] मुच्यते । तथा च पुराणस्मृतिः—

ब्रह्मणा सह ते[9] सर्वे (सम्प्राप्ते प्रति)सञ्चरे ।
परस्यान्ते[10] कृतात्मानः प्रविशन्ति[11] परं पदम् ॥ इति ।

इह च वक्ष्यति—दैवी सिद्धिर्विमोक्षाय—इति । तस्मान्मनु-(ष्येण त्वयार्जु)नेनावश्यं कर्म[12] कर्तव्यमिति तात्पर्यार्थः ॥१२॥

मनुष्याः सर्वे[13] मम वर्त्मानुवर्तन्त[14] इत्युक्तम् । के पुनस्ते । केन वा[15] ते सृष्टा इत्याह[16]—

(चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥)

चातुर्वर्ण्यमिति । चत्वार एव वर्णाश्चातुर्वर्ण्यम्[17] । तन्मया

---

१. क्षिब्ध्य–व । २. मानुषेलेकि मनुवादः–व । ३. कमपरिणामस्यानिलतकाल०–व । ४. एवय्याधिकारत्वाछास्त्रस्य–व । ५. ज्ञानाजा तु सिद्धिर्वह्मलोका दिद्यपि–व । ६. देवार्ना—व । ७. स सः णां तथा मनुष्याणां–व । ८. ज्ञामप्रकर्षमासाघ–व । ९. मंहते–व । १०. यद्दस्यांते–व । ११. प्रविश्यंति–व । प्र इति अस्पष्टम्–ल । १२. तस्मातुष्यनेताघश्यं कर्म–व । १३. मनुर्ष्यं सर्वे–व । १४. वर्त्मानुवंतंत्–व । १५. केतवा–व । १६. सृष्ट इति–व । १७. चालुर्वर्ण्यं–व ।

सृष्टम् । कथम् । गुणकर्मविभागशः । गुणविभागेन कर्मविभागेन[१] च । (तत्र ब्राह्मणस्य) ऋजुतानृशंसत्वं[२] प्रसन्नचित्ततेत्यादयो गुणाः सत्त्वप्रधानत्वात्[३] । क्षत्रियस्य शौर्यतेजोधृत्यादयोल्पसत्त्वानुविमर्शत्वात्[४] । वैश्यस्य रजःप्राधान्यादुपष्टम्भश्चलचित्तता[५] च गुणः । शूद्रस्य तमःप्राधान्याद्दासता[६] (गुणः । अथ) कर्म अध्यापनादि ब्राह्मणस्य रणादि[७] राजन्यस्य कृष्यादि वैश्यस्य[८] शुश्रूषा शूद्रस्येति । तस्माद्ये[९] यथायोगं कर्मस्वधिकृता[१०] (तथा ते) मम वर्त्मानुवर्तन्ते[११] । तस्य कर्तारमव्ययं (मां विद्धि[१२] ।

ननु विप्रतिषिद्धमभिधीयते[१३] । नायं विरोधः । संकल्पमात्रेण जगत्सृष्टिस्थितिभङ्गकर्तृत्वात् कर्तारं[१४] स्त्रीपुंयोगेनेदानीमेवानुत्पादनादकर्तारं विद्धि । [१५]चातुर्वर्ण्यग्रहणं जगत्प्रदर्शनार्थम्[१६] ।

यद्वा स्वातन्त्र्येण पृथिव्यादिनिर्मा(ण)सद्भावात्[१७] कर्तृत्वम् । प्राणिकर्मसापेक्षत्वेन सापेक्षत्वादकर्तृत्वम् ॥ १३ ॥

---

१. कमीवेभागेन–व । २. मार्जतानृशंसस्य-व । मार्जवानृशंसस्य–ऊ० । ३. गुणः···सत्व–व । ४. ···दयोल्पसत्त्वानुपिमर्शत्वात्–व। ···दयोल्पसत्त्वानुवि··· त्वात्-ल । ५. वैशस्य रजःप्रधान्यादुपष्टंभश्चलचित्तना च–व । ६. ···प्राधान्यादावत्सता–ल । तथा-व । ७. ···नादिराजन्यस्य–ल । कर्माध्ययनादि ब्राह्मणोरनाधिराजन्वस्य-व । ८. वैषस्य–व । ९. तस्मान्मे-व । तस्मात्ते–ल । १०. ···यथायोग···धिकृता–व, ल । ११. वर्तते । १२. तस्य···कर्त···स्य कर्तारं—ल । तस्य कर्तास्य कर्तारम्–व । १३. मभिधीयंते–व । १४. ···त्रेण· गत्सृष्टिभंगकतृत्वात् कतरिं–व । १५. चानुर्वर्ण्य०–व । १६. न गगत्प्र । दर्शनार्थ–व । १७. स्त्रीपुंयोगेन···पृथिव्यादिनिर्मा(ण)–अशोयं चतुर्दशाङ्काङ्कितश्लोकभाष्यस्थः । अत्रोच्यते—अयमत्र एतस्मात् परं वर्तते व कोषे । तत्र पाठस्तु अत्रोच्यतेऽयमत्रीयुथोगौवदानीमेवानुसादनादकर्तारं विद्धे चातुर्वर्ण्य ग्रहणं नगगत्प्रदर्शनार्थ यद्वा स्वातंत्र्येण पृथिदिनिर्मा ४भिप्रायःभिप्राय इति ।

न च जगत्सर्गादीनि कर्माणि मां लिम्पन्ति[1] तदाह—

(न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
मामेवं योभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥)

न मामिति । न मां कर्माणि लिम्पन्ति[2] । कुतः । न मे कर्मफले स्पृहा । नहि सृष्ट्यादिकर्मणा प्राप्तव्यं साध्यं ममास्ति आप्तकामत्वात्[3] । मामेवं योभिजानाति कर्मभिर्न स[4] बध्यते ।

ननु चाप्तकामत्वादीश्वरं[5] न लिम्पन्ति कर्माणि । अन्यं पुनरनवाप्तकामं सुकृतानि कस्मात् तानि लिम्पन्ति[6] । अत्रोच्यते । अयमत्राभिप्रायः[7]—वीततृष्णत्वमलेपकारणम् । अन्योपि यः स्वव्यापारे वीततृष्णः परमेश्वरार्पितकर्मणि[8] प्रवर्तते सोपि कर्मभिर्न बध्यत इति युक्ततरमुक्तम्[9] ॥ १४ ॥

एतमेव फलवैतृष्ण्यलक्षणं हेतुमुपजीवयन्नाह[10] —

(एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरैः कृतम् ॥ १५ ॥)

एवमिति । एवं ज्ञात्वा[11] कृतं कर्म पूर्वैरपि चिरन्तनैर्मुमुक्षुभिः । कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरैः कृतम् । नेदानीन्तनैरनुष्ठितम्[12] ॥ १५ ॥

तच्च कर्म दुर्विज्ञेयस्वरूपं कथमित्याह—

(किं कर्म किमकर्मेति कवयोप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेशुभात् ॥ १६ ॥)

---

१. सर्गादिनि…लिपंति–व । २. लिंपति–व । ३. प्राप्तव्यं साख्यं ममास्साप्तकामन्वपा मामेवं०–व, कामत्वमामेवं–ल० । ४. कर्मभिन्न स०–व । ५. कामस्वादीश्वरं न लिपंति–व, अक्षराण्यस्पष्टानि–ल । ६. कस्मात्सालिपंति–व । ७. अयमत्री युथो गौनदीमीमे वानुसादनादकर्तारं विद्वे चातुर्वर्ण्यग्रहणं न ग॥त्प्रदर्शनार्थं यद्वा स्वातंत्र्येण पृथिदिनिर्भाभिप्रायः । ८. परेमेश्वरपितिकर्मणि–व, परमेश्वरायेनिकर्मणि–ल । ९. मुक्तं–व । १०. हेतुमुपतीवन्नाह–१४–व । ११. ज्ञात्वा–व । १२. नीदानीतनेरनुष्ठितं १५ ।

किमिति। किं कर्म किमकर्मेति[१] कवयोपि प्रत्यक्षादि-षट्प्रमाणकुशला[२] अप्यत्र कर्मप्रविभागे[३] मोहिताः। प्रविभागं ज्ञातुमशक्तास्ते। तत्[४] कर्म (ते) प्रकर्षेण वक्ष्यामि। यज्ज्ञात्वा कृत्वा[५] च कर्मप्रकरणात्—कुरु कर्मैव—इति चानन्तरं कर्मानुष्ठानस्य विहितत्वान्मोक्ष्यसे विमोक्षसेशुभात् संसारपरिवर्तात् ॥१६॥

स्यान्मतं[६] कर्माकर्म च प्रसिद्धम्। किमत्र बोद्धव्यमित्याशङ्क्याह[७]—

(कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः।
अकर्मणोपि बोद्धव्यं गहना कर्मणो गतिः ॥ १७ ॥)

कर्मेति[८]। सत्यं श्रुतिस्मृतिविहितं कर्म प्रसिद्धं तथापि तस्य स्वरूपं[९] बोद्धव्यमस्त्यपवर्गाधिकृतेन पुरुषेण। बोद्धव्यं च विकर्मणः। विकर्म[१०] यच्छास्त्रबाह्यं पाषण्डिभिराचर्यमाणं[११] धातुवादशिल्पकर्मादि च। अकर्मणश्च प्रतिषिद्धलशुनभक्षणादेः। काम्यस्य चापवर्गार्थिनः। तदप्यकर्तव्यमेव। (एवं) च त्रिविधस्यापि गहना गम्भीरा दुर्विज्ञेया गतिः ॥ १७ ॥

प्रविभज्येदानीं निर्णयं करोति—

(कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८ ॥)

कर्मणीति[१२]। नित्ये कर्मणि स्मार्ते[१३] श्रौते च। कर्म

---

१. कीमकर्मेति-व। २. षट्प्रमाण०-व। ३. कर्म विभागे-ल। ४. ज्ञातुमशक्या ते तु-वै। ५. पश्चादा कृत्वा-व। ६. शुभात्मंसारवरिवर्तार्थ-स्यान्मतं। ७. वीधव्यमित्याशंक्याह १६। ८. कर्मति-व। ९ तस्य रूपं-वा। १०. विकर्म-व। ११. पाषांडिभिराचार्यमाणं-व, पाषाण्डिभिराचर्य। १२. कर्मणोति-व। १३ स्मार्ने।

क्रियत[1] इति कर्मफलमुच्यते[2]। फलाभावं यः पश्येदीश्वरोद्देशेन[3] क्रियमाणत्वात्। तद्व्यतिरिक्तोभ्युदयः—सर्वं एते[4] पुण्यलोका भवन्ति—इत्येवमादिश्रुतिप्राप्तो[5] वार्यते। अकर्मणि[6] काम्ये प्रतिषिद्धे च कर्मफलभावं[7] काम्ये स्वर्गपश्वादि यथाश्रुतं प्रतिषिद्धे च नरकपातादिर्विगर्हणां[8] च। उभयत्र[9] विषय-सप्तमी। न पुनरधिकरणसप्तमी[10]। यथा शरावे बदराणीति[11]। तदेतत्पश्येत् विचारयेत्। ज्ञात्वा चैतदुभयं परिहरेदिति। स बुद्धिमानध्यात्मशास्त्रविहितबुद्धित्वात्। स च युक्तो योगी कृत्स्न-कर्मकृत्। कृत्स्न आत्मा[12]। तदर्थं कर्म करोतीति कृत्स्न-कर्मकृत्[13]।

न चापवर्गो नाम कर्मणः[14] फलं ज्ञानकर्मभ्यां पूर्वकृतकर्म-विधिनिवृत्तिद्वारेण[15] तस्याभिव्यज्यमानत्वात्[16]। यथा प्रदीपेना-न्धकारनिवृत्तिद्वारेण[17] घटादिरभिव्यज्यते। मोक्षो हि नित्य एव न घट इव कुम्भकारेण क्रियते। अतो युक्तं कर्मण्यकर्म यः पश्येदिति।[18]

अन्ये पुनरन्यथा (व्या)चक्षते। काम्ये[19] कर्मण्यकर्म यः पश्येत् फलाभावम्। अकर्मणि नित्ये कर्मापवर्गानुगुणं फलं[20] पश्येदिति।

---

१. क्रियत्–व। २. ···मुच्यत–व। ३. फलाभावे यः पश्ये इश्वरो-देशेन०–व। ४. राते। ५. ···०प्रासो–व। ६. अकणि–व। ७. कर्म-कलभावं–व। ८. नरक पातादिशिः विगर्हणा च–व, नरकपातादिशिविगर्हणा च–ल०। ९. चोभथत्र–च। १०. ···सजमी–व। ११. शरोवेवदराणोति। १२. योगी कृत्स्त्र कर्मकत्स्न आत्मा–व। १३. कृत्स्नकर्मकृत्–व। १४. वाम कर्मणः–व। १५. ···कर्मविधानिवृत्ति०–व। १६. तस्याभिव्यत्यमानक्ष्वात्–व तस्याभिव्यज्यमाणत्वात्–ल। १७. प्रदोयेणान्ध०–ल। प्रदोपेणाध०–व। १८. कुंभकारेण क्रियतेतीयुक्तं कर्मण्यकर्मपूवपश्यदिति–व। १९. कामे–व। २०. पलं–व।

तदिदमसद्व्याख्यानम्[१]। कुरु कर्म—इति कर्मशास्त्रेण नित्यं कर्म मोक्षार्थिनः कर्तव्यमुपदिश्यते[२] न काम्यम्। न चाकाम्येष्वग्निहोत्रादिषु[३] श्रूयमाणफलाभावे कर्तव्यतास्ति[४] विध्यन्तराभावात्। न च फलान्तरं कल्पयितुं शक्यं स्वमनीषिकया[५]। तथा चोक्तम्—अशक्यं हि तत्पुरुषेण ज्ञातुमृते[६] वचनादिति। न चाकर्मशब्देन[७] नित्यं कर्मोच्यते। किं कर्म किमकर्मेति प्रक्रमविरोधात्।[८]

अपरे तु कर्मद्वेषिणः स्वमतिपरिकल्पितश्लोकबाह्यमर्थमस्मिन्नारोपयितुमीहमानाः श्रोत्रियश्रुति(निष्ठ)बुद्धिव्यामोहनं कुर्वन्तो बहु भाषन्ते[१०]। प्रकृतसम्बन्धं च कर्मणि व्यापारे[११] कर्माभावं यः पश्येत्। नहि परमार्थतः[१२] क्रिया नामास्ति[१३]। यथा किल नौयायिनां तीरगतवृक्षेषु गमनबुद्धिर्भ्रान्तिस्तथा[१४] सर्वक्रियाबुद्धिरिति। यथा क्षणिकवादिनो बौद्धा देवदत्तादिगन्तृव्यतिरेकेण गमनक्रियां नेच्छन्ति[१५]। तथाप्यत्र ब्रूमहे[१६]—क्रिया नास्तीति न प्रतिज्ञातुं[१७] शक्यते। अङ्गुलिश्चलति। देवदत्तो गच्छति। (ब्रह्मदत्तः) पचति। पर्णं चलतीति[१८] सर्वप्राणिप्रत्यक्ष-

---

१. तदिममसध्यारत नं–व तदिसममसद्व्याख्या०। २. कर्तव्यसुपदिश्यते–व। ३. चकाम्येग्निहोत्रादिषु–व। ४. कर्तव्यता[illegible]स्र–व। ५. स्वमर्नषिकपा–व। ६. पुषेण जातुमृते–व। ७. ···शब्दोन०–त्र। ८. किर्मकमेमि प्रक्रर्मविरोधात्–व। ९. ···श्लोकवास्वमर्थ०–व। १०. श्रोतृबुद्धिर्व्यामोहनं कुवंतोबदुभाषंते–व। ११. प्रकृतमवध च कर्मणिव्यापारे–व, प्रकृतमवन्धं च कर्मणि०–ल। १२. परमार्थातः–व। १३. नाप्रास्ति–व। १४. गमनुन्बुद्धिभ्रातिस्तथा–व, गमनुनबुद्धिर्भ्रान्तिस्तथा–ल। १५. क्षणिकवोदिनी बोद्धा देवदत्तादिगतृव्यति···नेछंति– व। १६. ब्रूनहे–व। १७. क्रियान्नास्तीति न प्रतिजातु–व। १८. शक्यते गुलितदेयदत्तो गछति पचति यंणं चलतीति–व, ···पलं चलती० ल।

त्वात् । प्रत्यक्षद्रव्यसमवेता हि क्रिया प्रत्यक्षा । अप्रत्यक्षद्रव्यसमवेता त्वनुमेया । यथा पर्णादिचलनेन कार्येण वायोर्गमनमनुमीयते[1] । न चात्र कारणदोषो[2] बाधकप्रत्ययो वा विद्यते । नौयाने तु तत्र कारणदोषस्तीरगतनगगमनभ्रान्तित्वेन च । मृगतृष्णिकायां[3] सलिलं नास्तीति गङ्गाम्भो[4] नास्तीति (न) शक्यते वक्तुम् ।

बौद्धस्याप्येतदेवोत्तरम् । अतः[5] कर्मणोभावप्रतिज्ञा तावदसम्बद्धा । अथ कर्मण्यात्मनि कर्माभावं पश्येदिति व्याख्यायते तदप्यसत्[6] । नहि कर्मशब्देनात्माभिधीयते । तदानीं कर्मणीत्यपि न[7] वक्तव्यम् । सप्तम्यन्तं कर्मशब्दमनुच्चार्यात्मन्यकर्म पश्ये(दि)ति[8] वक्तव्यम् । व्यामोहायात्मन्यकर्म कर्माभावं पश्येदित्युक्ते(:) तत्र कर्म नास्तीति गम्यते । किञ्च[9]—न जायते म्रियते[10] वा—इत्यात्मनि षडपि भावविकाराः पूर्वमेव[11] निराकृताः । अहङ्कारविमूढात्मा[12] इति चोक्तम् । अतः पुनरुक्तमिह स्याद् अप्रस्तुतं[13] च । कर्मप्रकरणं चैतद्वर्तते ।

किञ्च, यद्यकर्मणि[14] च कर्म य इति[15] स्वमनीषिकया व्याख्यातम्[16] । शरीरेन्द्रियव्यापारोपगमेहं सुखमासिष्य[17] इति

---

१. वायोंग०–व । २. कयरण०–व । ३. च गतृस्मिकायां–व । ४. गंगांभो–व । ५. वौद्धस्यापेनदेवोत्तमतः–व । ६. कर्मणो भा भावप्रतिजातावद्धसंवधा अप्यकर्मण्यात्मनिकमोभावं पश्येदिति व्याख्यायेत ततप्पिसत्–व । ७. तदानी कर्मणित्यन–व । ८. सप्तम्यकर्म०–पश्येति ल, सप्तमंतं कर्मशब्दमनुश्चर्यात्मन्यकर्म पश्येति–व । ९. कि च–व । १०. स्तियते–व । ११. पूर्नमेव–व । १२. ···विमूयत्मेति–व । १३. पुनक्तमितस्याद प्रक्ष्मुनं च–व । १४. ···कर्माणि–व । १५. कर्मथ इति–व । १६. ···मनीषिकवाव्याख्यानं–व । १७. शारीरेंद्रियव्यापारापरमेह सुखनासिष्ये–व ।

किल कश्चिन्मन्यते[1]। तदोपरमे कर्मणि[2] कर्मव्यापारं पश्येदिति—तदप्य[प]व्याख्यानं पूर्वं निराकृतत्वात्[3]। कर्मेन्द्रियाणि[4] संयम्य इति यश्चोपरममात्मसुखं मन्यते नासौ पुनस्तत्र कर्मकर्तव्यतां प्रतिपद्यते निमित्ताभावात्। अथान्यः पश्येत् स तर्हि द्रष्टा[5] कर्म करोतीति। ननु पूर्वमेव भगवता नियुक्तो नियतं कुरु कर्म त्वम् इति। इदानीं पुनरुक्तम्। न च गहनत्वादस्यार्थस्य पुनः पुनर्वक्तव्यता। आत्मनि[6] कर्मणस्तूपरमश्च न कर्तव्य इति[7] पूर्वोक्तस्यापि भगवद्वचनस्य विविक्तार्थत्वादनवस्थाप्रसङ्गाच्च[8]। तस्मात् पूर्वोक्त एव श्लोकार्थः[9] ॥ १८ ॥

पूर्वश्लोकार्थमुत्तरेण[10] स्पष्टीकर्तुमाह—

(यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ १९ ॥)

यस्येति। समारभ्यन्त इति समारम्भा व्यापाराः[11]। काम्यत इति कामः फलम्। तत्सङ्कल्परहिता ब्रह्मज्ञानाग्निदग्धकर्माणस्तमाहुर्ब्रह्मविदः पण्डितम्[12]। ये पुनरनात्मविदः कर्म कुर्वन्ति[13] न ते पण्डिता इति। यथाभूतार्थकथनमेतत्[14]।

स्तुत्यर्थोयं[15] श्लोक इति केचित्। तदयुक्तम्[16]। विधिशेषत्वेन हि स्तुतिः प्रवर्तते। यथा पूर्णाहुतिविधेः स्तुत्यर्थः—पूर्णाहुत्या[17]

१. कश्चितमन्यते–व। २. तत्रोपरमेकर्मणि–व। ३. पूर्व नि०–व। ४. कर्मेद्रियाणि–व। ५. स तर्द्धिदष्टा–व। ६. वक्तव्यतात्सनि–व। ७. कर्मणास्सुपरमश्च न कर्तव्यत इति–व। ८. …नवस्याप्रसंगाच–व। ९. पूर्वोक्त ए श्लो०–व। १०. …मुत्तरेणास्य–व। ११. समारभ्यत इति समारभा व्यापाराः-व। १२. तत्संकल्परहीति ब्रह्मजानाग्रिदग्धकर्माणस्तमाकुर्ब्रह्मविदः पडितम्–व। १३. ये मुनरनात्मत्रिदः कर्म कवति–व। १४. …०मेनत्। १५. सुत्यर्थो–व। १६. तदयुक्त–व। १७. पुर्णादुत्या–व।

सर्वान् कामानवाप्नोति[1] इति । स्तुतिश्चास्मत्पक्षे युज्यते । पूर्वत्र[2] फलाभिसन्धिरहितस्य[3] कर्मणो विधानत्वात् । त्वत्पक्षे किं स्तूयते[4] । कर्मणि हि कर्माभावदर्शनं[5] मिथ्या । ज्ञानं स्तूयते[6] । नहि सर्वलोकप्रत्यक्षा क्रिया प्रत्याख्यातुं शक्येत्युक्तम्[7] ॥ १९ ॥

यश्चैवं फलसङ्कल्परहितः परमार्थदर्शी स कर्मणि प्रवृत्तोपि नैव कर्तेत्युच्यत इत्याह—

(त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोपि नैव किञ्चित् करोति सः ॥ २० ॥)

त्यक्त्वेति[8] । अनित्येभ्यः फलेभ्यो व्यावृत्तचेता नित्येन परमात्मना तृप्तो नित्यतृप्तो[9] निराश्रयः फलसाधनभूत आश्रयो यस्य[10] न विद्यते स कुर्वन्नपि न करोति फलानुषङ्गाभावात्[11] । कर्मण्येवाधिकारस्ते—इति यद्यपि[12] धर्माधिकारः फलानधिकारश्चोक्तस्तथाप्यत्र[13] न पुनरुक्तता । अस्य प्रकरणस्य विशेषार्थत्वात् । कर्माकर्मप्रविभागद्वारेणाकर्म[14] काम्यं प्रतिषिद्धं च न कर्तव्यम् । नित्यं च कर्म[15] ब्रह्माराधनार्थं[16] कर्तव्यम् । कुर्वंश्चाप्नोति[17] किल्बिषमिति ब्रह्मार्पणन्यायेनाद्वैतावस्थितचेतसा कर्तव्यमिति[18] ॥ २० ॥

---

१. ···वाप्तोतीति–व । २. पूर्वत्र···–ब । ३. भिसंधि–व । ४. विधान॰त्वात्त्वत्पक्षे किं सूयते–व । ५. कमीभावार्शनं–व ६. सानं सूयते–व । ७. प्रत्याख्यांतुं शकेत्युक्तम् २९–व । ८. त्यक्तोति–व । ९. नित्यदभो–व । १०.···धन- मूत अयो यस्य–व । ११. फलानुयंगाभावात्–व । १२. यस्वपि । १३. ···कारश्चौक्त॰–व । १४. विशेषार्थत्वाकर्माकर्म॰–ल । १५. कर्य–व । १६. ब्रह्माराधनांर्थ–व । १७. कर्तध्यमकुर्वंचाप्नोचि–व । १८. कर्तव्य इति–ल, कर्तव्यति–व ।

किञ्च[1]—

(निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥)

निराशीरिति । निर्गता फलाशीर्यस्य स निराशीः[2] । चित्तं चात्मा च चित्तात्मानौ । तौ संयतौ[3] यस्य स यतचित्तात्मा[4] । आत्मशब्देन सेन्द्रियं शरीरं गृह्यते[5] । नैषु[6] पुत्रादिषु वा ममैतेहमेतेषामिति[7] परिग्रहबुद्धिर्यस्य नास्त्यसौ त्यक्तसर्वपरिग्रहः[8] । किमिदं शारीरं नाम । शरीरनिर्वर्त्यमाहो[9] शरीरस्थित्यर्थमिति । न तावत् स्थित्यर्थम् । ध्रियमाणशरीरस्यार्थप्राप्तत्वादुपदेशोनर्थकः[10] शरीरयात्रापि च इत्युक्तत्वाच्च । तस्माच्छारीरं शरीरेन्द्रियनिर्वर्त्यं शास्त्रचोदितं कर्म[11] । ननु प्रतिषिद्धमपि शरीरनिर्वर्त्यं स्यात् । नैष दोषः । वैदिककर्मप्रकरणात् । केवलम् इति च फलरहितम्[12] । ननु शास्त्रीयं कर्म[13] कुर्वतः किल्बिषं नाप्नोतीत्यप्राप्तप्रतिषेधप्रसङ्गः[14] । अत्राभिधीयते—वाक्यतात्पर्यापरिज्ञानमत्रापराध्यति[15] । कुर्वन्नेव न प्राप्नोति[16], अकुर्वंस्तु विहिताकरणादाप्नोति[17] किल्बिषं पापम् । अथवा किल्बिषं संसारं[18] प्रतिपद्यत इति योजनान्तरम् ।

---

१. किच-व । २. निराशी-व । ३. संयुतौ-व । ४. यतधितात्मा-व । ५. शव्दोनर्सद्रियं शरीरं गृस्वते-व । ६. नेषु-ल । ७. ···हमेतिषामिति-व । ८. नास्तिसौ परिग्रहः त्युक्तसर्व-व । ९. ···निर्वत्येमाहो-व । १०. उपदेशोरनर्थकः-व । ११. तस्माच्छारीरंद्रियनिवर्त्यं शास्त्रं चोदितं कर्म-व, तस्माच्छारीरेन्द्रिय०-ल । १२. रहित-व । १३. शास्त्रीय कर्म-व । १४. किल्वीषं नामोतित्यनासतिषेप्रसंगः-व । १५. ···तात्पर्थ्यापरिज्ञानमत्रापराध्यर्थे-व । १६. कुर्वन्नेवेन प्राप्तोति-व । १७. विहिताकरणा व्याप्नोति-व । १८. किल्विसंसारं-व ।

अपरे तु शरीरस्थित्यर्थं भिक्षाटनाशनपानादि कुर्वन्ति[1] इति योजयन्ति। तदपि[2] केवलमभिमानरहितमिति। तदपव्याख्यानम्। नहि भिक्षाटनं करोमीत्यभिमानरहितस्य[3] बुद्धिपूर्वमन्तरेण तत्र प्रवृत्तिरेव कल्पते। क्षुत्पिपासाभ्यां पीड्यमानस्तत्प्रतीकाराय[4] भोजनादौ कर्तृत्वमनुभवन् वैदिके कर्मणि[5] कथं कर्तृत्वं न प्रतिपद्येत। तदिदं राजपुत्रचेष्टितम्। यदि वैदिके कर्मणि[6] ब्रह्मज्ञानविरोधात् कर्तृत्वं निवृत्तं[7] तथा लौकिकेपीत्यविशेषः[8]। अथवोभयत्रापि कर्तृत्वं न लभ्यमर्धजरतीयम्[9]। तस्मादव्युत्पन्नविप्रलब्धबुद्धिषु[10] व्याख्यानमिदं शोभते। नास्मासु ये प्रमाणवृत्तमनुरुन्धामहे[11] ॥ २१ ॥

यथैव फलसङ्कल्पो न कर्तव्यस्तथान्येपि चित्तधर्मा[12] उपदिश्यन्ते—

(यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ २२ ॥)

यदृच्छेति[13]। यदृच्छालाभेन प्रार्थितोपनतलाभेन सन्तुष्टो[14] रागद्वेषसुखदुःखादिद्वन्द्वातीतो[15] विगतं मात्सर्यं[16] परेषु वैरबन्धो[17] यस्यासौ विमत्सरोभीष्टवस्तुसिद्धावसिद्धौ च समः। कर्म कृत्वापि न निबध्यते। बन्धहेतूनां[18] चित्तदोषाणामभावात्[19] ॥ २२ ॥

---

१. शरीरस्थित्यर्थभि०—ल, शरास्थित्यभि० भिक्षाठनाशनय नादि कुर्वंति—व। २. तदपि। ३. करोमीत्याभिमानहिमतस्य—व। ४. ···मानस्तत्त्रनीकाराय—व। ५. वैदिकिकर्मणि—व। ६. कर्मणि—व। ७. कर्तृत्वलिवृत्तं—व, कर्तृत्वनिबृत्त—ल। ८. लोकिकेपित्यवि०। ९.···मध जरतीयं—व। १०. तस्मादत्युत्पन्नविप्रलब्ध्रबुद्धिषु—व। ११. ···मनुरुद्धामह—व। १२. तथान्योपि चतुधर्मा—व। १३. यद्दृच्छेति०। १४. यदछाला०—व संतुष्टो—व। १५. ···द्वेपसुखदुःखादिद्वंद्वातीर्ति—व। १६. मात्सरं—व। १७. वैरंवधो—व। १८. न ध हतूणां—व, वन्धहेतूणां—ल। १९.···दोषाणाभावात्—व।

प्रकरणोपसंहारार्थः[१] श्लोकः—

(गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥)

गतसंगस्य मुक्तस्य ज्ञानावेति । गतसंगस्य मुक्तस्य रागादिभिर्दोषैरात्मज्ञानावस्थितचेतसो[२] यज्ञाय परमात्माराधनायारभतः कर्मारभमाणस्य[३] तत्समग्रम् । समित्येकीभावेग्रं फलं तेन[४] सह प्रविलीयते[५] ब्रह्मरूपं प्रतिपद्यते । कर्मापि ब्रह्मैव तत्प्रभवत्वात् । यो हि[६] कर्म त्यजति[७] तेन ब्रह्मैव त्यक्तं भवति । अस्मिन् कर्मप्रकरणे[८] सर्वासु गीतासु कर्मप्रवृत्तिरेव[९] भगवता दर्शिता—यस्य सर्वे समारम्भाः—इत्यारभ्य ।

तदत्र भगवन्मतविनाशकाः केचिन्महामायाविनः सूत्रकमिव पटं कुर्वन्तः[१०] कर्मनिवृत्तिमेव[११] वर्णयन्तो लोकं विप्रतारयन्ति ॥ २३[१२] ॥

क्रियाकारकेषु सर्वेषु ब्रह्माभिगतं पश्यन् स्वयं ब्रह्मास्मीति भावितात्मा तेनैव रूपेणावस्थाय कर्म कुर्वन् ब्रह्मैव आप्नोतीति फलं दर्शयन्नाह[१३]—

(ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥)

---

१. प्रकरणोपसंहारार्थः–व । २. मुक्तस्य गादिभिर्दोषैरात्मनावस्थितचेतसो–व । ३. कर्मारेभमानस्य–व । ४. तेत–व । ५. प्रलीः–व । ६. ···प्रभवलाघोहि–व । ७. त्येजते–ल, व । ८. कर्मकरणे–व । ९. गीतासुकस्तिवृत्तिरेव–व । १०. विनाशकरः कोथत्महामायाविनेसूत्नकमिव यट कुर्वतः–व, ···मायाविनो सूत्रकमिव पटां०–ल । ११. ०निवृत्तमेव–व । १२. ३३–व । १३. फलदर्शन्नाह–व ।

ब्रह्मेति। अर्प्यते समर्प्यते येन जुहूर्हस्तादिना तत्करणं कारकं ब्रह्म हविःशब्दसाहचर्याद्धव्यसेवार्पणं[1] प्रतीयते। हविः सोमाज्यपयःप्रभृति हूयमानं द्रव्यम्[2]। देवतामुद्दिश्य हूयत इति सम्प्रदानकारकं देवताप्याक्षिप्तैव[3]। ब्रह्मैव अग्निर्ब्रह्माग्निराहवनीयः स्मार्तश्चोपासनीयस्तस्मिन्नधिकरणे[4] स्वयं[5] ब्रह्मणा कर्त्रा हुतं हवनं निर्वर्तितम्।

तेनैवं[6] कुर्वता ब्रह्मैव गन्तव्यं प्राप्तव्यम्। ब्रह्मात्मकं कर्म ब्रह्मकर्म तस्मिन् कर्मणि समाधिर्यस्यासौ[7] ब्रह्मकर्मसमाधिस्तेन। पञ्चकारकग्रहणं प्रदर्शनार्थम्[8]। यावान् यत्र श्रौतः स्मार्तो वा कारकग्रामस्तत्सर्वं ब्रह्मेति प्रतिपत्तव्यमिति[9]। ब्रह्मैव[10] समस्तः प्रपञ्चः—सर्वं खल्विदं[11] ब्रह्म—इति श्रुतेः[12]। तत्र यः सर्वेषु विकारेषु कारणरूपं ब्रह्मानुगतं[13] पश्यति स सम्यग्दर्शी[14]। यथा शरावादिषु मृत्स्वरूपमनुगतम्[15]। न चात्र—मनो ब्रह्म—इतिवद् ब्रह्मदृष्ट्या कारकोपासनं[16] चोद्यते किन्तु[17] तत्त्वदर्शनम्। तत्र हि युक्तमिति शब्दप्रयोगात् प्रतीकोपासनम्। अत एव सर्वात्मदर्शित्वात्—ब्रह्मैव तेन गन्तव्यम्—इति ब्रह्मप्राप्तिवचनं[18] युक्तम्।

ननु—श्रेयान् द्रव्यमयात्[19]—इति ज्ञानयज्ञस्तुत्यर्थं प्रकर-

---

१. शब्दसाहचर्यादित्यमेवार्यणं–व। २. ...हूयमान०–व। ३. ...कारकडेवता० ल। ४. ...रावहनो ०दवेतायः स्थार्तचोपासनस्त०–व, ...पासनस्त०–ल। ५. स्वय–व। ६. तेनेवं–व। ७. ब्रह्मात्मकं कर्मसमाधिस्तैमय च कारकग्रहणं–व। ८. प्रदर्शनार्थं–व। ९. ...पत्तव्यभि–व। १०. ब्रह्मेव–व। ११. सर्वं खल्विद–व। १२. श्रुते–व। १३. ब्रह्मानुगते–व। १४. सम्पादशै–व। १५. सवादिषु ऋत्स्वरूप०–व। १६. न चात्रसतो ब्रह्मेतिवहदृष्ट्याकरकोपामनं–व। १७. कितु–व। १८. ब्रह्मप्राप्तिवंचतं च। १९. तनु श्रेयान्दव्यमपादिति–व।

णम्[1]। केयमाकस्मिकी[2] प्रतिभा। अनेकविधायकवाक्यसमूहो[3] हि प्रकरणमुच्यते। ते चानेके यज्ञविशेषाः प्रतिवाक्यं ब्रह्मप्राप्त्युपाया उपदिश्यन्ते। ज्ञातज्ञापकत्वान्नानुवादः। स्तुतिश्च तेनैकेन[4] श्लोकेन सिद्धेति न कृत्स्नं प्रकरणं स्तुत्यर्थम्। न च विधिमन्तरेण स्तुतिः क्वचिदर्थवती। किञ्च, विद्यमानेन (गुणेन) स्तुतिराहोस्विदविद्यमानेन[5]। यदि पूर्वः कल्पो यथार्थप्रतिपादकं[6] तर्हि शास्त्रं न स्तुतिपरम्। द्वितीये[7] च कल्पे[8] सर्ववेदोक्तमनृतमिति[9] प्रतिपद्येत। अनिष्टं चैतत्[10]।

अन्ये तु[11] ब्रह्मार्पणमित्योङ्कारे ब्रह्मोपासनमित्युपदि(श्यते)[12] इति वदन्ति।

तेनेयं त्रयी[13] विद्या वर्तते। एतस्यैवाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ—इति श्रुतिः[14] किलैतमर्थं दर्शयतीति तदसत्[15]। उद्गीथावयवस्यौङ्कारस्य[16] वर्णात्मकस्योपासनं तत्र विधीयते श्रुतत्वान्न ब्रह्मोपासनमिति स्थितम्। तेन—इयम्—इत्येतस्यैव स्तुत्यर्थमिति व्याख्यातमित्यलं प्रसङ्गेन ॥ २४ ॥

इदानीं यज्ञभेदाः प्रदर्श्यन्ते[17]। क्वचित् कस्यचिदधिकारः[18] सम्भवति—

---

१. ज्ञानयज्ञास्तुत्यर्थंमकणं–व। २. ···माकस्मिको–व। ३. ···वाक्यसमुहो–व। ४. तेनेकेन–व। ५. स्तुतिशहोस्विदविधमानेन–व। ६. यर्था प्रति०–व। ७. द्वितोये–व। ८. संर्व···–व। ९. ···मवृतमिति–व। १०. ···निष्टचेतत्–व। ११. अत्ये–व। १२. ब्रह्मापणमित्यांकरिब्रह्मोपासनमित्युपदिः–व, ब्रह्मोपासनमित्युपदि–ल। १३. त्रयो–व। १४. एतस्यैवाक्षरस्यापदित्या इति श्रुतेः–व, एतस्यैवाक्षरस्यापदित्या इति–ल। १५. ततसत्–व। १६. उदीथावयवस्योकारस्य–व। १७. पसभेदाः प्रदंश्यंते–व। १८. ···कार–व।

(दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥)

दैवमिति । देवेषु भवं यज्ञं[1] दैवं हिरण्यगर्भोपासनमादित्याद्युपासनञ्च[2] । तथा च ब्राह्मणम्—विद्यया देवलोको[3] देवो भूत्वा देवानप्येति—इति । कर्मयोगिनः पर्युपासते । देवादिभावेऽपि ज्ञानोत्पत्तिरिष्यते[4] । तद्यो यो देवानां प्रत्यबुध्यत[5] स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्—इति श्रुतेः । ब्रह्मैवाग्निस्तस्मिन् यज्ञं[6] स्वमात्मानमन्तःकरणं[7] विवक्षितम् । न जीवः[8] । यत्किञ्चिज्ज्ञेयं[9] जानातीति यज्ञ इत्यात्मवचनोऽत्र निर्दिश्यते[10] । यज्ञेनात्मनात्मसमीपवर्तिना[11] मनसोपजुह्वति[12] । ब्रह्मात्मनोरेकीकरणं[13] विवक्षितम् ॥ २५ ॥

(श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन् विषयानन्य इन्द्रियाग्निषु जुह्वति ॥ २६ ॥)

श्रोत्रेति । अन्ये गुरुकुलवासिनो नैष्ठिका[14] ब्रह्मचारिणः । संयम एवाग्निः संयमाग्निः । प्रतीन्द्रियं[15] संयमभेदाद्बहुवचनम्[16] । तेषु श्रोत्रादीनि जुह्वति[17] । ब्रह्मचर्येण कालं क्षपयन्तीत्यर्थः ।

शब्दादीन् विषयानन्ये गृहस्थाः शास्त्राभ्यनुज्ञानादिन्द्रियाग्निषु[18] जुह्वति[19] योजयन्ति । तथा च स्मृतिः—नित्यं सुगन्धस्नानशीलः—इति ॥ २६ ॥

---

१. भवयेज्ञं–व । २. ···मादित्याकपासनं च–व । ३. विधर्यादवलोको–व । ४. ···रिव्यते–व । ५. तथो देवानां प्रसबुद्धयत–व । ६. यंज्ञ–व । ७. स्वमात्मकरणं–व । ८. विपक्षिडनं–व । ९. ···ज्जेयं–व । १०. निर्दिश्यते–व । ११. ···वंतिना–व । १२. ···जुहूति–व । १३. ···रेकेकरणं–व । १४. गुरकुलवासिनो नेष्ठिका–व । १५. प्रतिद्रियं–व । १६. बहुवचने-व । १७. जुहुतिं । १८. शास्त्राभ्यनुज्ञानादिंद्रीयाग्निषु–व । १९. जुह्वतो–व ।

अपरे तु[1]—

(सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥)

सर्वाणीति । सर्वाणीन्द्रियकर्माणि[2] बुद्धीन्द्रियाणां कर्माणि रूपादिग्रहणानि । कर्मेन्द्रियाणां च वचनादानविहरणोत्सर्गानन्द-लक्षणानि[3] । प्राणाः पञ्च वायवः । तेषां कर्माणि । बहिर्निर्गमनं[4] प्राणकर्म । अधस्तादवनयनमपानकर्म[5] । व्यायमनं व्यानकर्म । आकुञ्चनप्रसारणाद्यशितपीतस्य[6] समानयनं[7] समानकर्म । ऊर्ध्व-नयनमुदानकर्म । आत्मनि संयम एवाग्निस्तस्मिन् जुह्वति[8] । सम्यग्ज्ञानदीपिते[9] योयं ज्ञानप्रबन्धः क्रियाविस्तारश्चात्मप्रबन्धा-दात्मन्येवासौ प्रलीयत[10] इति मन्यमानास्तत्कृतेन गुणदोषेण प्रत्यहं न लिप्यन्त[11] इति ॥ २७ ॥

अमी चापरे—

(द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥)

द्रव्येति । द्रव्यैः सोमाज्यपयःप्रभृतिभिर्निर्वर्त्यो यज्ञो येषां ते द्रव्ययज्ञाः । तपः कृच्छ्रचान्द्रायणादि यजन्ते[12] तपोयज्ञाः[13] ।

---

१. अपरे तुः २६–व, ···तु २६–ल । २. सर्वाणींद्रिय०–व । ३. च चनादानतिदरणोत्सर्गानंदलक्षणानि–व । ४. वहिनिर्गमतं–व । ५. कर्मावस्तादषनयन०–ल, कर्मावस्तादषनायन० व । ६. ···द्यशीतपीतस्य–ल । ७. समातपन–ब । ८. तस्मिं जुह्वन्ति–व । ९. सम्यग्नादिपिते–व । १०. योयं व्यानप्रतिबंधः कियाविस्तरश्चात्मप्रवंधादात्मन्येवासौ प्रलीषत–व । ११. दोषेणा प्रहवं लिप्पंत–व । १२. सोमात्यपयः प्रभृतिभिर्निवंत्यो ज्ञेये पाते द्रव्य यतरः तपः कृछ्यांद्रयणादि–व । १३. ···यज्ञः ।

प्रत्याहारस्तथा ध्यानं प्राणायामोथ धारणा ।
तर्कश्चैव[1] समाधिश्च षडङ्गो[2] योग उच्यते[3] ॥

स एव यज्ञो येषां ते योगयज्ञाः । स्वाध्याययज्ञो वेदाभ्यासः । ज्ञानयज्ञो[4] वेदार्थज्ञानं यज्ञो येषां ते ज्ञानयज्ञाः । मीमांसा शारीरकादिव्याख्यातारो यतयो यत्नवन्तः[5] संशितव्रता अखण्डितव्रताः ॥ २८ ॥

अमी चापरे—

(अपाने जुह्वति प्राणं प्राणेपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥)

अपानेति । अपाने पूरणवृत्तौ प्राणं रेचकवृत्तिं जुह्वति । मस्तकमध्यवर्तिनी[6] सुषुम्णा नाडी । तद्द्वारेण बाह्यं[7] वायुमन्तः प्रवेशयन्ति । आदित्यमण्डलादारभ्य हृदये चित्तप्रवेशानुसारी[8] वायुः प्रवेशितो[9] भवति । अथ विपर्ययेण प्राणे[10] रेचकवृत्तौ[11] पूरणवृत्तिं यावदादित्यस्तावच्चित्तवृत्तिमूर्ध्वामुद्गमयन्ति[12] । सोयं ब्रह्मपथो योगिनामुत्क्रान्तिकाले[13] सम्यगभ्यस्त उपयुज्यते । प्राणापानगती प्राणापानवृत्ती[14] रुद्ध्वा निरुद्ध्य यतिवच्छरीरं[15] कुम्भकवृत्त्या पूरयित्वा कुम्भकप्राणायामपरायणाः[16] ॥ २९ ॥

१. ···रणतर्कश्चैव–व । २. षडंगो–व । ३. नुच्यते । ४. सानयज्ञो वेदार्थयज्ञो येषां ते–व । ५. ०व्याख्यातोरो···यत्प्रवंतः–व । ६. रेचकवृन्तिजुह्वमिसमकमध्यवर्तिनी–व । ७. वास्वं–व । ८. ०दारम्यतृदयेवित प्रवेशानुसारे–व । ९. मवेशितो–व । १०. प्राणै–व । ११. वृतौ–व । १२. ···वृत्तियावदादिस्तावचित्त वृत्तिमूर्ध्वामुभ्दमायांति–व । १३. ···सुत्रक्ष्क्रांतिकाले–व । १४. प्राणायामगती ···वृती–व । १५. निरुद्ध्यद्यतिवच्छ्ररीरं–ल, निरुद्धावृत्तिवच्छरीरं–व । १६. ···कुभकप्राणायामपरायणा २९–व ।

उत्तरेण गीतार्थः परिसमाप्यते—

(अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति ।
सर्वेप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥)

अपर इति । अपरे नियताहाराः । उदरस्यार्धमन्नेन[1] पूरयेत्तृतीयं[2] भागमुदकेन चतुर्थो वायुसञ्चारार्थः—इति योगशास्त्रे दर्शितम् । ते कुम्भकेनावस्थिताः[3] प्राणान् प्राणेषु जुह्वति । सर्वे प्राणापानादयस्तस्यामवस्थायामेकीभवन्तीत्यर्थः[4] । सर्वेप्येते यज्ञविदः पूर्वोक्तास्तेनैव (यज्ञेन) क्षपितं कल्मषं पापं[5] येषां ते तथोक्ताः ॥ ३० ॥

(यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम ॥ ३१ ॥)

यज्ञेति । यज्ञार्थं[6] विनियुक्तं द्रव्यम् । तच्छिष्टं तदेवामृतं भुञ्जत इति यज्ञशिष्टामृतभुजो यथासम्भवं यान्ति प्राप्नुवन्ति ब्रह्म सनातनं पुराणम् । साक्षात् पारम्पर्येण[7] (वा) फलाकाङ्क्षिभिः क्रियमाणा ब्रह्मप्राप्तिहेतवो भवन्ति[8] । यः पुनरयज्ञस्तस्य नायं लोकोस्ति । कुतोन्यः परलोक[9] इति संक्षेपः ॥३१॥

(एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान् विद्धि तान् सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥३२॥)

एवमिति । एवमुक्तेन प्रकारेण ब्रह्मणो मुखे ब्रह्म वेदः तस्य[10] मुखं द्वारमुपलब्धिस्थानं[11] वेदवाक्येषु वितताः प्रथिताः ।

---

१. उदस्यार्त्थेंधर्मशनेन–व, उदरस्यावमशनेन–ल । २. तृतीयंभाग०–व । ३. कुम्भकेमावस्थिताः–व । ४ ···स्थायामेकेभवंतीत्यर्थः–व । ५ पाप । ६. यर्ज्ञेति यज्ञार्थ–व । ७. पारयर्व्येण–व । ८. ब्रह्मप्राभिहेतवो भर्वति–ब । ९. प लोक व । १०. धेदस्त०–व । ११. ···छरमुपलब्रिस्थानं–व ।

एते यज्ञा[1] वैदिका एव । एते न पुरुषबुद्धिप्रभवा इत्यभिप्रायः[2] । कर्मजान् कायिकवाचिकमानसजानेवं ज्ञानं[3] कृत्वा विमोक्ष्यसे संसारात् । कुरु कर्मैव—इति कर्तव्यता(या): प्रतिश्लोकमधिकृतत्वात्[4] कृत्वेति नोक्तम् ॥ ३२ ॥

यदि तर्हि यज्ञैरेव मोक्षं प्राप्यते किमात्मज्ञानेनेत्याशङ्कायामाह[5]—

(श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥)

श्रेयानिति । पूर्वत्र केवलादेव ज्ञानान्मोक्षो नास्ति । किं तर्हि । कर्मसहितादित्युक्तम्—न कर्मणामनारम्भाद्[6] इति आरभ्य । अत्र पुनः केवलादेव कर्मणो मोक्षः स्यादित्याशङ्क्य निरस्यते । अस्ति चेदमपि दर्शनम् । याज्ञिकानां केषाञ्चिन्मोक्षो नाम स्वर्ग एव तारतम्यावस्थितः[7] । स च कर्मसाध्यो[8] नान्योस्तीत्याशङ्काबीजं[9] चेदम् । एवं ज्ञात्वा विमोक्ष्यसे[10] इति । श्रेयान् प्रशस्यतरो[11] द्रव्यमयादग्निष्टोमादेर्ज्ञानयज्ञः । कुतः । सर्वं हि ज्ञाने सति परिसमाप्यतेपवर्गाय समर्थं[12] भवतीत्यर्थः । तथा च श्रुतिः—स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते[13]—इति । ज्ञानसहितं कर्माक्षयफलत्वान्न क्षीयत इत्युच्यते । स्वरूपतो[14] हि क्षणिकं कर्म । तथा—यो वा एतदक्षरमविदित्वा

---

१. यज्ञ–व । २. ···प्रभावा इसभिप्राय:–व । ३. ज्ञान–व । ४. कुरु कमैवंति कर्तव्यताः प्रतिश्लोकमविल्कृतत्वात्०–व । ५. ···ज्ञामेनेत्याशंकया· माह–व । ६. कर्मणाननारंभा०–व । ७. निरस्यस्तिचेदपिद्दर्शनयाज्ञकानां केषांचित्मोक्षोनामस्वर्ग एव तातम्यावस्थितः–व । ८. ···साध्ये–व । ९. ···शंकबीजं–व । १०. पिमोक्षस इति—व । ११. प्रशस्यतरी–व । १२. समर्थं–व । १३. कर्मा क्षीयत–व । १४. सरूपतो–व ।

गार्ग्यस्मिल्लोके जुहोति[1] ददाति तपस्यत्यपि बहूनि[2] वर्षसहस्राणि अन्तवानेवास्य स लोको भवति—इति ॥ ३३ ॥

तत्पुनरात्मज्ञानमित्थं विजानीहीत्युपदिशति[3]—

(तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥)

तदिति[4] । प्रकर्षे(ण) निपत्य पातः प्रणिपातस्तेन दीर्घनमस्कारादिना च तज्जानीहि[5] । परिप्रश्नः किमात्मतत्त्वं का विद्या[6] का चाविद्येति । सेवा शुश्रूषा । ज्ञानिनोपि[7] सन्तः केचिदतत्त्वदर्शिनो[8] भवन्ति । अतो विशेषयति[9]—तत्त्वदर्शिन इति । साक्षात्कृतात्मसत्तत्त्वा[10] इत्यर्थः ॥ ३४ ॥

कीदृशं तज्ज्ञानमिति[11] —

(यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥)

यदिति । यज्ज्ञात्वाधिगम्य[12] पूर्ववन्मोहं न यास्यसि । येन ज्ञानेन भूता(न्यशेषेण) कार्त्स्न्येन द्रक्ष्यस्यात्मन्यथो मयि परमेश्वरे[13] । यथा समुद्रे सर्वा आपः प्रविश्यैकीभवन्ति तथात्मनि सर्वा(दि)कारणे सर्वोयं प्रपञ्चः[14] प्रविश्यैकीभवतीत्यर्थः । कार्यकारणयो-

१. तथा एवा ये तदक्षरभविदित्वा गार्ग्यस्मल्लोकेतुहोति–व । २. वकूनि–व । ३. निमित्तं–व । तत्पुनरा मज्ञानमित्तं विजाभीहित्युपदीशति–व । ४. तर्दिति–व । ५. त जानीहि–व । ६. परिप्रश्नः किमात्मतत्व वा विधा–व । ७. जानिनोपि–व । ८. केचिरादत्त्वदर्शितो–व । ९. विशेषयंति–व । १०. साक्षात्कृतात्मसत्त्वा–व, साक्षात्कृतात्मसतत्त्वा–ल । ११. कीद्वशंतेज्ञानमिति–व । १२. यज्ज्ञात्वाधिगम्य–व । १३. ज्ञायेठभूजाकात्स्र्येन द्रव्यस्यात्मन्यथो अपि परमेश्वरो–व । ···अपि···ल । १४. सगंय प्रयंचः–व ।

रभेदात् सुवर्णरुचकादिवत्[1] । ईदृशं ज्ञानमपरे उपदेक्ष्यन्तीति[2] ॥ ३५ ॥

ज्ञानमाहात्म्यमधुना[3] कथ्यते—

(अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥ ३६ ॥)

अपीति । यद्यपि पापेभ्यः[4] पुरुषेभ्यः पापकृत्तमोसि सर्वं वृजिनं पापं ज्ञानमेव प्लवस्तरङ्गकस्तेन[5] सम्यक् तरिष्यसि ॥ ३६ ॥

तत्र दृष्टान्तमाह—

(यथैधांसि समिद्धोग्निर्भस्मसात् कुरुतेर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ॥ ३७ ॥)

यथेति । यथैधांसीन्धनानि[6] सम्यगिद्धोग्निर्भस्मसात्कुरुते[7] भस्मीभावं नयति तथा ज्ञानाग्निः सर्वकर्माणि यान्यनारब्धफलानि[8] जन्मान्तरकृतानि भविष्यच्छरीरहेतुत्वेनावस्थितानि[9] यानि चास्मिञ्जन्मनि प्राग्ज्ञानोत्पत्तेः[10] कृतानि तानि[11] भस्मीकरोति । यानि पुनरारब्धफलानि[12] तेषामुपभोगेनैव क्षयः । तथा च श्रुतिः—तस्य तावदेव चिरं यावन्न विमोक्ष्येथ सम्पत्स्ये[13]—इति ॥ ३७ ॥

---

१. सुवर्णरुदकादिव–ल । २. कीदृशं ज्ञानमुपदेक्ष्यन्नीति–ल । वृशं ज्ञानमुपदेत्युतीति–व ॥ ३. ज्ञानसाहात्म्यमधुना–व । ४. यवपिपामेभ्यः–व । ५. ज्ञानमेव हम सारङ्कस्तेन–व । ६. यथेधासीधनानि–व । ७. सम्यगिछेग्निर्भस्मसात्कुते–व । ८. यान्यनारभ्वफलानि–व । ९. भविष्यछरीरे…हेतुत्वेनावास्थितानि–व । १०. ज्ञानोत्पत्तेः–व । ११. तामि–व । १२. पुनरारध्वकलानि–व । १३. विमक्ष्यतिथ०–व । विमोक्ष्यति थ संपत्स्य इति…ल ॥

यतश्चैवम्[१]—

(नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥)

नहीति । नहि ज्ञानेन सदृशं पवित्रं पावनमिह शास्त्रीयेर्थे[२] विद्यते । निर्धारणे सप्तमी । तच्च ज्ञानं स्वयमित्यात्मवाची[३]। कर्मयोगेन संसिद्धः कालेन[४] परिपाकहेतुनात्मनि स्वबुद्धावेव लभते ॥ ३८ ॥

प्रणिपातादि बाह्यनिमित्तमुक्तम्[५] । इदानीमाभ्यन्तरं[६] निमित्तमाह—

(श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥३९॥)

श्रद्धावानिति । श्रद्धास्तिक्यबुद्धिः आदरप्रत्ययस्तद्वांस्तत्परश्च श्रवणमननादिषु व्यापृतः । कश्च व्याप्रियते । संयतेन्द्रियः[७] । स लभते । तच्च लब्ध्वा[८] परां शान्तिं मुक्तिमचिरेण क्षिप्रं चाधिगच्छति[९] ॥ ३९ ॥

श्रद्धावानित्युक्तम् । तस्य प्रत्युदाहरणार्थमाह[१०] —

(अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोस्ति न परो न सुखं संशयात्मनः ॥४०॥)

अज्ञेति । अज्ञोनात्मवादी[११] यथोक्तेर्थे श्रद्धामकुर्वन्नश्रद्दधानो भवति वा मोक्षो न वेति[१२] संशयात्मा स विनश्यति । अज्ञानात् ।

---

१. यतच्च्येवं–व । २. शास्त्रीयेथे–व । शास्त्रीयेर्थेन–ल । ३. स्वधमित्यात्मवाची–व । ४. कालेव–व । ५. ···वास्वनिमित्रः मुक्तम्–व । ६. इदानीमारभ्यंतर०–व । ७. व्याएतः व्याप्रियतेद्रियः–व । ८. तश्च लद्धा–व । ९. वाधिगच्छति–व । १०. प्रत्युदाहारणार्थमाह–व । ११. अज्ञेनात्मवार्दी–व । १२. श्रद्धमकुर्वन्तः श्रद्धधानो भडति मोक्षेन ।

संशयः पापीयानित्याह—नायं[1] लोकोस्ति सर्वप्राणिसाधारणः परो दूरतः । सुखं च तस्य नास्तीति। इदमर्थादुक्तमविद्वान्[2] संशयात्मा च कर्मभिर्बध्यत इति ॥ ४० ॥

कं पुनर्न कर्माणि निबध्नन्ति तदाह[3]—

(योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥ ४१ ॥)

योगेति[4] । योगेन ब्रह्मार्पणन्यायेन परमात्मनि संन्यस्तं सम्यग् न्यस्तमेकीकृतं कर्म येनात्मज्ञानेन[5] च (सम्यक्) छिन्नः संशयो येन[6] तमात्मवन्तमप्रमादिनं न कर्माणि निबध्नन्ति[7] ॥ ४१ ॥

प्रकरणार्थमुपसंहरति—

(तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥)

तस्मादिति। तस्मादज्ञानसम्भूतमज्ञानादुत्पन्नं हृदये[8] स्थितं संशयं ज्ञानमेवासिस्तेन छित्त्वा निरस्य[9] योगमातिष्ठ ब्रह्मार्पणन्यायेन कर्मानुतिष्ठ । उत्तिष्ठ च। किमास्से विषण्णमना[10] इवेति।

इति श्रीभगवद्भास्करकृते[11] गीताभाष्ये
चतुर्थोऽध्यायः ॥ ४ ॥

---

१. पापीयानीत्याह नाये–व । २. विद्वात् । ३. किं पुनर्नवध्नीतेत्याह ४०–ल, किं पुनर्ननध्नीत्येत्याह ४०–व । ४. योगीति–व । ५. सन्न्यस्तसम्पत्त्यास्तमेकेकतं । येतात्म०–व । ६. यंन–ल, व । ७. कमाणि बध्नंति–व । ८. तृदये–व । ९. मिरस्ययिगमानिष्ट–व । १०. विषस्ममना–व । ११. इति श्रीभगवद्गीतामभगवभ्दास्ककृते–व ।

अथ पञ्चमोऽध्यायः ।

मयि सर्वाणि कर्माणि—इत्यनेन कर्तुः कृतानां कर्मणामीश्वरे सन्न्यास उक्तः । अनन्तरम्—ब्रह्मार्पणम्[1]—इत्यारभ्य ब्रह्मैव कर्तृ कारकानन्तरं[2] कर्म च इत्युक्तम् । अनयोः कर्मसन्न्यास-कर्मयोगयोर्भेदाभेदज्ञानविषययोः परस्परविरोधादेकपुरुषानुष्ठेय-त्वानुपपत्तौ[3] कतरदनयोः प्रशस्ततरमिति[4] प्रष्टुमर्जुन उवाच—

(संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यः श्रेयानेतयोरेकस्तं मे ब्रूहि विनिश्चितम् ॥ १ ॥)

संन्यासमिति । मयि सर्वाणि—इति सन्न्यासं कथयसि—ब्रह्मार्पणम्—योगसंन्यस्तकर्माणम्—योगमातिष्ठ—इति कर्म-योगम् । शेषं निगदव्याख्यातम् ॥ १ ॥

श्रीभगवानुवाच[5]—

(संन्यासः कर्मयोगश्च नैःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥ २ ॥)

संन्यास इति । मयि सर्वाणि—इति य उक्तः[6] संन्यासो यश्चायमनन्तरोक्तः कर्मयोगस्तावुभौ[7] नैःश्रेयसकरौ । निःश्रेयसमेव नैःश्रेयसम् । अयं तु विशेषः—कर्मसंन्यासात् कर्मयोगो विशिष्यते । कथम् । द्वैतविषयो[8] हि संन्यासः ।

---

१. उक्तोतंत्रं ब्रह्मार्पणम्–व । २. ···कारकानतरं–य । ३. ०विषयोः ···पुरूषानुष्टेयत्वातुपत्तौ–व । ४. प्रशस्यतरमिहते–व । ५. भगवाच–व । ६. मपि सर्व्वाणातिय उक्तः–व । ७. कर्मयागस्ता उभौ–व । ८. कथं त विषयो–व ।

कर्मयोगः पुनरद्वैतविषयः। साक्षात्सम्यग्दर्शनाश्रयो[१] ब्रह्मैवेदं सर्वं कर्त्रादि—सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद[२]—इति श्रुतेः। अतः कर्मयोगो विशिष्यते[३] ॥ २ ॥

तत्र सन्न्यासलक्षणं तावदुपदिश्यते—

(ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥३॥)

ज्ञेय इति। यो हि परमहितं न द्वेष्टि न च हितं फलमाकाङ्क्षति। कर्तव्यमेवेति नित्यकर्म[४] कृत्वा तत्फलमीश्वरे[५] समर्पयति स नित्यसन्न्यासीति बोद्धव्यः[६]। स चेत्थंलक्षणः कर्मस्थोपि निर्द्वन्द्वो रागद्वेषादिरहितः सुखमनायासेनैव[७] संसारबन्धान्मुच्यते[८] मोक्षं[९] प्राप्नोतीत्यर्थः ॥ ३ ॥

ननु संन्यासकर्मयोगयोर्नैःश्रेयसफलत्वमयुक्तम्[१०]। स्वरूपभेदवत्फलभेदो युक्त इति। इमामाशङ्कामपनेतुमाह—

(सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥ ४ ॥)

सांख्येति। ननु[११] च संन्यासयोगौ[१२] प्रस्तुतौ। किमिदमवान्तरमप्रस्तुतमुपन्यस्यते[१३]। नायं दोषः। तावेव संन्यासयोगौ सांख्ययोगशब्दाभ्यां निर्दिष्टौ। योगशब्दस्तावत्प्रकृतं योगं न

---

१. ···विषयः क्षात्सम्यग्–व। २. सर्व···द्योत्पत्रात्मनः सर्ववेद–व। ३. विष्यते–व। ४. निह्मकर्म–व। ५. तत्पलमीश्वरे–व। ६. सन्न्यासोति बोधव्या–व। ७. सुखमतायसेनैव–व। ८. बंधात्युच्यते–व। ९. मोक्ष–व। १०. ···योगयेनिः श्रैयसफलत्वमयुक्तं–व। ११. न तु–व। १२. ···योग्यै–व। १३. कि मदं शब्दातरम प्र०–व।

जहाति। सांख्यशब्दोपि सन्न्यासं प्रत्याययति[१] भेददर्शनसामान्यात्। यथा—(य) एवं विद्वान् पौर्णमासीं यजते। य एवं विद्वानमावास्याम्—इति पौर्णमास्यमावास्याशब्दाभ्यां प्रस्तुत्य[२] शब्दान्तरेण तयोरुपादानं क्रियते दर्शपूर्णमासाभ्यां[३] यजते—इति। तत्र दर्शशब्दोमावास्यावचनः। तद्वदत्र[४] सांख्यशब्दः[५] संन्यासविवक्षया प्रयुक्त इत्यविरोधः। कृत्वा कर्माणीश्वरे यः[६] समर्पयति स सन्न्यासी। सांख्यो न कापिलो निरग्निर्निष्क्रियश्च[७]—इति सांख्यशब्दोपादानप्रयोजन(म्)। तौ सांख्ययोगावित्यर्थः। पृथक्फलौ बाला[८] अविवेकिनो वदन्ति। वस्तुतस्तु एकमप्यास्थितः सम्यगुभयोर्विन्दते[९] फलम्। सन्न्यासिनापि भेदेन कर्म कृत्वा समर्पणकालेभेददर्शनमेवाश्रीयते। सर्वं कर्म ब्रह्मप्रभवं तद् ब्रह्मस्वरूपमेव[१०] प्रतिपद्यत इत्येवं समर्पणात्॥ ४॥

अवस्थामात्रमत्र[११] भिद्यते। सन्न्यासः पूर्वावस्था। घटमानयोगित्वात् कर्मयोगस्त्वनन्तरावस्था ज्ञानपरिपाकात्[१२]। तच्च—

(यदेव सांख्याः पश्यन्ति योगैस्तदनुगम्यते।
एकं सांख्यं च योगं च यः पश्यति स पश्यति॥ ५॥)

यदेवेति[१३]। यदेव सांख्याः[१४] पश्यन्ति ब्रह्म योगैस्तदनुगम्यते[१५]। तदेव चिन्त्यत इत्यर्थः। एवञ्च परमार्थत एकं सांख्यं च योगं च यः पश्यति स पश्यति। तार्किकाणां तु—कापिलाः[१६] सांख्याः। तेषामन्यद्दर्शनम्। योगा नैयायिकाः प्रसिद्धास्तेषामन्य-

१. सम्प्रत्याययति-व। २. भेददर्शन…शब्दाभ्या—नास्ति व कोषे। ३. क्रियने दर्शपूर्णमासाभ्यां—व। ४. …शब्दोमावास्यावचनस्तदूदत्र-व। ५.…शब्दाः-व। ६. कर्माणीश्वरीयः—व। ७. निश्चयश्च-ल पृथक्फलौ। ८. वेला-व। ९. सम्यगुभयोविंदते-व। १०. तद्वस्तस्वरूपम्-व। ११. अवस्थामात्र-व। १२. परियाक्यन्नु०—व। १३. यद्ददेवेति च। १४ सांखयः—व। १५. ब्राह्मयोकैस्तदमुगम्यते-व। १६. कापिलः—व।

द्दर्शनमिति । न च ते सांख्या योगाश्च[1] न च तार्किकाः सम्यक् पश्यन्तीति भगवतोभिप्रायः ॥ ५ ॥

तयोरेकत्वमुपपादयितुमाह[2]—

(सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥ ६ ॥)

सन्न्यासेति । सन्न्यास इति संन्यासी चेत्यर्थः । सन्न्यास[3] इति प्रथमाविभक्तेर्निर्देशान्नासावाप्तव्यः[4] । तथा हि संन्यासमिति द्वितीया स्यात् । अत्र[5] संन्यासशब्देन संन्यासी लक्ष्यते । अत्र अर्शआदित्वान्मत्वर्थीयोकारः[6] । यथा पापेभ्य इति तद्वानुच्यते[7] । संन्यासी ब्रह्मप्राप्तुमयोगतो दुःखं (प्राप्तुं) शक्नुयात् । दुःखमिति क्रियाविशेषणम् । क्लिष्टतरमित्यर्थः । योगेनाभेददर्शनेन युक्तो मुनिः[8] संन्यासी न चिरेण ब्रह्माधिगच्छति । तस्मात् सोपि समर्पणवेलायामभेददर्शनस्थ[9] इत्युपपन्नं समानफलत्वम् ॥ ६ ॥

यतः सन्न्यासी योगमासाद्य ब्रह्म प्रतिपद्यते नान्यथा । अतो योगस्य[11] यदुक्तं विशिष्टत्वं तदुपपन्नमित्युपसंहरति—

(योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥)

योगेति । योगेन युक्तोद्वैतदर्शनेवस्थितो[12] विशुद्धात्मा निर्मलीकृतबुद्धिर्विजितात्मा[13] जितमनोवृत्तिरत एव जितेन्द्रियः[14]

---

१. सांख्ययोगश्च–व । २. ०प्राय ५ तयारेक०–व । ३. सत्र्य स–व । ४. ···विधभक्तेनिर्देगात्रासावाप्रव्यंस्त०–व । ५. अथ तत्र ··ल । व ॥ ६. मन्वथीयो–व । ७. तद्यनुच्यते–व । ८. सन्न्यासी ब्रह्म···मुनिः–अंशोऽयं व–कोषे नास्ति । ९. ···वेलामभेदद्दर्शनस्था–व । १०. समानफलत्वम्–व । ११. तोगस्य–व । १२.···द्वेते दर्शने–व । १३.···ुद्धिर्विजितात्भा–व । १४. जितंद्रियः–व ।

सर्वभूतानामात्मभूत[1] आत्मा यस्य सोयं कुर्वन्नपि[2] न लिप्यते। कर्मापि ब्रह्मरूपेण भाव्यमानममृतत्वाय कल्पते। नहि तत्र लेपशक्तिरस्तीति ॥ ७ ॥

वैदिकादन्येष्वपि प्रमादकृतेषु[3] कर्मस्ववश्यं भाविषु[4]—

(नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित्।
पश्यञ्छृण्वन्स्पृशञ्जिघ्रन् भुञ्जन्गच्छन्श्वसन्स्वपन् ॥८॥
प्रलपन् विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ९ ॥)

नैवेति। नैव किञ्चित्करोमीति[5] युक्तो योगी मन्येत तत्त्ववित्। तेषां ब्रह्मकार्यत्वाल्लेपदोषापनुत्तये। कानि पुनस्तानि। पश्यन्नित्यादि। प्राणेन्द्रियव्यापारोत्र[6] निर्दिश्यते। पश्यन्निति[7] बुद्धिव्यापारः। बुद्ध्या पर्यालोचयन्नित्यर्थः। शृण्वन्निति श्रोत्रयोः। स्पृशन्निति त्वगिन्द्रियस्य। जिघ्रन्निति[8] घ्राणेन्द्रियस्य। भुञ्जन्निति[9] रसनेन्द्रियस्य। गच्छन्निति[10] पादयोः। श्वसन्निति प्राणस्य। स्वपन्निति[11] मनसः। प्रलपन्निति[12] वागिन्द्रियस्य। विसृजन्निति[13] पायूपस्थयोर्व्यापारः। गृह्णन्निति हस्तयोः। उन्मेषनिमेषौ[14] नेत्रयोः। चित्तं धारयेद्युक्तो मन्येत—इत्यस्यार्थे धारयेदिति[15] निर्दिष्टः ॥ ८ ॥

अत्र केचिदगृह्यमाणकारणं[16] सर्वकर्मत्यागं बहुशः पुरस्ता-

१. भूतातासान्मभूत–व। २. सोयक्तुर्वन्वापि–व। ३ प्रसादकृतेषु–व। ४. माविष–व। ५. किंवित्करोमि–व। ६. प्रश्यशन्नितित्वान्नित्यादि प्राणेदियया०–व। ७. परश्यान्निति–व। ८. जिघ्नन्निति–व। ९. भुंजन्नि–व। १०. गच्छनीति–व। ११. प्राणास्यास्वयन्निति–व। १२. मलयन्निति। १३. विसृजन्नि–व। १४. ···मेषभनिमेष–व। १५. ···स्याथेधारयदिति–व। १६ केचिन्दह्यभाणकारण–व।

दस्माभिर्निरस्तमपि शिष्टविगर्हणभयाच्छास्त्रार्थतया सम्पादयितुं तु समीहन्ते । कष्टमहो यत्तपस्विनः प्रथममश्रेयस्करे वर्त्मनि[1] केनचित्प्रलोभ्य प्रवर्तिताः पश्चात्परिदूयमानहृदया[2] युक्त्याभासैस्तदेव[3] समर्थयितुं यतन्ते नासद्ग्रहं विमुञ्चन्ति ।

तानत्र पृच्छामः[4]—केन प्रमाणेन सर्वत्यागः प्रतिज्ञायत इति । यदि वचनतस्तन्नास्ति । प्रत्युत तृतीयचतुर्थयोः[5] कर्मकर्तव्यतैवोक्ता[6] । नियतं[7] कुरु कर्म त्वम्—इति इत्यादिना—विद्वान् युक्तः समाचरन्[8] इति च विद्वदविदुषोः कर्मोक्तं स्वार्थं परार्थं वा[9] । अथ न्यायतः सोपि नास्ति । कथम् । यदि तावदात्मज्ञानकर्मयोगयोर्विरोधात्[10] कर्मानुपपत्तिरुच्यते[11] मिथ्याज्ञानहेतुको हि कर्मयोगः । तच्च मिथ्याज्ञानं विद्यया निरस्तम्[12]—कुरु कर्मप्रवृत्तिः—इति ॥ ९ ॥

यद्येवं[13] लौकिकवैदिककर्मणोर्युगपन्निवृत्तिः[14] प्रसज्यते मिथ्याज्ञानभावस्याविशेषात्[15] । ततश्च शौचाचमनभिक्षाटनादीनामप्यभावः[16] स्यात् । एकहेतुनिबन्धनानां[17] सह वा प्रवृत्तिः सह वा निवृत्तिर्नान्या गतिरस्ति[18] । कस्य वा शौचम्[19] । नात्मनो नित्यशुद्धत्वात् । न शरीरस्य ममेदमिति सम्बन्धाभावात्[20] ।

---

१. प्रथमश्रेयस्करे कर्मनि-व । २. ··· त्वदया-व । ३. युत्याभमैस्त०-व । तदैव-ल ॥ ४. षृछामः-व । ५ ··· चतुर्थयो-व । ६. ··· कर्तव्यतेवोक्ता-ल । य ॥ ७. नियत्त्वं-ल । नियत्व-व । ८. सम्रचरन्निति-व । ९. विद्वदविदुयोः कर्मक्रल्पार्थपरार्थे वा-व । १०. ०ज्ञानाकर्मयोगयोविरोधात्-व । ११. ··· नुययतिरु०-व । १२. निरस्त-व । १३. यर्घवंवं-व । १४. कर्मणोयुगयन्तिवृत्ति-व । १५. ··· विशेषात्र-व । १६. तश्च शौचामनभिक्षाटननादिनामप्यभावः-व । १७. ··· निंबंधनां-व । १८. ··· वृत्तिर्नात्याग तरस्ति-व । १९. वाशौच-व । २०. मशरीरस्य ममेदर्भित संबंधामावात्-व ।

परशरीरवत् कर्मत्यागवच्च[१] देहत्यागो युक्तः। कृतप्रयोजनत्वान्न भोजनादिभिस्तस्य[२] पोषणम्। ऐश्वर्याच्च[३] मुक्तस्य[४] त्यागशक्तिरस्ति। को नामापरतन्त्रः सन् स्कन्धेन[५] कुणपं[६] वहेत्। किञ्च—भेदविज्ञानोपशमात् सर्वकर्मत्यागाच्च मुक्तिमन्विच्छता सैव नास्तीति प्रतिज्ञातं[७] स्यात्। अशक्यत्वात्। यथा समुद्रे तरङ्गापनयादशक्यं स्नानम्[८]। देहेन्द्रियमनांसि हि निमित्तभूतानि[९]। तेषु विद्यमानेषु नैमित्तिकं[१०] भेदज्ञानं कायिकं (मानसिकं वाचिकं) च त्रिविधं कर्मावश्यं प्रवर्तते। अग्नीन्धनसंयोगे धूमवत्तस्माज्ज्ञानकर्मणोर्विरोधादिति[११] हेत्वाभासः परव्यामोहार्थमुपन्यस्तोऽसिद्धश्चोद्दालकयाज्ञवल्क्यादीनां[१२] ब्रह्मविदां पुत्रजनकाद्युपदेशप्रवृत्तिश्रवणात्[१३]। उपदेशोऽपि कर्मैव। त्वं च केवलं निष्क्रियात्मवित् क्रिया[१४] नास्तीति ब्रवीषि। न च[१५] तथा वर्तसे। भिक्षाटनादि व्यापारं[१६] करोषि। अतश्च[१७] तत्कारी च भवांस्तद्द्वेषी[१८] च भवानिति। कस्त्वदीयं वचनं[१९] प्रमाणीकुर्यात्।

अथ ज्ञानकर्मणोर्विरुद्धफलत्वात् त्याग इति चेत्। तन्न। विदुषा क्रियमाणस्य[२०] कर्मणोपवर्गार्थत्वादविरोध(:)। भिन्नफलत्वे[२१] हि विरोधः स्यात्। किञ्च—प्रश्नोपि[२२] तेन नोपपद्येत—सन्न्यासं

---

१. …शरीस्वत्कर्मत्याग०–व। २. भोतनादिभिस्तस्य–व। ३. एश्वर्साश्च–व। ४. मुस्य–व। ५. सन् कंधेन–व। ६. कुणंयं–व। ७. प्रतिज्ञानं–व। ८. तरंगपनयादशक्यं स्वानं–व। ९. निमिन्नभूतानि–व। १०. निमिन्नकं–व। निामत्तिकं–ल॥ ११. तस्याज्ञानकर्मणोविरोधादिति–व। १२. …चोदालकयाववल्कयादीनां–व। १३ पुत्रनकाद्युवदेश०–व। १४. निष्क्रियात्मविक्रिया–व। १५. भ च–च। १६. भिक्षानादिव्यापारं–व। १७. आन्ताश्च–व। १८. भावांस्तद्वेषी–व। १९. वचन–व २०. क्रियमाणस्ये–व। २१. भिन्नफलत्वे–व। २२. किंश्वि न प्रस्तोपि -व।

कर्मणां कृष्ण—इति । नहि संन्यासशब्देन[1] पुरस्तात्त्यागः क्वचिदुक्तः[2] । मयि सर्वाणि कर्माणि—इतीश्वरे तेषां समर्पणमुक्तम् । तस्मात्तत्रैवायमनुवादो न त्यागस्य ।

योगश्च—ब्रह्मार्पणम्—इत्यत्रोक्तोनूद्यते । तत्र प्रश्नोपपत्ति[3]-र्व्याख्याता । यदि च विदुषः कर्मत्यागः पुरस्तादुक्तः[4] स्यादर्जुनेन प्रतिपन्नः स्यात्तत्र[5] त्यागकर्मयोगयोर्भिन्नपुरुष-विषयत्वात् कुतः[6] प्रश्नावतारो भागवतश्चोत्तरं नाम (प्रति)-पद्यते । नैःश्रेयसकरावुभौ[7] । कर्मसंन्यासाच्च[8] कर्मयोगो विशिष्यत इति । कथं कर्मत्यागस्तदनुष्ठानश्च निःश्रेयसकरम्[9] । त्यागो ह्यभावः । नासौ निःश्रेयसकारणमवस्तुत्वात् । यदि चाभावान्निःश्रेयसप्राप्तिः को हि गुरुकर्मभारं[10] शिरसोद्वहेत् । न च विद्वत्कर्तृकयोस्त्यागकर्मणोः[11] प्रश्नोत्तरं सम्भवति विदुषोपि कर्मत्यागानुपपत्तेरुक्तत्वाद् न्यायतो वचनतश्च ।

नाप्यविद्वत्कर्तृकविषयं प्रश्नोत्तरम् । अविदुषोपि कर्मण्येवाधिकार इति त्यागस्य निषिद्धत्वात् । तदेवमवाचकेन[12] ग्रन्थेन स्वाभिप्रेतसमर्थना क्रियते येन तस्य स्याद् गोमयेनापि[13] पायसमित्यलमतिप्रसङ्गेन ।

इदं तावत्तत्त्वं श्रेयोर्थिनामुक्तम् । नास्माकं व्यसनिता । ये विपरीतवर्त्मगामिनस्ते सर्वे पथि स्थापयितव्या[14] इति । असद्वर्त्मनि हि प्रायेण प्राणिनो रमन्त इति ॥ ९ ॥

---

१. …शद्बेन–व । २. पुरस्त्यात्त्यात्त्यामः त्कचिदुक्तो–व । ३. …मित्यात्रोक्रेतूद्यते तत्र पश्नोपपत्रि०–व । ४. पुरस्तादक्त–व । ५. स्यात्र–व । ६. …विषवत्वात्–व ।७. नैच्चेयसकारावुभौ–व ।८. …सन्न्यासाश्च–ल । व ॥ ९. …त्यागंदनुष्टनं च निःश्रेययसकरं–व । १०. कोदिमुरुकर्म मारं शिरं शिरसो द्वियेत्–व । ११. …स्सागकर्मणोः–व । १२. तदेवं अवाचकेन–ल । व । १३. स्यादोभदेनापि–व । १४. रथापयितव्या–व ।

अथेदानीं प्रकृतमनुसरामः। यानि पुनः शास्त्रचोदितानि[1]—

(ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥१०॥)

ब्रह्मेति। दृष्टान्तोपन्यासार्थः श्लोकः[2] ॥ १० ॥

तैः कर्म क्रियते। किं विशिष्टैः किमर्थं चेत्युच्यते—

(कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥ ११ ॥)

कायेनेति। केवलशब्दः कायादिभिः प्रत्येकं सम्बध्यते। केवलशब्दः शुद्धवचनः[3]। (केवलैः) फलासङ्गदोषरहितैः। संकल्पविकल्पात्मकं मनः। बुद्धिरध्यवसायात्मिका। आत्मशुद्धये। शुद्धिः कैवल्यं मुक्तिरित्यर्थः। कायादिविशुद्धो[4] मुक्त इत्युच्यते ॥ ११ ॥

तस्यैव स्पष्टीकरणार्थमिदमुच्यते[5]—

(युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥१२॥)

युक्त इति। युक्तः कर्मफलं त्यक्त्वा शान्तिं मुक्तिं[6] प्राप्नोति नैष्ठिकीं[7] निश्चलाम्। यः पुनरयुक्तः कामकारेण। कामः प्रवृत्तीच्छा[8]। प्रवृत्त्याफले सक्तो निबध्यते न मुच्यते[9]। तस्माद्योगी ब्रह्मणि निःक्षिप्य कर्म कुर्वन् मुच्यत इत्युपसंहारार्थं वचनमेतत् ॥ १२[10] ॥

---

१. चोदितानि–व, ल। २. श्लोकः११–व ल। ३ शुद्धवधमनः–व। ४. कायादिवशुद्धो–व। ५. ...मिदमुच्यतं १२ व। ल ॥ १२। ६. सुक्ति–व। ७ नेष्ठिकी–व। ८. प्रवृत्तीछा–व। ९. सच्यते–व। १०. १३ व, ल।

शान्ति प्राप्तस्य[1] कीदृशी फलावस्था भवतीति तां प्रदर्शयति। यदि हि सावस्था[2] निरायासा स्यात्ततस्तत्प्राप्त्युपाये[3] ज्ञानकर्मसमुच्चये तदर्थिनः प्रवर्तन्ते नान्यथेति—

(सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥)

सर्वेति। सर्वशब्दः प्रकृतवाची। लौकिकं वैदिकं च कर्म मनसाध्यात्मचेतसा ब्रह्मणि सन्न्यस्य सम्यङ् निक्षिप्य[4] सर्वं कर्म ब्रह्मैव[5] तदेव कर्तृ तत्फलं च तदेवेत्येकत्वमनुदृश्य पूर्वमनुष्ठानावस्थायां[6] पश्चाल्लब्धज्योतिः[7] परमात्मभूतः सुखमास्ते।[8] विमुक्तसमस्तबन्धनोन्तर्यामिवत्[9]। भोगेनैव प्रारब्धकार्यकर्मक्षयप्रतिज्ञानाच्छरीरपातं[10] यावत्। तथा च श्रुतिः—तस्य तावदेव चिरं यावन्न विमोक्ष्येथ सम्पत्स्य इति। यावच्छरीरान्न विमोक्ष्यते। प्रारब्धफलकर्मफलभोगप्रतिबन्धात्तावदेवास्य[11] विदुषश्चिरम्। भुङ्क्ते तु कर्मणि[12] प्रतिबन्धाभावात्। अथ सम्पत्स्ये मुच्यत इत्यर्थः। शरीरस्थोपि कौन्तेय न[13] करोति न लिप्यत इति स्मृतेः। अत एव[14]वशी स्वतन्त्रः। अथ आसिः औदासीन्ये धातुर्वर्तते। यथा गृहं परिगृह्यास्ते। क्षेत्रं परिगृह्यास्त[15]—इत्यौदासीन्यवचनो नोपदेशवचनस्तद्वत्[16]। इदानीं

---

१. शांतिप्राप्रस्य–व। २. मावस्था–व। ३. ···स्यात्ततस्मात्प्रात्युपाये–व। ४. सम्यंक्रिक्षिप्य–व। ५. ब्रमैव–व। ६. पूर्वमतुष्ठाभावस्थायां–व। ७. पश्चाल्लबुज्योतिः–व। ८. सूखमास्ते–व। ९. विभुक्तसमक्तसमस्तवंधनोंतर्यामिमत्–व। १०. प्रारब्धकार्थ कर्म०। ११. प्रारब्धफलकर्मंफलभोगप्रतिवंधात्ताधदेवास्था–व। १२. भुंक्तेलु कर्मार्णि–व। १३. कोंतेय–व। १४. वर्शा–व। १५. अयग्नासिरोदासीन्यधातुर्वंत यथा ग्रहं परिग्रस्वास्ते क्षेत्रं परिग्रह्यस्ति–व। अथ सासिरौदासीन्पे०–ल॥ १६. ०वचनस्त–व।

परमात्मा संवृतः[1] सन्नवद्वारे पुरे सप्त शीर्षण्यानि द्वाराणि द्वे[2] नासिके द्वे नेत्रे तथा श्रोत्रे मुखमेकमधस्ताद्[3] द्वे पायूपस्थे पुरे शरीरे देही[4] नैव कुर्वन्न कारयन्। देहसम्बन्धस्य निवृत्तत्वात्तदानीं तत्कार्याभावः[5]। प्रागवस्थायां तु देहसम्बन्धानुवृत्तेः[6] कुर्वन् कारयंश्चास्ते[7]। कुर्वन्निति[8] स्वतन्त्रकर्तृत्वम्। कारयन्निति हेतुकर्तृत्वम्। यथा पचति पाचयति इति। तथा च श्रुतिः—सलिल एको द्रष्टा[9] द्वैतो भवति[10]—इति। एवं परमात्मस्थितिवर्णनार्थायामस्यां गीतायामुत्तरा[11] गीता सम्यग्घटते। न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः—इति। यदि[12] पुनः स्थितप्रज्ञस्य योगिनो म्रियमाणशरीरस्य[13] क्षुत्पिपासापरीतस्यावस्थेयमुच्यते। तस्याः[14] कः प्रसङ्गो लोकस्य कर्तृत्वकर्मसर्जने येन प्रतिषिद्ध्यते[15]। प्रभुशब्दप्रयोगोपि परमात्मावस्थावर्णने[16] युज्यते।

कर्मत्यागवादिनोन्यथा व्याचक्षते। सम्यग्दर्शी[17] विद्वान् सर्वकर्माणि नित्यनैमित्तिकादीनि सम्यङ् न्यस्य[18] त्यक्त्वास्ते सुखं[19] वशी जितेन्द्रियः[20]। क्व पुनरास्ते तदा। नवद्वारे शरीरे। नैव कुर्वन्न कारयन्निति[21]। तदिदं स्वपक्षरागाविष्टचेतसोपव्याख्यानम्। नहि[22] ब्रह्मभूतस्य विदुषो देह आसनमुपपद्यते[23]। नासौ परिमिते देशे काले विशेषे वास्ते सर्वदेशकालव्यापित्वात्। उक्तश्च—नित्यः सर्वत्रगः स्थाणुः—इति। न चामूर्तस्यात्मनः

---

१. स प्रवृत्तः–व। २. द्यरारिण–व। ३. ···मेकषधस्ता–व। ४. देहि–व। ५. ···भावाः–ब। ६. देक्षसंबंधानुवृत्ते–ब। ७. कारयश्चारते–व। ८. कुर्वन्तिति–व। ९. द्दष्टा–व। १०. मवतिद्वेतो–व। ११. ···मुन्तरागीता–व। १२. युदि–व। १३. म्रियमाणाशरारस्य–ब। १४. तस्यः–ल। १५. प्रतिषेद्धोते–व। १६. परप्रात्मावस्था व०–व। १७. सम्यग्रर्शे–व। १८. सम्यकस्य–व। १९. मुखं–ब। २०. जितेद्रियः–व। २१. कुर्वन्त कारयन्तिति–व। २२. व्याख्यानं हि–व। २३. आसन् मुपपद्यते–व।

शरीरे मूर्त(वद्) उपवेशनं युज्यते। अभिमानकृतमेव त्वासनम्। ममेदं शरीरमहमस्य[1] स्वामीत्यकुर्वन्नकारयंश्चेति[2] चास्मिन्नपि व्याख्यानविशेषणं[3] नावकल्पते। सर्वशब्दश्च शौचाचमनाशनपानादीनां शिष्यप्रशासनादीनामनन्तानामभिप्रेतानां[4] क्रियमाणत्वात्[5] सर्वत्यागवादिनः सुतरामवाचकः श्लोकः।

मनोग्रहणञ्च कर्तव्यं[6] सर्वकर्माणि त्यक्त्वा मनसैव[7] हि त्यज्यन्ते। सन्न्यासग्रहणं[8] च न कुर्यात्। संत्यज्येति[9] ब्रूयादसन्देहाय। तस्मान्मनसा[10] सन्न्यस्येति पूर्वोक्तसन्न्यासप्रतिपत्त्यर्थं योगसन्न्यस्तकर्माणमिति[11]। तस्माद्यथा व्याख्यात एवार्थ इति स्थितम्॥ १३[12]॥

सोयं परमात्मा—

(न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते॥ १४॥)

नेति। मुक्तः प्रभुरीश्वरः संपन्नः प्राणिनमिव पुत्रभृत्यकलत्रादेर्नियन्तव्यस्येह विद्यमानत्वादुच्यते। न कर्तृत्वादि। आत्मीयस्य पोष्यवर्गस्य विधत्ते स्वस्वामिसम्बन्धनिवृत्तेः। न च तत्कृतस्य शुश्रूषादिलक्षणस्य कर्मणोनुरूपं फलं सृजत्याप्तकामत्वादिति। मुक्तस्य प्रागिव भृत्यादेः कर्तृत्वादिनिषेधः[13]। कर्तृत्वादि-

---

१. ...महमस्या–व। २. ...न्न कारयंश्चेति–व। ३. ...विशेषणा०–व। ४. शिष्यप्रशानादीनामानंताभाभभिप्रतानां–व। ५. क्रियमानत्वाः–व, क्रियमाणत्वा–ल। ६. कर्तव्य–व। ७. मनसेव–व। ८. सन्न्यसि०–व। ९. कुर्यात्त्संत्यज्ये–व। १०. तस्मात्मनसा–व। ११. ...सन्न्यास्तकर्माणिमिति–व। १२. १४–व। ल॥ १३. मुक्तः सखाभिसंवंधनिवृत्ते न च तकृतस्य श्रुश्रुषादिलणस्य कर्मणो मुरूपं फलं सृजत्यासकामत्वादिति मुक्तस्य प्रागिव पुत्रभृत्यकलत्रादेनियंतव्यसेह विद्यमानत्वादुच्यते आत्मीयस्य पोष्यबर्गस्य विधतै कर्तृत्वाभिनिषेधः।

निबन्धनं हि स्वाभाविकमज्ञानम्[१]। तत्सहता यत्नेनापनयन्[२]। यथा प्रभुर्लोकस्य[३] कर्तृत्वादि स्वेच्छया न सृजति न च कर्मफलसंयोगमाप्तकामत्वात्। स्वे महिम्नि हि परमात्मा स्थितः[४]। प्राणिकर्मैव सृष्टौ फलोत्पत्तौ च निमित्तम्। ईश्वरस्तु कर्मानुविधायी तन्नियन्ता[५]। नहि तस्य कर्तृत्वाद्यापादने लोकस्य प्रयोजनमस्ति[६]। उदासीनो हि सः। अन्यथा वैषम्यनैर्घृण्यप्रसङ्गादीश्वरो[७] रागादिमान् स्याद् यथा राजा[८] भृत्यानां कर्माणि च विधत्ते[९]। राजभृत्यानां च परस्परसापेक्षत्वमन्योन्योपकारकत्वात्[१०]। कथं तर्हि लोकस्य कर्तृत्वकर्मफलसंयोगस्तदाह[११]—

स्वभावस्तु प्रवर्तते। अज्ञानप्रभवौ रागद्वेषौ। तन्मूलं[१२] च कर्म। ततः शरीरग्रहणम्। पुनः कर्म। पुनरज्ञानम्। पुना रागद्वेषाविति[१३]। तदिदं चक्रमेव समावर्तते। अव्यापृतावस्थेश्वरतुल्यतेह परिपक्वयोगस्य[१४] योगिनो दृष्टान्तार्थमुक्ता। व्यापृतावस्थस्य त्वीश्वरस्य जीवकर्मानुरूपं जगद्विधातृत्वं[१५] श्रुतिस्मृतिसिद्धं स्थितमेव ॥ १४[१६] ॥

यस्मादयमीश्वरो न रागादिवशेन लोकं प्रेरयति तस्मात्—

(नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ १५ ॥)

---

१. कर्तृत्वादिनिवधवंहि स्वामाविवकामज्ञानं–व। २. सहतायनयनयन्–व। …सहतायत्नेनापनयन–ल ॥ ३. मभुर्लोकस्य–व। ४. स्वेनहिभ्रि परना स्थितः–व। ५. तन्नियंता–व। ६. प्रयोजुन म०–व। ७. नैर्घृण्यप्रसंमादीश्वरे–व। ८. रागादिमांद्याद्यथा। राज–व। ९. विद्यत्ते राजमृ०–व। १०. …मन्योसोपकारात्–व। ११. संयोगास्तत्वृहि–व। १२. …प्रभवो रागद्वेषौ। तःन्मूलं–व। १३. पुनरज्ञानें पुनं पुनरामद्वे०–व। १४. …पत्कयागम्यायोगि०–व। १५. ०कर्मानुनूपजाग्राद्विधातृत्वं–व। …जाग्रद्विधातृत्वं–ल ॥ १६. १५–व। ल ॥

[1]नादत्त इति। कस्यचित्सम्बन्धि पापं न गृह्णाति। न च सुकृतमादत्ते। हेत्वभावात्[2]। यदीश्वरः स्वार्थं न प्रयुङ्क्ते लोकं केन तर्हि मुह्यन्ति[3] जन्तवः। तदाह—स्वभावस्त्वज्ञानेनाविद्यया[4], अविद्या विपरीतज्ञानम्। देहादिष्वात्माभिमानो ब्रह्मस्वरूपाग्रहणं[5] चाविद्योच्यते। तयावृतमाच्छन्नं ज्ञानम्। तेन मुह्यन्ति[6] ॥ १५ ॥

येषां तु—

(ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६ ॥)

ज्ञानेनेति[7]। आदित्यवद् यथादित्यो भुवनमण्डलं[7] प्रकाशयति तथा ज्ञानमज्ञानं विनाश्य तत्परं ब्रह्म प्रकाशयति। ब्रह्मैवेदं सर्वमहं च ब्रह्मेति ज्ञानी[8] पश्यतीत्यर्थः ॥ १६[9] ॥

इत ऊर्ध्वमध्यायपरिसमाप्तेः ज्ञानस्वरूपं तत्सहकारिसाधनं[10] प्रतिपाद्यते—

(तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥)

तद्बुद्धय इति। तस्मिन् ब्रह्मणि बुद्धिर्येषां ते तद्बुद्धयः[11]। तद् ब्रह्मात्मा येषां ते तदात्मानः। तस्मिन्निष्ठा तात्पर्यं येषां ते तन्निष्ठाः। तत्परायणं गतिर्येषां ते तत्परायणाः। तदात्मानस्ते

---

१. नादत्तेति–व। ल॥ २. हत्वाभावात्–व। ३. मुज्यंति–व। ···स्तु अजानेननावि०–व। ४. ···तुदाह अज्ञनेनावि०–ल। ५. दहादिष्वात्माभिमानो ब्रह्मत्वरूपाग्रहणां–व। ६. वृत्तमाछन्नज्ञानेंतेननुह्यंति १६ व। ०१६ ल॥ ७. येषा तु क्षानेनैति आदित्यवद्यथादित्यभुवन–व। ल॥ ८. ब्राह्मेति क्षावी–व। ९. १७.–व। ल॥ १०. इवद्गद्यमध्यामसमार्सेक्षनि ···साधन–व। ११. ते द्वुदयः–व।

तन्निष्ठास्तत्परायणा गच्छन्त्यपुनरावृत्तिं मोक्षं[1] ज्ञानेन निर्धूतं कल्मषं येषां ते तथोक्ताः ॥ १७[2] ॥

कीदृशं तज्ज्ञानमित्युच्यते[3]—

(विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १८ ॥)

विद्येति । विद्या च विनयश्च (विद्याविनयौ) । विनयः संयमः । [4]ताभ्यां सम्पन्ने अध्ययनादिसंस्कारवतीत्यर्थः । ब्राह्मणवत्पूज्यतमत्वाद् गोग्रहणम्[5] । मध्यमप्रतिपत्त्यर्थं हस्तिग्रहणम् । श्वश्वपाकग्रहणमत्यन्तास्पृश्यावज्ञेयभूतप्रतिपत्त्यर्थम् । पण्डिताः समदर्शिनस्तेषु[6] ब्रह्मावस्थितं समं तद्दर्शिनो भवन्ति । सर्वभूतेष्वाकाशवद् ब्रह्मस्वरूपमनुगतं पश्यन्तीत्यर्थः ॥ १८[7] ॥

एवं सम्यग्दर्शिनां[8] को लाभ इत्याह—

(इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ॥१९॥)

इहेति । इहैव देहस्थितैः सर्गः पुनर्भवो जितो नाशितो येषां साम्ये ब्रह्मस्वरूपे स्थितं मनस्तैरित्यर्थः । निर्दोषं हि समं[9] ब्रह्म । बुद्ध्या[10] दृश्यमानं सर्वं ब्रह्मैव[11] सम्पद्यते यथा लवणक्षेत्रे[12] पतितं वस्तु लवणमेव सम्पद्यते । तस्मिन् ब्रह्मणि ते स्थिता यस्मात्तस्मात्तैर्जित[13] इति पूर्वेण सम्बन्धः ॥ १९[14] ॥

---

१. ···तत्पराणा गछंत्यपुनरावृत्तिंमोक्षं–व । गतिर्येषां ते तदात्मानस्तेस्मितत्परायणा गछन्त्य०–ल ॥ २. १८ ल । व ॥ ३. तक्षानमित्यु०–व । ४. ताभ्यां पन्ते–व । ५. ब्राह्मणंवत् पूज्यतमत्वाद्गोग्रहणम्–व । ६. समदर्शनस्तेषु–व । ७.···गतवश्यतीत्यर्थः–१९ व । १९ ल ॥ ८. ···द्दर्शिनां–व । ९. निर्देषं हि संमं–व । १०. वुद्ध्या–व । ११. ब्रह्मेव–व । १२. लवनक्षेत्रे–व । १३. यस्मात्तस्मूरत्तेर्जित इति–व । १४. २० ल । अस्याङ्कस्याभावः–व ॥

यश्च ब्रह्मणि स्थितस्तस्य[1] तदनुगुणं साधनमुपदिश्यते—

(न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥२०॥)

न प्रेति । प्रियमिष्टं प्राप्य न प्रहृष्यं प्रकर्षेण हृष्टिर्न[2] कर्तव्या । नोद्विजेत्[3] प्राप्य चाप्रियम् । उद्वेगश्चित्तव्यथा । स्थिरा निश्चला निर्विचिकित्सा बुद्धिर्यस्य स स्थिरबुद्धिः । असम्मूढो विविक्तचित्तवृत्तिः ॥ २०[4] ॥

किञ्च—

(बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमव्ययमश्नुते ॥ २१ ॥)

बाह्येति (॥ २१ ॥)

कथं पुनरात्मसुखस्यैवाक्षयत्वम् । ननु बाह्यस्पर्शसुखमप्यक्षयमेव । नेति ब्रूमो यस्मात्[5]—

(ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२ ॥)

य इति । ये हि संस्पर्शजा भोगा विषयसंसर्गनिबन्धना दुःखस्य योनयस्ते । योनिः कारणं यस्मात् । आदिमन्तोन्तवन्तश्च कादाचित्काः क्षणिकाः । न तेषु रमते बुधो दोषदर्शी[6] ॥२२[7]॥

कश्च योगी सुखी च । तदुच्यते—

(शक्नोतीहैव यः सोढुं प्राक् शरीरविमोचनात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥२३॥)

---

१. स्थितलहस्य-व । २. न प्रत्यष्य प्रकर्षणहष्टिर्न-व । प्रकर्षण०-ल ॥
३. नोद्विजोत्-व । ४. २०-ल । व ॥ ५. यस्पात् २२-व । ६. वुधो दोर्शी-व ।
७. २३-व । ल ॥

शक्नोतीति। इहैव[1] देहे सोढुं नियन्तुं यः शक्नोति न क्षणमात्रं किन्तु[2] प्राक्शरीरविमोचनाद् आदेहपातात्। कामोद्भवं क्रोधोद्भवं[3] वेगम्। अप्राप्तप्राप्तीच्छा कामः। तेन[4] प्रेरिता चित्तवृत्तिः [5]कामवेगोनुरक्तचित्तवृत्तिनिरोधः कामोद्वेगनिरोधो[6] नेत्रवक्त्रविकारलिङ्गः। क्रोधस्तदुत्थवेगनिरोधश्च[7]। तावेतौ वेगौ[8] निरु(ण)द्धि यः स युक्तः स सुखी नरः॥ २३[9]॥

यश्चैवं कामक्रोधौ जित्वात्मनि[10] वर्तते स मुक्त एवमुच्यते। तदाह—

(अन्तःसुखोन्तरारामस्तथान्तर्ज्योतिरेव यः।
स पार्थ परमं योगं ब्रह्मभूतोधिगच्छति॥ २४॥)

अन्तरिति। अन्तरात्मनि[11] सुखं यस्यासावन्तःसुखः। अन्तरात्मन्यारामः क्रीडा[12] यस्यासावन्तरारामः। तथान्तरात्मा ज्योतिर्यस्यासावन्तर्ज्योतिर्न वाह्यादित्यादिज्योतिः[13]। सः। हे पार्थ! परमं योगम्। युज्यत इति योगः। तं परमात्मानं ब्रह्मभूतोधिगच्छति॥ २४[14]॥

किञ्च—

(लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः॥ २५॥)

लभन्त इति। लभन्ते ब्रह्मणि निर्वृतिम्[15]। अथवा ब्रह्मैव निर्वाणं परमं सुखमृषयो[16] दर्शनवन्तः[17]। क्षीणं कल्मषं येषां ते

---

१. शक्नोतीति इहेव–व। २. कि.तु–व। ३. देहयतोत्व हामोद्भवक्रोधोद्भव–व। ४. प्राप्तिच्छाकामस्तेम–व। ५. कामवेगोनुरक्त०–व। ६. कामोत्थवेर्गानरोधः–व। ७. ···स्तदुत्थवगाणिरोधश्च–व। ८. तावेतो वेगौ–व। ९. २४–व। ल॥ १०. जितात्मनि-व। ११. अन्त इति अन्तरात्मानि–ल। ६॥ १२ कोडा–व। १३. नेत्राज्यादित्यादिज्योतिः–व। १४. २५–व। ल॥ १५. ब्रह्मनिर्वृत्तिम्–व। १६. सुखमृषभंयो-व। ल॥ १७. दर्शनवंतः–व।

तथोक्ताः । छिन्नं द्वैधं संशयो[1] यैस्ते[2] छिन्नद्वैधाः । यतात्मानो नियतान्तःकरणाः । सर्वभूतानां हिते रता अहिंसका इत्यर्थः ॥ २५[3] ॥

स एव शान्त्युपायः पुनः कथ्यते । बहुशः श्रवणात् स्थिरसंस्कारं चित्तं भवतीति[4]—

(कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥ २६ ॥)

कामेति । यतीनां परिव्राजकानाम्[5] । प्रदर्शनार्थमेतत् । गृहस्थादीनामथवा यतीनां यत्नवताम् । तस्यैव निर्वचनं[6] यतचेतसामिति । अभितो निकटे समीपकाल इत्यर्थः । निर्वाणं निरतिशयानन्दरूपम्[7] । अभित उभयत इत्येके । जीवतां[8] मृतानां चेति । तदसत् । जीवतां चेन्निर्वाणं[9] सिद्धं मृतानां दण्डापूपिकया सिद्धमिति न वक्तव्यं मृतानामिति ॥ २६[10] ॥

मुक्त्युपायप्रसङ्गेन[11] योगोऽपि मुक्त्युपायत्वादन्तरङ्गत्वाच्च प्रस्तूयते । षष्ठे तस्य विस्तरो भविष्यति—

(स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥२७॥)

स्पर्शानिति[12] । बाह्यान्[13] विषयान् बहिरेव[14] कृत्वा यदा मनसान्तरात्मनि नोपसर्पन्ति[15] तदा विषया बहिरेव भवन्ति ।

---

१. द्वेधं–व । द्वैधं संशयं–ल ॥ २. येस्ते–व । ३. २५ व । ल ॥ ४. भवतीति २६ ल । ५. यतीनां पतिवाजकानां–व । ६. निर्वचन–व । ७. निरतिशयाजंदनुपं–व । ८. जीवजां–व । ९. चेत्तिर्वाणं–व । १०. २७ व । ल ॥ ११. मुक्तुपायप्रसंगेन–व । १२. स्पर्शादिति–व । ल ॥ १३. वास्वान्–व । १४. वाहेरेव–व । १५. मनसांनरात्मनो नोपसर्यति–व ।

भ्रुवोरन्तरे[1] मध्ये चक्षुः कृत्वेत्यधिक्रियते । प्राणापानावुच्छ्वासनिःश्वासौ नासाभ्यन्तरचारिणौ समौ कृत्वा । नोच्छ्वासमधिकं करोति न निःश्वासम् । यथास्वभावप्रवृत्तौ कृत्वेत्यर्थः ॥२७[2]॥

वस्तूत्तरेण समाप्यते—

(यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥ २८ ॥)

यतेति । नियतानीन्द्रियाणि मनो बुद्धिश्च यस्य स वशी । मननान्मुनि(ः) । मोक्षः परमयनं गतिर्यस्यासौ मोक्षपरायणः । विगतेच्छा भयं च क्रोधश्च यस्यासौ विगतेच्छाभयक्रोधः । इच्छा कामः । य एवं सदा वर्त(ते) मुक्त एव सः । नास्त्यत्र विचारणा[3] ॥ २८[4] ॥

मुक्त्युपायो दर्शितः । ज्ञेयस्तु साक्षाद्दर्शयितव्यो यं ज्ञात्वा मुच्येतेत्याह[5]—

(भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ २९ ॥)

भोक्तारमिति । यज्ञानां तपसां च फलम् । तस्य भोक्ता । भक्तैः समर्पितानि[6] फलानि[7] दृष्ट्वा तृप्यति[8] तुष्यतीत्यर्थः । न पुनस्तस्याप्तकामस्यान्यादृशो[9] भोगोस्ति यथा निवेद्य समर्पणे[10] देवता प्रीयते । सर्वेषां लोकानां महान्तमीश्वरम् । (सुहृदं) प्रत्युपकारानपेक्षयोपकारिणं ज्ञात्वा मां[11] शान्ति मोक्षमृच्छति

---

१. भ्रुवोरंतरे–व । २. २८ व । ल ॥ ३. विचारणाः–व ४. २९–व । ल ॥ ५. दर्शयितव्य इत्याह व्यं ज्ञात्वा मुच्यते–व । दर्शायतव्य इत्याह यं ज्ञात्वा मुच्यते–ल ॥ ६. समर्यितानि–व । ७. फलांनि–व । ८. तप्यति–व । ९. ०न्यादशो–व । १०. समर्पणो–० । ११. सा–व ।

गच्छति । देहसम्बन्धाभिमानशून्यस्य सुब्रह्मरूपेणावस्थितस्य[1] भगवतो वचनम् । ऋषीणामपीमानि[2] वचनानि परमार्थे सत्येवस्थितानाम् । यथा—तद्धै तथा पश्यन्नृषिर्वामदेवः[3] प्रतिपेदे—अहं मनुरभवं सूर्यश्च—इति । अत एव सर्वकर्माणि मनसा इत्युपपन्नम् ॥ २९[4] ॥

(इति श्री)भगवद्भास्करकृते[5] गीताभाष्ये

पञ्चमोध्यायः[6] ॥

१. शून्यस्य सुब्रह्मरूपेवस्थितस्य–व । २. ०मृषीणानवीशानि–व । ३. तद्धे तथा पश्यु ऋषिर्वा०–व । तद्धैतत्पश्यन् ऋषिवमिदेव इति पाठान्तरम् । ४. ३०–व । ल ॥ ५. भगवद्भारकरकृते–व । ६. पञ्चमोध्यायः ॥ ५ ॥–ल ।

अथ षष्ठोऽध्यायः ।

अनन्तरातीते ग्रन्थे केवलज्ञानसंकीर्तनात् तावन्मात्रादेव मुक्तिः स्यादतः कर्मत्यागः कर्तव्य इति सांख्यदर्शनाकुलितचेतसः[1] सौकर्याच्च[2] मुमुक्षोर्बुद्धिः स्यात्तां निराकर्तुमाह—

श्रीभगवानुवाच—

(अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स सन्न्यासी स योगी च न निरग्निर्न चाक्रियः ॥१॥)

अनाश्रित इति । अनाश्रितः कर्मफलाभिसन्धिवर्जितः कार्यं नित्यं कर्म स्वाश्रमविहितं[3] करोति यः स सन्न्यासी[4] स योगी च । स सन्न्यासी —मयि सर्वाणि कर्माणि—इत्युक्तलक्षणो[5] योगी च—ब्रह्मार्पणम्—इति । न निरग्निर्निरस्ताग्निः । अक्रियस्त्यक्तकर्मा । नैवंविधः[6] सन्न्यासी योगी च यः[7] । (इ)ह विद्यया सह सम्बन्धो न कर्तुः[8] । सांख्यानां प्रसिद्धस्त्यक्तकर्मा चतुर्थाश्रमी सोत्र प्रतिषिध्यते । यो हि बुद्धिपूर्वं[9] कर्तव्यं न करोति नासावाश्रमी । प्रायश्चित्ती हि सः । तेन सह विद्यया[10] सह सम्बन्धो न कर्तव्यः ।

अत्रैकवेणुपाणयः कर्मत्यागिनां मूर्ध्नि[11] पदं निहितमुपलभ्य

---

१. दर्शनाकुलितचेतसः–व । २. सौकर्याश्च–व । ३. स्वाश्रमाविहितं–व । ४. सभ्यासी–व । ५. ०लक्षण-व । ६. नेवं विधः–व । ७. यो च य –व । ८. यो '(इ)ह विध(य)ा······कर्तुः' अंशोयं ल–कोषे नास्ति । यः ह विद्या सह संबंधो न कर्तु–इति व–कोषे पाठः ॥ ९. ०पूर्व–व । १०. विद्या सह–व । ११. मूध्नि–व !

तदन्यथा कर्तुं प्रयतमाना बह्वसम्बद्धं गर्जन्ति[१]। गृहस्थस्य स्तुत्यर्थं सन्न्यासित्वं योगित्वं चोच्यते[२]। न पुनर्निरग्नेरक्रियस्य च निराकरणं क्रियत इति। तदसत्। अन्यनिराकरणपरत्वादस्य वाक्यस्य। नित्यं[३] कर्म कुर्वतः सन्न्यासित्वं[४] योगित्वं च[५]। पूर्वैरेव च वचनैः[६] प्राप्तस्य निरग्नेरक्रियस्य (च) प्रतिषेधार्थं[७] नान्योस्य वाक्यस्यार्थोस्ति। यथा—

संक्षेपा(प)विस्तरावेतौ ज्ञात्वा च पारमार्थिकौ।
अजस्रमास्ते तच्चित्तः[८] स परं याति नेतरः॥ इति।

यथा चाब्रुवन् पूर्वे वेदपारगाः[९]—

स धर्म इति विज्ञायते(यो) नेतरेषां सहस्रशः।

इत्युक्तवेदपारगप्रतिषेधो(व)गम्यते। न च स्तुतिरेकस्मादत्र वक्तव्या। कर्मयोगित्वं[१०] गृहस्थादीनां यथाश्रुतमेवास्ति। तत्र[११] सन्न्यासित्वं नाम यदि[१२] कर्मत्यागित्वमुच्यते ततो निन्दा स्यान्न तु स्तुतिः। अथ फलत्यागित्वं तदप्यस्त्येव[१३]। किं तत्र स्तुतिकल्पनया। पूर्वत्र[१४] बहुशः फलसङ्कल्परहितत्वमुपदिष्टम्—मा[१५] फलेषु—त्यक्त्वा कर्मफलासङ्गमिति। यस्य हि भगवान् प्रमाणभूतस्तदुक्तत्वादेव प्रतिपद्यते। किं स्तुत्या। अथ (अ)प्रमाणं तथा स्तुतिरपि व्यर्था। न चात्र स्तुतिपरत्वं वाक्यस्य प्रतीयते[१६]

---

१. ०जागर्त्ति–ल। बह्वसंबद्धं जागर्ति–व॥ २. योगिचोच्यते–व। ३. नित्वं–व। ४. सआसिन्वं-व। ५. चः–ल। व॥ ६. पूर्वैस्वेवचनैः-व। ७. निरग्नियप्रतिषेधार्थं-व। निरग्नियप्रतिषेधार्थं–ल॥ ८. तश्चित्तः—व। ९. च यं ब्रू पूर्वेदपारगाः–व। १०. अस्ति यथा...कर्मयोगित्वं अंशोत्वम् ल–कोषे नास्ति। ११. ०यास्तित्र–व। १२. सन्न्या इति–व। १३. तदन्यस्त्यव–व। १४. पूर्व–व। १५. ०रहित्वमुयदिष्टमा–व। १६. प्रतीर्वत–व।

यथाभूतार्थप्रतिपादकत्वाच्छास्त्रस्य । तस्माद्बालैः[1] स्वचेष्टितं विहाय[2] भगवदुपदिष्टेन महामहामार्गेण गन्तव्यम् । यो हि स्वमात्मानं वञ्चयित्वा कष्टां गतिं[3] प्रापयति नासौ परेषां हितायोपदिशति । तथा चोक्तम्—

आत्मानं योभिसन्धत्ते[4] परेषां स हितः कथम् । इति ।

ननु—सन्न्यासी स योगी च—इत्येकः पुरुषः[5] कथमुच्यते । विरोधात् । यदि सन्न्यासो[6] कथं कर्मयोगी[7] । सन्न्यासित्वं[8] योगित्वं च (न) युगपत् सम्भवति । किञ्च—निरग्निरक्रियश्च सन्न्यासी प्रसिद्धः । क्रियावान् कर्मयोगी । तस्मादन्यः सन्न्यासी । कर्मयोगी चान्य इति पराभिप्रायमाशङ्क्याविरोधं दर्शयति—

(यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
नह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन ॥ २ ॥)

यमिति । सन्न्यासमिति[9] यौगिकोत्र सन्न्यासशब्दो मया प्रयुक्तः । परमात्मनि कृतानां कर्मणां सम्यक् त्यागो[10] निःक्षेपः समर्पणं सन्न्यासः[11] । सर्वसर्वाश्रमाणामविशिष्टो न रूढिशब्दः प्रयुक्तः[12] । यथा वैद्यशब्दश्चिकित्सके रूढो यौगिकस्तु सर्वत्र वर्तते । विद्यायां भवो वैद्य इति यो यो विद्यावान् स सर्वोभिधीयते ।

---

१. प्रतिपादत्वाच्छास्त्रस्य वालः–ल । वाह्यः–व ॥ २. धिहाय–व । ३. वंचपित्वा कष्टां गति-व । ४. योतिसत्वंत्ते-व । ५. ननु च सन्न्यासी योगी चेत्येकः पुरषः–व । ननु च–ल ॥ ६. विरोधातिसंन्यासी-व । ७. कमं-योगी–व । ८. सन्न्यासित्वं-व । ९. सव्यासमिति–व । १०. सम्यक्त्यगोः–व । ११. सन्न्यासः सर्व सर्व अमाणाम० । १२. प्रयुक्तेः–व । प्रयुक्तेःषष्ठाध्यायस्यायम् । ततः ६५ तमपृष्ठस्य समाप्तिः । ६६ तमपृष्ठस्य प्रारम्भस्तु सन्न्यासमित्यादि अनेन । सन्न्यासमित्यादि तु २६ तमश्लोकस्थभाष्यस्य । अवस्थेयं–व कोशस्य । प्रयुक्तो यथा–ल ॥

यदुक्तं—(संन्यासित्वं योगित्वं च) युगपन्न सम्भवति—इति। नासौ दोषो हेतुसद्भावात्। तदाह—नह्यसंन्यस्तसङ्कल्पो निःक्षिप्तः कर्मसङ्कल्पो येनासौ संन्यस्तसङ्कल्पः। तद्विपरीतो न योगी भवति कश्चन। अनेकजन्मप्रवृत्तभेदविज्ञानवासितचेतसां न सहसा भेदविज्ञानमुपपद्यते। अहं ब्रह्मास्मि—इति। तस्मात् सर्वम[.........]क (?) यस्तत्प्रसादादद्वैतज्ञानं प्रतिपद्यते। तस्मादेतद्वै पुरुषस्यावस्थाभेदमात्रं फलम्।

पुनरेकमेव मु[.....]क्तिरित्यभिप्रेत्योक्तम्—यं सन्न्यासमित्यादि[1] प्रशान्तमनसमिति पर्यन्तं (सन्न्यासम्—इत्यादि—प्रशान्तमनसम्—इति पर्यन्तं) ये प्राणिनः (उक्ताः) सन्ति तानात्मवशं[2] कुर्यादित्यर्थः ॥ २६ ॥

यदि योगसुखं स्यात्ततो विषयसुखपरित्यागो युज्यते। अन्यथा को नाम परित्यजेदित्याह—

(प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥)

प्रशान्तेति। प्रशान्तमनसं ह्येनं यस्माद्योगिनमुत्तमं विषयसुखादुपैति[3]। शान्तरजसं रजोविषयेषु प्रवृत्तिर्ब्रह्मभूतम्—भू प्राप्तावात्मनेपदीति स्मरणाद् भूतशब्दः प्राप्त्यर्थः। ब्रह्मप्राप्तमकल्मषम्[4] ॥ २७ ॥

---

१. यं स अस्मात्परं ल-कोषे रिक्तं स्थानम्। परपत्रारम्भस्तु—आत्मवशी कुर्यादित्यर्थः अनेन। २. ०मित्यादिप्रशातमनसिमित्यापर्यंत य आणिन संति दात्मावशं—व। ३. विषयसुस्वादुपेति—व। ४. प्रात्प्यर्थी व्रह्मप्रात्यमकल्पषत्—व।

प्रकरणार्थोपसंहारार्थः श्लोकः—

(एवं युञ्जन् सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंश्लेषमत्यन्तमुपगच्छति ॥ २८ ॥)

एवमिति । एवमुक्तप्रकारेणात्मानं युञ्जन् यो(गी विगत)-समस्तकल्मषः[1] सुखेनाक्लेशेन ब्रह्मसंश्लेषनिमित्तमत्यन्तसुख-मश्नुते ॥ २८ ॥

यदात्यन्तपरिपक्वो योगो भवति तदा कथं पश्यतीत्युच्यते—

सर्वभूतस्थमात्मानं सर्वाणि भूतान्यात्मनि[2] ।
पश्यते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥

(सर्वभूतेति ।) [3]अहङ्कारपरिच्छिन्नमविद्यानिबन्धनमौपाधिकं रूपं विहाय सर्वभूतस्थमात्मानं सर्वाणि भूतानि । आत्मनि परमात्मनि । आत्मपरयोरभेदविवक्षया[4] निर्देशः । पश्यते योगेन युक्त आत्मा यस्यासौ । सर्वत्र समदर्शनो ब्रह्मदृष्टि-रित्यर्थः ॥ २९[5] ॥

सर्वत्र परमात्मानम्—

(यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥)

यो मामिति । यो मां पश्यति[6] सर्वत्र तस्याहं न प्रणश्यामि । न तिरोभवामि । स च मे न तिरोभवति । मत्स्वरूप एवासौ भवतीति ॥ ३० ॥

---

१. ०णात्मानं युंजन्यो तु समस्तकल्मषः—व । २. सर्वभूतानि चात्मनि—ल । ३. आहंकारपरिछिन्न०—व । ४. परमात्मनिरात्मपरयोरभेदविवक्षया—व । ५. २८ व । ल ॥ ६. द्यश्यनि—व ।

फलकथनमेतत् क्रियते[1]। किञ्च—

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः।
सर्वथा वर्तमानोपि स योगी मयि वर्तते ॥ ३१ ॥

(सर्वभूतेति) [2]सर्वभूतस्थितं यो मामेकत्वमास्थितो भजते। सर्वथा वर्तमानोपि वा मयि मद्विकारे वाक्प्रपञ्चे[3] चेतसा वर्तमानो मय्येवासौ च वर्तते। ब्रह्मात्मना दृश्यमानं[4] सर्वं ब्रह्मैव सम्पद्यते यथोदकात्मना दृश्यमानः[5] फेनतरङ्गादिस्तत्रैवान्तर्भवति तद्वत्।

अन्ये तु यथेष्टचेष्टमपीति वदन्ति। तदयुक्तम्। नहीदृशस्य यथेष्टचेष्टता भवति ॥ ३१[6] ॥

योगिनः सर्वभावेषु मैत्रीभाव[7] उपदिश्यते—

(आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥३२॥)

आत्मौपम्येति[8]। उपमाया भाव औपम्यम्[9]। तेनात्मौपम्येनात्मसादृश्येनेत्यर्थः। सर्वत्र भूतेषु सुखं[10] वा पश्यति। समम्। यथा मम सुखं प्रियं तथान्येषाम्। यथा मे दुःखमप्रियं तथा परेषामिति। स योगी परमो मतः ॥ ३२[11] ॥

सर्वत्राद्वैतदर्शनलक्षणो योग उक्तः। तस्य[12] (ज्ञानम्) असंभवम्।

---

१. कथनमेत क्रियते–व। २. सर्वभूतास्थित–व। ३. मद्विकारोवाक्यपचे–व,·····वाक्यपञ्चे–ल। ४. दश्यमानं–व। ५. दश्यमान–व। ६. २९ व। ल ॥ ७. मैओभाव–व। ८. आत्मौपन्येति–व। ९. भाडौपम्पं–व। १०. सुस्वं–व। ११. ३० व। ल ॥ १२. युक्तस्तस्या–व।

अर्जुन उवाच—

(योयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥३३॥)

योयमिति । योयं योगस्त्वया प्रोक्तो मनसश्चञ्चलत्वात् स्थिरां स्थितिं तस्य[1] न पश्यामि ॥ ३३[2] ॥

यस्मात्—

(चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥)

चञ्चलमिति[3] । चञ्चलं हि मनः कृष्ण[4] अतिचञ्चलमितस्ततो धावमानम्[5] । प्रमथितुं[6] शीलमस्येति प्रमाथि । बलवद्वेगवद् दृढं भेदवासनया घनीकृतम्[7] । तस्याहं निग्रहं निरोधमात्मन्यवस्थानम् । वायोरिव सुदुष्करं मन्ये ॥ ३४[8] ॥

[10]भगवानुवाच—

(असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५ ॥)

(असंशयमिति) । निग्रहमवस्थानम् । असंशयम्[11] यथावदवसितं तथा । किन्त्वभ्यासेन । परमात्मनि पुनः पुनश्चित्तप्रवेशनमभ्यासः । शास्त्रेण सर्वं ब्रह्मेति सामान्येन[12] विज्ञाय हृदयकमलनिलये[13] परमात्मानं चिन्तयतश्चित्तं[14] दृढभूमिकं[15]

---

१. स्थिरास्थितिस्तस्य–व । २. ३१–व । ल ॥ ३. चंलमिति–व । ४. कृस्म–व । ५. अतिचंचलमितं धावमानं–व । ल ॥ ६. प्रथमितु–व । ७. घनीधुवं–व । ८. निग्रंह–व । ९. मन्य ३२–व । ...मन्ये ३२ ल ॥ १०. भगवानुवाच । ११. निग्रहमवस्थानमसंशयमिति–ल । सर्वं–व । १२. साभामेन–व । १३. ददयक्रमल०–व । १४. चितवश्चित्तं–व । १५. दटभूमिकं–व ।

भवति । एवमभ्यासेन गृह्यते वैराग्ये(ण च) । न प्रपञ्चविषयं वैतृष्ण्यं वैराग्यम् । यत्प्रपञ्चविषयफलं[1] तत्सर्वमशाश्वतमिति दोषदर्शनाद् वैतृष्ण्यमुत्पद्यते ॥ ३५[2] ॥

एतावानिह निश्चयः—

(असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योवाप्तुमुपायतः ॥३६॥)

असंयतेति । असंयतात्मना[3] अवशीकृत आत्मा मनो यस्य तेन[4] योगो दुष्प्रापो न शक्यते प्राप्तुम् । वश्यात्मना तु यतता यत्नं[5] कुर्वता शक्योवाप्तुमनन्तरोक्तोपायेन[6] ॥ ३६ ॥

यदा तु योगोप्राप्तः केनचिद्दौर्बल्येन[7] तदा तस्य का गतिरिति प्रष्टुमुवाच[8] —

(अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
लिप्समानः सतां मार्गं प्रमूढो ब्रह्मणः पथि ॥३७॥
अनेकचित्तो विभ्रान्तो मोहस्यैव वशं गतः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥३८॥)

अयतिरिति । अनेकचित्तो[9] विभ्रान्तो मोहस्यैव वशं गत इति च । अयतिर्यत्नरहितः श्रद्धया चोपेतो[10] योगाद्योगसकाशाच्चलितमानसोनिवृत्तमनाः । अप्राप्य योगसंसिद्धिं मुक्त्यभावे[11] कां गतिं कृष्ण गच्छति । नीलोत्पलदलच्छविः[12] कृष्णो युगानुरूपवर्णो वा ॥ ३७–३८[13] ॥

---

१. प्रपञ्च०···वैराग्यं यत् इति व कोषे नास्ति । २. वितृत्स्यमुत्पद्यते । ३३–व । ल ॥ ३. असंषतेति असंयतात्माना –व । ४. ज्ञेन–व । ५. पत्नं–व । ६. वाप्तु मनररोक्तेनोपायेन ३४–व । ०येन ३४–ल । ७ केनचिदौर्वल्पेन–व । ८. षष्ट उवाच–व । ९. ···चित्तो–व । १०. श्रद्धयाचोयेग्रो–व । ११. मुत्तरभावे–व । १२. ···लदछविः–व । १३. ३६ व । ल ॥

प्रश्नमेव[1] सोपपत्तिकं कर्तुमाह—

([2]कच्चिदुभयविभ्रष्टः शारदाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३९ ॥)

कच्चिदिति[2] । कच्चिदिति[2] प्रश्नार्थो निपातितः । उभयस्माद् भ्रष्टः[3] । कर्म तावन्न फलार्थं[3] कृतम् ईश्वरे[4] समर्पितत्वात् । न च ज्ञानं मुक्तिसममुत्पन्नम्[5] । तस्मादुभयभ्रष्टः । किं शारदाभ्रमिव वृष्टिरहितं नश्यति किं वा नेति । अप्रतिष्ठो न विद्यते प्रतिष्ठा यस्य । ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे विमूढो न(श्यति) ॥ ३९ ॥

(एतन्मे संशयं कृष्ण च्छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य च्छेत्ता नह्युपपद्यते ॥ ४० ॥)

एतदिति । एतं मे संशयं कृष्ण च्छेत्तुमपनेतुमर्हसि । कस्मात् । त्वदन्यः संशयस्यास्य च्छेत्ता जगति नोपपद्यते ॥४०[6]॥

उत्तरं भगवानुवाच—

(पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
नहि कल्याणकृत्तातो गच्छति कश्चिद् दुर्गतिम् ॥४१॥)

पार्थेति । हे पार्थ ! इह लोके परत्र वा (न) तस्य नाशोस्ति । कस्मात् । नहि कल्याणकृत् पुण्यकृद् दुर्गतिं[7] कश्चित्तातो गच्छति । तनोति पुत्रमिति यद्यपि तातः पितोच्यते तथाप्यन्यत्रापि[8] दृश्यते पूजार्थम्[9] ॥ ४१[10] ॥

---

१. प्रश्नमेघ–व । २. कश्चित्–ल । व ॥ ३. भष्टः–कर्म तावन्नफलार्थं–व । ४. ···इश्वेरे–व । ५. ···समुत्पन्नं–व । ६. ३७–व । ल ॥ ७. कुदुर्गति–व । ८. तथापि न्यत्रापि–० । ९. पूजार्थं–ल । १०. ३८–व । ल ॥

(प्राप्य पुण्यकृताँल्लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजायते ॥ ४२ ॥
अथवा योगिनामेव जायते धीमतां कुले ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥४३॥)

प्राप्येति[1] । अथेति च । यदुक्तवान् फलोद्देशेन[2] न कर्म कृतमीश्वरोद्देशेन कृतत्वादिति[3] । अत एव तस्य पुण्यकृल्लोकप्राप्तिः । नहि मामुद्दिश्य कृतमफलाय भवति । भोगायापवर्गाय वा तत्सम्पद्यते ।

पुण्यकृताम्—इति विशेषणाद्[4] ये त्यक्तकर्माणः[5] केवलाज्ज्ञानान्मुक्तिमिच्छन्ति तेषां दुर्गतिरेवेति दर्शयति । (नापि) अभिज्ञानस्य भोगः फलं कल्पयितुं शक्यम् अविद्यानिवृत्तिद्वारेण (तस्य) मुक्त्यर्थत्वात्[6] । न च कर्माभावो भोगहेतुः सर्वेषां प्रसङ्गात् । तदेतद्भागवतमुत्तरं कर्मयोगिनामुपपद्यते नान्येषाम् । शाश्वतीः बह्वीः[7] समाः संवत्सरान् शुचीनामाचारवतां श्रीमतामैश्वर्यवतां गेहे जायते । अधिकारतस्तस्यापेक्षया पक्षान्तरमुच्यते । अथवा योगिनामेव योगाभ्यासरतानां दरिद्राणां कुले वंशे जायते । धीमतामुत्पद्यते । धीमतामेतद्धि दुर्लभतरमीदृशं जन्म ॥४२-४३[8]॥

स तु जातः—

(तत्र तं बुद्धिसंयोगं लभते पूर्वदैहिकम् ।
ततो भूयोपि यतति संसिद्धौ कुरुनन्दन ॥ ४४ ॥)

---

१. माप्येति–व । २. फलोदेशेन–व । ३. नु कर्मकृतं मीद्यपि तातः पीतोच्यतेतुत्थापि न्यत्रापि दश्यश्वरोदेशेन कृतत्वात्–व । ४. मित्यविशेषणात्–व । ५. ज्यक्तकुकर्माणः–व । ६. मुक्त्यार्थत्वान्न–व । ७. शाश्वतार्वद्वौः–व । ८. धीमताद्धिदुर्लभतरंमीदर्शजन्म ४–व । धीमताद्धि दुर्लभतरमीदंशं जन्म ४०–ल ॥

तत्रेति । तत्र तं बुद्धिसंयोगमात्मविषयया[1] बुद्धचा संयोगं लभते । पूर्वदैहिकं[2] पूर्वजन्मनि भवम् । ततो यतति भूयोपि ततोधिकतरं यतते । संसिद्धौ विमुक्तिनिमित्तम् । हे कुरुनन्दन ॥ ४४ ॥

कथं पुनरसौ कर्म पूर्वदैहिकं[3] बुद्धिसंयोगं लभते तदाह[4]—

(पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सन् ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४५ ॥)

पूर्वाभ्यासेति । पूर्वजन्मसंचितः संस्कारस्तेन ह्रियते प्राप्यते बुद्धिपूर्वसंयोगं प्रत्यवशोपि[5] सन् । किञ्च । जिज्ञासुरपि योगस्य ज्ञातुमिच्छुरपि शब्दब्रह्म वेदोक्तं केवलं कर्मातिवर्तते[6] । योगजिज्ञासापि केवलात् कर्मणो गुरुतरेत्यभिप्रायः ॥ ४५ ॥

किञ्च[7]—

(प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥ ४६ ॥)

प्रयत्नादिति । प्रयत्नाद्यतमानस्तु योगी प्रकृष्टेन योगेन यत्नेन[8] योगार्थं यतमानो[9] योगी संशुद्धकिल्बिषः[10] योगेन (या)-तीति स्मरन्ति योगशास्त्रविदः । किं पुनः क्षुद्रपापानि । नह्येकस्मिन्नेव[11] जन्मनि योगी मुच्यते । अनेकजन्मजनितयो(गेन संसिद्धो भवति) । ततो याति परां गतिम् ॥ ४६[12] ॥

---

१. ०विषया–ल । २.···देहिकं–व । ३. देहिकं–ल । ४. तदाहा ॥४१॥–व । ५. प्रज्यवशोपि–व । ६. कर्मातिवर्तवर्तते–व । ७. किं च–४२ व । ल ॥ ८. यतमानस्तुयत्नेन–व । ९. यतस्मानो–व । १०.···किल्वषः–व । ११. नह्येकास्मिन्नेव–व । १२. ···जानित । नतो यानि परां गतिम् ४३–व । ···४३ ल ।

योगमाहात्म्यं दर्शयन्नध्यायमुपसंहरति[1] —

(तपस्विभ्योधिको योगी ज्ञानिभ्योप्यधिको मतः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥४७॥)

तपेति । कृच्छ्रचान्द्रायणोपवासपरेभ्यः[2] केवलकर्मिणोपि कर्मग्रहणेन[3] तद्विषयस्य ज्ञानस्याक्षिप्तत्वात्[4] पूर्वत्रात्मज्ञानं विवक्षितम् । तस्माद्योगी भवार्जुन । गृहस्थस्यार्जुनस्य योगोपदेशात् सन्न्यासिनामेव षष्ठे योगोपदेशः कृत इति यैर्व्याख्यायते तेषामुपसंहारविरोधः[5] ॥ ४७ ॥

(योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ ४८ ॥)

योगिनामिति । आदित्यं रुद्रमन्यां[6] वा देवतां ये युञ्जते तेषां[7] योगिनामपि सर्वेषां मद्गतेनान्तरात्मना[8] मां गतेन मदासक्तचेतसा श्रद्धावानास्तिक्यबुद्धिर्भजते[9] यो मां स मे युक्ततमो मत इति ॥ ४८[10] ॥

(इति श्री)भगवद्भास्करकृते गीताभाष्ये
षष्ठोध्यायः ॥ ६ ॥

---

१. माहात्म्यदर्शयत्रध्याय०–व । २. कृछ्राचांद्रायणोपवासरेभ्यः–व ।
३. केवलकर्मिणो कर्म०···ल । ४. जानेस्याक्षिप्तत्वात्०–ब । ५. ४४ व । ल ॥
६. अन्यं–व । अन्यं देवतां–ल । ७. तेषो–व । ८. मद्दतेनांतरात्मना–व ।
९. समदासक्तचेतसा श्रद्धवातास्तिवा बुद्धिर्मजत्ये–व । १०. ४४ व । ल ॥

अथ सप्तमोऽध्यायः[1] ।

षष्ठेऽध्याये समाधिरुक्तः । यत्र समाधीयते[2] चित्तं तदीश्वराख्यं ब्रह्म सविस्तरं वक्तव्यमित्यध्याय आरभ्यते । नह्यज्ञातस्वरूपस्योपासनं[3] शक्यं कर्तुमिति ।

भगवानुवाच[4]—

(मय्यासक्तमनाः पार्थ योगं युञ्जन् मदाश्रितः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥)

मयीति । मयि परमेश्वरे[5] स्वाभाविकस्नेहार्द्रचेता[6] योगं युञ्जानः कुर्वाण इत्यर्थः । मामाश्रितो मदाश्रितः अनन्यशरणः । संशयरहितं समग्रं कृत्स्नं मां यथा येन प्रकारेण ज्ञास्यसि प्रतिपत्स्यसे तच्छृणु ॥ १ ॥

विस्तरप्रकारं दर्शयति—

(ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा न पुनरन्यज्ज्ञातव्यमवशिष्यते ॥ २ ॥)

ज्ञानमिति । ज्ञानमीश्वरस्वरूपबोधनम् । तद्विज्ञानसहितं[7] वक्ष्यामि । विशेषज्ञानम्[8]—सोऽहम्—इत्यादि । इदमिति पूर्वोक्तं परामृश्यते । वक्ष्यामि । कार्त्स्न्येन[9] । यज्ज्ञानं[10] ज्ञात्वा नेह लोके ज्ञातव्यं पुनरवशिष्यते ॥ २ ॥

---

१. श्रीजारायणाय नमः-व । ल-कोषे नायमंशः । २. समाधीयतो-व । ३. नह्यज्ञानतस्वरूपस्योपसानं-ल । ४. ममवानुवाच-व । ५. प्रयिप्ररेमेश्वरे-व । ६. स्वाभाविकास्नेहार्द्रचेता…ल । स्नेहांद्रवेतायोगुंयुजानः-व ॥ ७. वितानसहितं-व । ८. …ज्ञाने-व । ९. कात्स्येन-व । १०. यज्ञानं-व ।

दुर्लभं च मत्स्वरूपज्ञानम्। कथम्—

(मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३ ॥)

मनुष्येति। मनुष्याणां सहस्रेषु मध्ये कश्चिद्यतति सिद्धये यत्नं[1] करोति। यततामपि तेषां सिद्धानां[2] सिद्ध्यर्थं[3] प्रवृत्तानामित्यर्थः। कश्चिन्मां वेत्ति तत्त्वतः[4] याथातथ्येन ॥ ३ ॥

श्रोतारमभिमुखीकृत्येदानीं[5] सविस्तरमात्मानं कथयति—

(भूमिरापोनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥)

भूमिरिति। भूमिरापोनलो वायुः खमिति पञ्चापि भूतमात्रा निर्दिश्यन्ते[6] स्थूलशरीरारम्भिण्यः। मनो बुद्धिरित्यन्तःकरणं निर्दिश्यते। मनोग्रहणेन बाह्यमपि करणं गृह्यते बुद्धीन्द्रियकर्मेन्द्रियलक्षणम्[7]। अहङ्कार इत्यनात्मन्यात्माभिमान आत्मनि चानात्माभिमानः। स[8] उभयविधो विपरीतप्रत्ययः संसारहेतुर्यमविद्येत्याचक्षते। मे मदीयाष्टधा भिन्ना प्रकृतिः स्थावरजङ्गमलक्षणस्य भूतजातस्य ॥ ४ ॥

इमामचेतनां प्रकृतिं पृथक्कृत्य चेतनां निर्देष्टुमाह[9]—

(अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५ ॥)

अपरेति[10]। अपरेयमष्टधा[11] भिन्ना प्रकृतिरपरा भोग्यरूपा[12]

---

१. यत्वं–व। २. सिद्गानां। ३ सिद्धार्थं–व। ४. तत्वतः–व। ५. श्रीत्तारमभिमुखीकृत्य–व। ६. वायुरिति–ल। व॥ निर्दिश्यते–व। ७. बुद्धिद्रिय-कर्मेदिय लक्षणं–व। ८. स इति व–कोषे नास्ति। ९ इमामचेतना प्रकृति पृथ-कृत्य चेतनां निर्दष्टुमाह–व। १०. अपरोति–व। ११. अपरेयामष्टधा–व। १२. भोपरूपा–व।

परतन्त्रा । अपरां प्रधानभूतां[1] प्रकृतिमितोन्यां मत्सम्बन्धिनीं विद्धि । जीवभूतां जीवत्वं प्राप्तां[2] [3]भोक्तृरूपेणावस्थिताम् । यया प्रकृत्येदं[4] धार्यते जगदन्तरनुप्रविष्टम्[5] । (तथा च) श्रुतिः— अनेन जीवेनात्मनानुप्रविश्य[6] नामरूपे व्याकरवाणि—इति ॥५॥

द्वाभ्यां प्रकृतिभ्यां भूतानि जायन्त इत्याह[7]—

(एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥)

एतदिति । एते द्वे[8] प्रकृती योनी येषां भूतानां तान्येतद्योनीनि । तत्र याचेतना प्रकृतिः सा कार्यकारणरूपेण परिणमते । या तु चेतना सा स्वकर्मोपार्जितफलभोक्तृरूपेणावतिष्ठते[9] । तान्येतानि जीवाविष्टानि भूतानि[10] सर्वाणीत्युपधारय । ते च मत्सम्बन्धिन्यौ[11] । कथमचेतना मत्तो जाताश्चेतनाः पुनर्मदसम्भूताः । यत एवमतोहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । प्रभवन्त्यस्मादिति[12] प्रभवः । [13]प्रलीयन्तेस्मिन्निति प्रलयः । कथं पुनर्गम्यते समस्तस्य जगतो मूलकारणं ब्रह्म इति । श्रुतेः— सदेव सौम्येदमग्र आसीत्—इति ।—तदैक्षत—स आत्मा— इति । सदात्मशब्दाभ्यां परामर्शाच्चेतनं[14] कारणं निश्चीयते । नह्यनुमानेन[15] केवलेनात्यन्तातीन्द्रियं जगत्कारणं कश्चित्समर्थयितुं शक्तः । असिद्धानैकान्तिकविरुद्धदोषदुष्टत्वात्[16] ।

---

१. ०भूतांकृति···-व । २. जीवत्वप्रप्तां-व । ३. भोक्तुरूपे०-व । ४. प्रकृत्या इदं-व । ५. ···प्रविष्ट ॥ व । ल । ६. श्रुतिर्जविनात्मना०-व । ७. इत्याह ॥ ५ ॥ ल । व ॥ ८. एत द्वे-व । ९. ०भोक्तूरूपेणावतिष्ठते-व । १०. मूतानि-व । ११. सत्संबंधिन्यौ-व । १२. प्रभवन्त्यस्मादिति-व । १३. प्रालीयते-व । १४. स आत्मेंकृत्यात्मशब्दाभ्यां परामशेश्चेतनं-व । १५. मह्यनुमानेन-व । १६. कश्चित्समर्थ···दुष्टत्वात् अंशोयं नास्ति-व कोषे ।

तत्र सांख्याः प्रधानं जगत्कारणं वर्णयन्ति । नैयायिकवैशेषिकाः परमाणून् । तत्र वादिनः परस्परविरुद्धं जल्पन्तो नाद्याप्यन्तं गताः[१] । श्रुतिविरोधाच्चानुमानमाभासीभवति ।

यत्पुनरनुमानं श्रुत्यनुसारि तदनुग्राहकत्वेनोपन्यस्यते तदाश्रीयते । येन सर्वज्ञः सर्वशक्तिश्चेतनो जगत्कर्ता साध्यते । तार्किकानुमानेन[२] तु यस्य यत्र कर्तृत्वं तत्परिज्ञानवतस्तच्छक्तियुक्तस्य[३] कर्तृत्वोपपत्तेः । रथप्रासादादिकर्तृवदिति[४] । अनेन[५] चासर्वज्ञस्यासर्वशक्तेरनीश्वरस्य[६] सिद्धेः प्रकृतवस्त्वसिद्धेरनाश्रयणमिति ॥ ६ ॥

यत एवम्[७] —

(मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥)

मत्त इति । मत्तः परतरं नान्यदहमेव सर्वस्माज्जगतः परतरो मूलकारणत्वात् । कथं पुनरस्य कारणत्वम् । शक्तिपरिणामात् । तथा च श्रुतिः[८]—तदात्मानं स्वयमकुरुत— यथोर्णनाभिः[९] सृजते गृह्णते[१०] च । [११]अप्रच्युतस्वरूपस्याप्यचिन्त्यशक्तित्वात् परिणामो भवतीति । यथाकाशो[१२] वायुरूपेण परिणमते न स्वरूपविनाशो वायोश्च पञ्चवृत्तिरूपेणाध्यात्मम्[१३] ।

---

१. जगत्कारण वर्णयंति । नैय्यायिकवैषिकाः परमांणूस्तत्रवादिनं कश्चित् समार्थयितु शक्तो सिद्धानैकांतिकविरुद्रदोषदुष्टत्वात्तत्र सांख्यः प्रधानं जगत्कारणं परस्परविरुद्धं जल्पंतोनाद्याप्यंतं गताः–व । २. चतनो···तार्किकानुमनिन–व । ३. ···स्तछक्तिस्य–व । ४. ···प्रसाद०–व । ५. ···वदिज्यनेन–व । ६. ···सर्वशक्तोरनीश्वर०–व । ७. यत एव–ल । ८. ···परिणाम तथा च श्रति–व । ९. यथोर्णनाभः–ल । यथोलनाभः–व । १०. गृह्णते–व । ११. चाप्रत्युतस्वरूप०–व । १२. षथाकाशो–व । १३. ···विनोशो वायोश्च पश्चवृत्तिरूपेणाध्यात्म०–व ।

यथा च तन्तुभ्यः[1] पटो जायते, तन्तुस्वरूपप्रच्युतिः[2]। विचित्रशक्तयो हि भावाः। तथा चोक्तं पुराणे—

अचिन्त्याः खलु ये भावा न तांस्तर्केण साधयेत्।
प्रकृतिभ्यः[3] परं यत्तु तदचिन्त्यस्य[4] लक्षणम्॥ इति।

तथा च मन्त्रः—

न तस्य कार्यं करणञ्च विद्यते
[5]न तत्समश्चाभ्यधिकश्च विद्यते।
परास्य शक्तिर्विविधैव[6] श्रूयते
स्वाभाविकी[7] ज्ञानबलक्रिया च॥ इति।

मयि कारणे सर्वमिदं कार्यं प्रोतं ग्रथितमनुस्यूतमित्यर्थः। यथा [8]कार्पाससूत्रे मणिगणा यथा च मृदि शरावादय इति॥७॥

ममैताः शक्तयो या अबादिषु रसादिरूपा जगतः संस्थितिहेतवस्ता दर्शयति[9]—

(रसोहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु॥ ८॥)

रस इति[10]। रसः सारो येन शरीरपुष्टिर्भवति[11]। इह प्रकरणे [12]जगत्स्थितिहेतूनां संकीर्तनम्। विभूतिप्रकरणे तु कारणमकारणं वा यदुत्कृष्टं[13] सत्त्वं तदुपदिश्यते। चिन्तनीयं यदुत्कृष्टं सत्त्वं तदुपदिश्यते[14]। चिन्तनीयत्वेनेत्यपुनरुक्तता[15]। मे

---

१. ततुभ्यः—व। २. जायते तु स्वरूपप्रत्युति—व। ३ अचित्या ··साधयेर्थप्रकृतिमभ्यः—व। ४. परं यत्तदचिंत्यस्य-व। ५. न मत्समश्च—व। ६. विविधं व—व। ७. स्वाभाविकौ—व। ८. कर्पास०-व। ल०। ९. हेतवंस्थादर्शयति-व। १०. रम इति—व। ११. रस सारं येन शरीरयुष्टिर्भवति—व। १२. तगत्स्थिति०—व। १३. युदुत्कृष्ट-व। १४. तदुपदिश्यर्ते—व। १५. ···त्वेनेत्युपुनदुक्तता—व।

रसरूपप्रोता आप इति केचिद्योजयन्ति। तदसत्। यथाश्रुतान्वयभङ्गप्रसङ्गात्। स्थितिनिमित्तानां च धर्माणामिह वक्तुमिष्टत्वात्। प्रभास्मि। प्रकाशः शक्तिः। प्रणव ओङ्कारः। सोपि [1]ध्यानजपादावुपयोगादुत्कर्षहेतुः। शब्दोस्म्याकाशे[2]। शब्देन हि[3] सर्वलोकव्यवहारः प्रवर्तते। पुरुषस्येदं पौरुषं पुंस्त्वं प्रजननकारणम्[4] ॥ ८ ॥

(पुण्यः पृथिव्यां गन्धोस्मि तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥)

पुण्य इति। सुरभिर्गन्धः[5]। पुण्यहेतुत्वात्[6] पुण्य इत्युच्यते। पूतिगन्धस्तु पापहेतुः। तेजश्चास्मि विभावसौ। हिरण्यरेतसि[7] जीवनं प्राणधारणम्। तपश्चास्मि तपस्विषु वैखानसादिषु ॥९॥

किञ्च—

(बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥१०॥)

बीजमिति। बीजं मूलकारणं मां विद्धि जानीहि। सनातनं नित्यम्। बुद्धिरस्मि बुद्धिमतां[8] बृहस्पतिभार्गवादीनाम्[9]। तेजः प्रभावोस्मि तेजस्विनां[10] राज्ञाम् ॥ १० ॥

(बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोस्मि भरतर्षभ ॥ ११ ॥)

बलमिति। बलं बलवतां[11] चाहम्। तद्विशिनष्टि—कामरागविवर्जितम्। कामेन रागेण च रहितम्। तत्समुत्थं[12] तु यद् बलं

---

१. ध्याननयादावुप०–व। २. शब्दौस्स्याकाशे–व। ३. शब्दे सर्वनहि–व। ४. प्रजनकारणं–व, ल। ५. गधः–व। ६. पुराषहेतुत्वात्–व। ७. हिरण्यरेतासि। ८. बुद्धिवतां–व। ल॥ ९. …तिर्भार्गवादीनां–व। १०. तेजास्विनां–व। ११. वलवता–व। १२. तत्समुत्पं–व।

प्रत्यवायनिमित्तम्। स्वाभाविकं तु यद् बलं तदुत्कर्षकारणम्। यथा वैनतेयादीनाम्। धर्मेणाविरुद्धः[1] कामो भूतेषु सोऽहमस्मि यथा स्वदारेषु ॥ ११ ॥

किञ्च—

(ये चैव सात्त्विका भावास्तामसा राजसाश्च ये ।
मत्त एवेति तान् विद्धि न त्वहं तेषु ते मयि ॥१२॥)

ये चैव सात्त्विका भावा इति। सत्त्वनिवृत्ताः। सात्त्विका देवादयो राजसा असुरा मनुष्याश्च[2] तामसाः सर्पादयो[3] मत्त एव इति तान् विद्धि। न त्वहं तेषु। नाहं जनाश्रितः। ते तु पुनर्मयि वर्तन्ते[4]। मदधीनवृत्तय इत्यर्थः ॥ १२ ॥

अथेदानीं[5] गुणानां स्वभावः कश्चित् कथ्यते—

(त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥)

त्रिभिरिति। त्रिभिर्गुणमयैर्भावैः[6] कृत्स्नमिदं जगन्मोहितम्। नाभिजानाति मामेभ्यो गुणेभ्यः परमव्ययं व्ययरहितम् ॥१३॥

त्रिभिरेतैर्गुणैर्मोहितस्य संसारकान्तारोत्तारो नास्तीत्याह—

(दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ १४ ॥)

दैवीति। देवस्येयं दैवी[7]। हिशब्दो हेतौ। यस्य देवस्य मम माया निर्मीयते न (मायाविकाः)[8][9]। न जातमिति प्रकृति-

१. तदुत्कर्षकानष्टिकामरागाविरणंयथावैननेयादीनां धर्मेणाविरुद्धय–ल ॥ व, धर्मेण विरुद्धा–ल ॥ २. मानुषाश्च–व । ३. तामसाः यदियो–व । ४. वर्तते–व । ५. अथेदानं–व । ६. गुणमयेर्भावैः–व । ७. देवी–व । ८. निमीयते–व । ९. न याविका–ल ।

रीश्वरादुत्पन्ना मायोच्यते । श्रुतिश्च निर्वक्ति[1]—मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्—इति । न सांख्यानामिव नित्या । यत्र मायाशब्दः प्रज्ञावचनः प्रयुज्यते तत्रेयं व्युत्पत्तिः । मीयते परिच्छिद्यते[2] प्रमेयोर्थ इति प्रज्ञा माया । यथा—इन्द्रो मायाभिः[3] पुरुरूप ईयते[4]—अतीन्द्रियप्रज्ञाभिरित्यर्थः । दुरत्यया दुःखेनात्ययोतिक्रमोस्या इति दुरत्यया । यद्येवं शास्त्रोपदेशानर्थक्यम् । नेति ब्रूमः । मामेव ये प्रपद्यन्ते ते मायां तरन्तीति न दोषः ॥ १४ ॥

ननु ये प्रपद्यन्त[5] इति विशेषणमनर्थकम् । नेत्युच्यते । अर्थवदेव (तत् ।) कथम्—

(न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५ ॥)

न मामिति[6] । माययानन्तरोक्तया प्रकृत्यापहृतज्ञाना आसुरं भावं शाठ्यानृतादिलक्षणमाश्रिताः ॥ १५ ॥

के पुनस्ते ये त्वां प्रपद्यन्ते[7]—

(चतुर्विधा भजन्ते मां जनाः सुकृतिनोर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६ ॥)

चतुर्विधा इति । चतुर्विधाश्चतुष्प्रकाराधिकारिणो[8] मां भजन्ते । आर्तो व्यसनापन्नः । जिज्ञासुः परमेश्वरसम्बोधने यतमानः । अर्थार्थी द्रव्याकाङ्क्षी । ज्ञानी ब्रह्मवित् ॥ १६ ॥

---

१. निर्वभक्ति–व । २. मेयते परिछिद्यते–व । ३. इन्द्रमाभिः–ल । ४. पुरुषरूपदेयते–व । ५. प्रद्यं त इति–व । ६. न स्ममिति–व । ७. प्रतिपर्यंते–व । प्रतिद्यन्ते–ल ॥ ८. अत्र व-कोषस्य समाप्तिः ।

किञ्च सर्वे तुल्याः। किञ्चैषां कश्चिदधिक इति पृच्छायां प्राधायामाह—

(तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः ॥ १७ ॥)

(तेषामिति।) तेषां ज्ञानी नित्ययुक्तः। निर्धारणे षष्ठी। नित्ययुक्तः सतताभ्यासी। मय्येकस्मिन् भक्तिर्यस्यासावेकभक्तिः[1]। स विशिष्यते। प्रियो हि ज्ञानिनोत्यर्थम्। विश्वस्य जगतोन्तरात्मा परमात्मा। ममापि चायमेवात्मेति मन्यमानो नैसर्गिकस्नेहप्रतिबद्धबुद्धिरतितरां भूयो भूयोनुरज्यते। स च मम प्रिय इति ॥ १७ ॥

यद्यपि रागद्वेषावीश्वरस्य न स्तः। तथापि शास्त्रार्थयाथात्म्यवेदित्वादैकात्म्यप्राप्तेः प्रिय इत्युच्यते। इतरेभ्य आर्तादयः[2] परमेश्वरमाश्रयन्तोन्येभ्यो महाकालभक्तेभ्यः प्रकृष्टतरा इति दर्शयितुमाह—

(**उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतः ।**
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥१८॥)

उदारा इति। उदाराः सर्व एवैते उत्कृष्टाः। ज्ञानी तु निरुपचारमात्मैव मे मतः। कथम्। आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्। न विद्यतेन्योत्तमा यस्या गतेस्तामनुत्तमाम् ॥ १८ ॥

किमेकस्मिन्नेव जन्मनि ज्ञानीत्थं[3] त्वा त्वां भजते[4]

---

१. ०भक्तिर्यस्यासावेकभक्तिर्यस्यासावेकभक्तिः। २. इहेरेभ्य आर्तादयोः।
३. ज्ञानीत्य। ४. भजन्ते।

किं वानेकस्मिन्निति । यद्येकस्मिन्नेव तदार्तादीनामपि ज्ञानित्व-प्रसङ्गः । तत्र तारतम्यं नोपपद्यत इति परमतमाशङ्क्याह—

(**बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।**
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥ १९ ॥)

बहूनामिति । यत एते आर्तादयः तेषामपि भगवति जन्मान्तरवासनास्ति । यतो नारायणमेव ते भजन्ते नान्यां देवताम् । ज्ञानी पुनरेकभक्तिः प्रयोजनान्तरनिरपेक्ष सन्न्यासकर्मयोगाभ्यां सम्पन्नो बहूनां जन्मनामन्ते मां प्रपद्यते । कथं प्रपद्यते । वासुदेवः सर्वमिति । वसन्ति तस्मिन् सर्वभूतानि । वसति वान्तर्यामि(त्वे)न सर्वभूतेष्विति वासुः । देवनाद् द्योतनाद्देवः । वासुश्चासौ देवश्चेति वासुदेवः परमात्मा । आत्मैवेदं सर्वम्—सदेव सौम्येदमग्र आसीत्—इदं सर्वं यदयमात्मा—इति श्रुतेः । कारणात्मना प्रपञ्चात्मना चावस्थित इति प्रतिपद्यते । स महात्मा सुदुर्लभः । सन्ति हि द्वैतदर्शिनोपि भक्ताः ॥ १९ ॥

कस्मात् पुनश्चतुर्विधा एव[1] भजन्ते न सर्वे—

(**कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेन्यदेवताः ।**
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ २० ॥)

कामैरिति । कामैस्तैः पुत्रपश्वादिभिर्हृतज्ञानाः । रुद्रादित्यदुर्गागणपतिप्रभृतयो (या) अन्या देवताः (ताः) ये भजन्ते (तं) तमुपवासादिनियममाश्रित्य प्रकृत्या पूर्वजन्मवासनया स्वया नियताः । देवतान्तरभक्तानां च तद्वासितचेतसां च ततो निवृत्तिर्नास्ति ॥ २० ॥

---

१. एवं ।

कथम्[1]—

(यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥२१॥)

य इति । यो यो यां यां तनुं भक्तः । [2]तनुं देवतामूर्तिमित्यर्थः । तस्य तस्याचलां दृढां श्रद्धां तामेव विदधाम्यहम् । तत्कर्मानुसारेण । कर्मैव फलोत्पत्तौ निमित्तम् । ईश्वरस्तु कर्मानुविधायी नियन्तृत्वेनावतिष्ठते ॥ २१ ॥

(स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हि तान् ॥२२॥)

स इति । स तया श्रद्धया युक्तस्तस्य देवताविशेषस्याराधनं पूजनमीहते चेष्टते निर्वर्तयति ततो लभते च कामानभिप्रेतार्थान् मयैव विहितांस्तान् । हिशब्दो हेतौ । यस्मादीश्वरः सर्वत्र फलदाता कर्मानुरूपेण । तथा (च) श्रुतिः—एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एषां लोकानामसम्भेदाय— इति । रहसि कृतानां प्रकाशकृतानां च कर्मणां फलपरिपाकविभागज्ञो हि सः ॥ २२ ॥

देवतान्तरोपासनात् फलं चेल्लभेत तदप्यस्तु । को दोष इति चेदाह—

(अन्तवत्तु फलं तेषां तद् भवत्यल्पमेधसाम् ।
देवान् देवयजो यान्ति मद्भक्ताः शाश्वतं पदम् ॥ २३ ॥)

अन्तेति । देवान् देवयजो यान्ति प्राप्नुवन्ति । मद्भक्ताः शाश्वतं पदम् ॥ २३ ॥

---

१. कथम् २० । २. तनुदेवता ।

किं पुनः कारणम्। केचिद्देवतान्तरं भजन्ते न त्वामिति तदुच्यते—

(अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ २४ ॥)

अव्यक्तमिति । स्वभावतोऽव्यक्तमतिसूक्ष्मं सन्तं व्यक्तिं प्रकटभावमापन्नं मन्यन्ते मामबुद्धयोऽल्पबुद्धयः । अयमपि नारायणाख्यो विष्णुर्महादेवादिवद्देवताविशेष एव नात्राधिक्यं किञ्चिदस्तीति । परं भावमजानन्तः समस्तस्य जगतो मूलकारणमीश्वराणां ब्रह्मरुद्रेन्द्रादीनामप्यधीश्वरोऽयमित्यजानन्तो न मां भजन्ते ॥ २४ ॥

कस्यचिदेवाहमनेकस्मिन् जन्मनि भक्तिमुद्वहतः स्वरूपं विवृणोमि न सर्वस्य—

(नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥)

नाहमिति । नाहं प्रकाशः सर्वस्य । कथम् । योगमायया संछन्नः ऐश्वर्ययोगः स एव । मायासंवरणहेतुत्वात् । तस्मान्मूढोऽयं नाभिजानाति मामजमव्ययम् ॥ २५ ॥

अहं तु सर्वज्ञः कथम्—

(वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्यन्ति च भूतानि मां तु वेद न कश्चन ॥ २६ ॥)

वेदेति । वेदाहं त्रिकालविषयाणि भूतानि जानामि । मां तु वेद न कश्चन । अयं मूढो लोक इति । यः पुनर्ज्ञानी स जानाति वासुदेवः सर्वमिति ॥ २६ ॥

केनायं लोको मूढत्वमापन्नस्तदुच्यते—

(इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत।
सर्वभूतानि सम्मोहं यान्ति सर्गे परंतप ॥ २७ ॥)

इच्छेति। इच्छा रागः। रागद्वेषसमुत्थेन द्वन्द्वमोहेन। (द्वन्द्वानि) शीतोष्णसुखदुःखादीनि तत्सम्बन्धी मोहो द्वन्द्वमोहः। उपकारिषु परार्थेषु रागात् सुखं तत्सम्बन्धी मोहस्तन्निबन्धना च प्रवृत्तिरपकारिषु द्वेषो दुःखं तन्निबन्धना च निवृत्तिरिति। एवं प्रवृत्तिनिबद्धानि भूतानि सर्गे शरीरग्रहणेषु सम्मोहं यान्ति। यदि पुनर्द्वन्द्वशब्देन रागद्वेषयोः परामर्शः क्रियते तदा[1] द्वन्द्वग्रहणमनर्थकमिच्छाद्वेषसमुत्थेन मोहेनेत्येतावद्वक्तव्यं स्यात् ॥ २७[2] ॥

तत्र तु—

(येषां त्वन्तं गतं पापं जनानां पुण्यकर्मणाम्।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥ २८ ॥)

येषामिति। येषां त्वन्तं गतं पापं क्षीणं पापं[3] पुण्यकर्मोपचयात् ते रागद्वेषसमुत्थद्वन्द्वमोहविनिर्मुक्ता भजन्ते मां दृढव्रताः ॥ २८ ॥

एवम्—

(जरामरणमोक्षाय मामाश्रित्य यतन्ति ये।
ते ब्रह्म तद्विदुः कृच्छ्रमध्यात्मं कर्म चाखिलम् ॥ २९ ॥)

(जरेति)। ये जरामरणमोक्षाय मामाश्रित्य यतन्ति प्रयतन्ते ते ब्रह्म तद्विदुः। कृच्छ्रमध्यात्मं कर्म चाखिलम्। वस्तुत्रयमेतदर्जुनप्रश्नादनन्तरमुत्तरं वक्ष्यामः ॥ २९ ॥

---

१. यदा। २. स्यात्तत्र तु ॥ २७ ॥ ३. क्षीणपापं।

अपरमपि वस्तुचतुष्टयम्—

(साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेपि च मां ते विदुर्युक्तचेतसः ॥ ३० ॥)

साधिभूतेति ॥ ३० ॥

(इति श्रीमद्)भगवद्भास्करकृते गीताभाष्ये
सप्तमोध्यायः ॥

अथाष्टमोऽध्यायः ।

ते ब्रह्म तद्विदुः—इति ये भगवतोपक्षिप्ताः पदार्थास्तां-स्तत्त्वतो ज्ञातुमर्जुनः पृच्छति ।

अर्जुनः (उवाच)—

(किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥
अधियज्ञः कथं कोऽत्र देहेऽस्मिन् मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ २ ॥)

किं तदिति । क इति स्वरूपप्रश्नतात्पर्यम् ।

कथमिति प्रकारप्रश्नः । केन प्रकारेणासौ देहेऽस्मिन् भवतीति । प्रयाणकाले मरणकाले केन प्रकारेण ज्ञेयोऽसि नियतचित्तैः ॥ १–२ ॥

भगवान् (उवाच)—

(अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥ ३ ॥)

अक्षरमिति । न क्षरतीत्यक्षरं परमं ब्रह्म । एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति—इति श्रुतेः । स्वभावोऽध्यात्म-मुच्यते । अक्षरशब्दवाच्यस्य परमात्मन आत्मीयो भावोंऽशो जीवोऽध्यात्ममात्मानं देहमधिकृत्य भोक्तृत्वेन वर्तत इति । भूतानां जीवानां भावो भावना कर्म । तस्य प्रलयकाले स्तिमित-स्यावस्थितस्योद्भवो व्यक्तिः फलदानयोग्यतापादनम् ।

तं करोतीति भूतभावोद्भवकरो विसर्गो विसृष्टिर्हिरण्यगर्भादिः । तथा च मन्त्रः—हिरण्यगर्भं जनयामास पूर्वं मनो बुद्ध्या शुभया संयुनक्तु—इति । सोयमीश्वरस्यान्तर्यामिणो व्यापारः कर्मसंज्ञितः ।

अपरेषां व्याख्या—यजमानस्य व्यापारश्चरुपुरोडाशादीनां देवतोद्देशेन त्यागो विसर्गः । स एव बुद्धिद्वारेण भूतान्येव भावास्तेषामुद्भवं करोतीति भूतभावोद्भवकरः कर्मसंज्ञित इति ॥३॥

(**अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।**
अधियज्ञोहमेवात्र देहे देहभृतांवर ॥ ४ ॥)

अधीति । अधिभूतं क्षरो भावः । क्षरति विनश्यतीति शरीरे विषयलक्षणः । चेतनो[1] भोग्यवर्गो जायमानोनिरुद्ध्यमानः पुरुषश्चाधिदैवतम् । योसावादित्यमण्डले हिरण्यगर्भः सर्वदेवतामयः । कृत्स्नं वैराजं शरीरमापूर्यावस्थितः पुरुषः अधियज्ञोहमेव । अत्र यज्ञानामधिदेवताहमेव । यज्ञो वै विष्णुः—इति शतपथश्रुतेः । देहोधिकरणत्वेन व्यपदिश्यते—न मम इदं देवताया इति मानसस्त्यागो याग उच्यते । ये च द्रव्ययज्ञा ज्ञानयज्ञाः स्वाध्याययज्ञास्तेषामहमेवाधिदेवतेत्यभिप्रायः ।

अन्येषां व्याख्या—देहेस्मिन् वैश्वानरविध्यङ्गभूताहुतिसाधन[2]-भूत इति । विशिष्टाहुतिसाधनोपलक्षणार्थं देहशब्दो यज्ञशब्दश्च विशिष्टयज्ञलक्षणपर इति । तदयुक्तम् । यतो यज्ञविशेषव्याख्यानाद्यज्ञसामान्यव्याख्यानं युक्ततरम् । विसर्गशब्देन सर्गव्याख्यानं युक्तम् ॥ ४ ॥

---

१. ०लक्षणो चेतनो० । २. ०विध्यङ्गाभूताहुति० ।

(अन्तकाले च मामेव स्मरन् त्यक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ५ ॥)

अन्तेति । वयसोन्ते त्यक्त्वा कलेवरं शरीरं यः प्रयाति स मद्भावं याति । न विद्यतेस्मिन्नर्थे संशयः ॥ ५ ॥

न केवलं मामेव स्मरन् मां प्रतिपद्यते । किं तर्हि—

(यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥ ६ ॥)

यमिति । यं यं भावं देवताविशेषमन्यद्वा वस्तु स्मरन्नन्ते देहं त्यजति[1] तं तमेवैति कौन्तेय सदा तद्भावनया भावितो वासितान्तःकरणः ॥ ६ ॥

यत एवम्—

(तस्मात् सर्वेषु कालेषु मामनुस्मर युद्धय च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम् ॥ ७ ॥)

तस्मादिति । तस्मात् सर्वेषु कालेषु मदनुस्मरणं कुरु । युद्धं च स्वधर्मं कुर्वित्यर्थः । मयि समर्पितं मनो बुद्धिश्च यस्य ते स त्वं मय्यर्पितमनोबुद्धिः । मनोवृत्तिविशेषो वृत्तिमती बुद्धिः । एकमेवान्तःकरणं परमार्थतः। व्यवहारसिद्धयर्थस्तु भेदव्यपदेशः । मामेवैष्यस्यसंशयम् । नास्मिन्नर्थे संशयोस्ति । न चैतदाशङ्कितव्यम्—

अन्तकालेन्यथापि स्मृतिर्भवतीति । ईश्वरो हि सर्वज्ञः कर्मानुसारी चित्तवृत्तेर्नियन्ता ॥ ७ ॥

---

१. त्यजन्ति ।

अनन्तरोक्तमर्थं विशिष्य[1] दर्शयितुमाह—

(अभ्यासयोगयुक्तेन चेतसानन्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ ८ ॥)

अभ्यासेति । अभ्यासः समानप्रत्ययप्रबन्धो विजातीयप्रत्ययावृत्तिकीलः सोयमभ्यासयोगः । तद्युक्तेन चेतसानन्यवृत्तिना परमं पुरुषं दिव्यं याति प्रतिपद्यते चेतसा तमेवानुचिन्तयन् ॥८॥

तमेव परमं पुरुषं पुनरपि विशिनष्टि—

(कविं पुराणमनुशासितार-
मणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूप-
मादित्यवर्णं तमसः परस्तात् ॥ ९ ॥)

कविमिति । कविं सर्वज्ञमनुशासितारं नियन्तारम् । तथा हि श्रुतिः—एतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ[2] तिष्ठतः—इति । अणोरणीयांसं सूक्ष्मादपि सूक्ष्मतरम् । सूक्ष्मत्वमिहावयवोपचयाभावो विवक्षितः । नभसोपि सकाशादतिसूक्ष्मः । परमकारणत्वात् सर्वकर्मफलस्य धातारं विधातारमचिन्त्यरूपम् । नहीदं तदिति चिन्तनीयम् । अस्य रूपं (न) विद्यते । अस्थूलमनण्वह्रस्वमदीर्घमलोहितम्—इति रूपप्रतिषेधात् । तथाप्युपासकानामनुग्रहार्थं रूपं निर्दिश्यते । आदित्यवर्णं ज्योतिर्मयमानन्दैकस्वभावं तमसो ज्ञानान्धकारात् परस्तादवस्थितमज्ञानतिमिरापनुदं स्वयंप्रकाशमनुस्मरेद्यः स इत्युत्तरगीतायां वाक्यार्थः समाप्यते ॥ ९ ॥

१. विशेष्य । २. विवतौ ।

कस्मिन् पुनः कालेनुस्मरेत्—

(प्रयाणकाले मनसाचलेन
भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्
स तं परं पुरुषमुपैति दिव्यम् ॥ १० ॥)

प्रयाणेति । अन्तकाले निश्चलेन मनसा भक्त्या तदनुस्मरणाह्लादितहृदयेन योगबलेन च योगजनितसंस्कारपातिस्थैर्येण[1] भ्रुवोर्मध्ये प्राणमावेश्य सुषुम्णया[2] नाड्या निष्क्रम्येत्यर्थः[3] ॥१०॥

प्राप्तव्यं पदमनूद्य तत्प्राप्त्युपायं कथयिष्यन्नाह—

(यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेणाभिधास्ये ॥ ११ ॥)

यदिति । एतद्वै तदक्षरं गार्गि—अथ परा, यया तदक्षरमधिगम्यते—इति । विशन्ति प्रतिपद्यन्ते । यतयो यत्नवन्तो यदिच्छन्तो ब्रह्मचर्यं मैथुननिवृत्तिम् (चरन्ति) । गृहस्थस्यापि सर्वत्र वा प्रतिषिद्धवर्जमित्यनुज्ञातगमनानिवृत्तस्यावश्यकऋतुकालगामिनो ब्रह्मचर्यमस्त्येव । तत्ते पदं तत्पदप्राप्त्युपायं संग्रहेण संक्षेपेण कथयिष्यामि ॥ ११ ॥

(सर्वद्वाराणि संयम्य मनो हृदि निरुद्ध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥१२॥)

सर्वेति । सर्वाणीन्द्रियद्वाराणि संयम्य मनो हृदयकमलनिलये परमेश्वरे सन्निरुद्ध्य तालुमूलविनिर्गतया ब्रह्मनाड्या

---

१. ०स्थैर्येण । २. सुवन्यया । ३. निष्क्रमेत्यर्थः ।

सुषुम्णाख्ययोद्ध्र्वमुद्गमय्यात्मनः प्राणं मूर्ध्न्याधायास्थितो योगधारणाम्। योगधारणां गृहीत्वेत्यर्थः ॥ १२ ॥

(ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥१३॥)

ओमिति । शब्दब्रह्मैकाक्षरमिति विशेषणं संहितादिब्रह्मनिवृत्त्यर्थम् । व्याहरन्नुच्चारयन्[1] । मां परमात्मानमाकाशवत्सर्वव्यापिनं सर्वज्ञमानन्दममृतम् । त्यजन् देहं यः प्रयाति स याति परमां गतिम्। अन्तकाले च मामेवैति—(इति यत्) सामान्येनोक्तं तदिदानीं विशेषितम् ।

केचिदत्र क्रममुक्त्यभिप्रायमिदं न सद्यो मुक्तिप्रदर्शनार्थमिति वदन्ति । एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः— इति श्रुतेः । ओङ्कारालम्बनोपासनफलमिदं कथ्यत इति । तदपव्याख्यानम् । परविद्याधिकारात् । यदक्षरं वेदविदो वदन्ति— इति प्रतिज्ञानात् कथं कालान्तरमुक्तिरूपं[2] वर्ण्यते ॥ १३ ॥

न चाहं दुर्लभः सतताभियुक्तस्य—

(अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥)

अनन्येति । यस्यान्यत्र[3] चेतो नास्त्यसावनन्यचेताः । सततं सर्वदा नैरन्तर्येण । नित्यश इति यावज्जीवम् । तेनैतद्दर्शितं वाक्यार्थज्ञानमात्रेण कृतार्थता । सततोपासनया ज्ञानं परिपक्वं मुक्तिक्षमं सम्भवतीति । तस्याहं सुलभः सुखेन लभ्यो नित्ययुक्तस्येति निगमनम् ॥ १४ ॥

---

१. उच्चारयन् । २. कालान्तरं मुक्तिरूपं । ३. कस्यान्यत्र ।

तत्पदप्राप्तावुपाय उक्तः। तत्प्राप्तौ सत्यां कः पुरुषार्थ-विशेष इति—

(मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥१५॥)

मामिति। मां प्राप्य पुनर्जन्म दुःखस्यालयं स्थानं न प्राप्नुवन्ति। स्थानान्तरप्राप्तौ पुनरावृत्तिः। मत्प्राप्तिरेवानावृत्तिहेतुरिति दर्शयति ॥ १५ ॥

(आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते। १६ ॥)

आब्रह्मेति। आ ब्रह्मभुवनाद्। ब्रह्मणो हिरण्यगर्भस्य भुवनं निवासो ब्रह्मलोकस्तेन सह। अभिविधावाकारो ब्रह्मलोकसहिताः सर्वे पुनरावर्तिनो लोकाः। लोकशब्देन तत्स्थानिनस्तन्निवासिनः[1] प्राणिन उच्यन्ते। ननु च—यो ह वै[2] तत्परमं ब्रह्म वेद ब्रह्मैव भवति। तस्य तावदेव चिरं यावन्न विमोक्ष्येथ सम्पत्स्ये[3]—इत्यादिश्रुतिप्रामाण्याद् विदुषः प्रारब्धकर्मक्षये शरीरपातानन्तरं मोक्षावधारणात् कथं ब्रह्मविदां निवृत्तकल्मषाणां पुनरावर्तनम्। तथा यावदधिकारमवस्थितिरधिकारिणाम्[4]—इति शारीरकसूत्रादधिकारे लोकानुग्रहार्थे व्यापारे येवस्थितास्तेषां प्राजापत्यादावधिकारे[5] ईश्वरानुशासनाद् यावदधिकारमवस्थितिर्भवति। तत्र च ज्ञानशेषमभ्यस्यतां प्रारब्धफलकर्मक्षये मुक्तिः। यो यो देवानां प्रत्यबुद्ध्यत स स

१. ०शब्देन तात्स्थात्स्थानिनस्तन्निवासिनः। २. यो हेव। ३. विमोक्ष्येत सम्पत्स इति। ४. ०स्थितिराधिकारिकारिकाणाम। ५. प्राजापत्यादावधिकारेश्वरानुशासनाद्।

तदभवत्[1]——इति ब्रह्मस्वरूपापत्तेः। न ह वै देवान् पापं गच्छति——इति पुनर्जन्मप्रतिषेधाच्च। एतदनुपपन्नम्। अत्रोच्यते। प्रारब्धकर्मफलभोगक्षये सर्वेषां मुक्तिरुक्ता। तच्चारब्धफलं कर्म केषाञ्चिदेकशरीरभोग्यम्। अन्येषामनेकशरीरभोग्यम्। एकजन्मकृतस्यापि कर्मणोनेकशरीरभोग्यतापि स्मर्यते। यथावान्तरतमनाम्नः पुराणर्षेः कलिद्वापरयोः सन्धौ विष्णुशासनाद् व्यासपदप्राप्तिः। एवं मुक्तिफलानियमस्तत्तदवस्थाप्राप्तेरिति[2] शारीरकेपि कर्मफलतारतम्यवशेन मुक्तेरनियमदर्शनादविरोधोत्र। मामुपेत्य हे कौन्तेय पुनर्जन्म शरीरग्रहणं न विद्यते॥ १६॥

कस्य हेतोरितरेषां लोकानामावृत्तिः। कालपरिच्छिन्नत्वात्। परस्य कारणप्राप्तस्य प्रच्युतिर्नास्ति कार्यलोकेषु हि वर्तमानस्य। तेषां विनाशित्वादावृत्तिरवश्यं भाविनी[3] तदेतदाह——

(सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः।
रात्रिं युगसहस्रान्तां तेहोरात्रविदो जनाः॥ १७॥)

सहस्रेति। तथा चोक्तम्——

दैविकानां युगानान्तु सहस्रं परिसंख्यया।
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव[4] च॥ इति।

सहस्रयुगपर्यन्तमहर्ब्रह्मणो जागरितावस्था। चतुर्दशमन्वन्तरावच्छिन्नः कालः। तावती रात्रिरवान्तरप्रलयो ब्रह्मणः स्वप्नावस्था। तदेवमहोरात्रैः संवत्सरकल्पनया वर्षशतमायु-

---

१. स स तदाभवत्। २. ०तदवस्थावप्तेरिति। ३. अवश्यभाविनी।
४. महारात्रिम् इति मनुस्मृतौ पाठः।

ब्रह्मणः। ततो ब्रह्मा मुच्यते। महाप्रलयो भवति। पृथिव्यादीन्यपि भूतानि तदा प्रलीयन्ते ॥ १७ ॥

तत्राहनि रात्रौ च यो व्यापारो भूतानां स कथ्यते—

(अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥)

अव्यक्तेति। अव्यक्तमव्याकृतमुच्यते पञ्चानां भूतानां सूक्ष्मावस्था। कर्माविद्यासहिताश्च जीवाः। अन्तर्यामीश्वरोधिष्ठाता। तदेतदव्याकृतमुच्यते। तथा च श्रुतिः—तद्धेदं तर्ह्यव्याकृतमासीत्[1]—इति। व्यक्तं यच्च[2] चराचराणि भूतानि महाभूतानि च प्रभवन्त्यहरागमे। रात्र्यागमे तु प्रलीयन्ते। तत्र वा व्याकृतेवान्तरप्रलये चराचराणां भूतानां प्रलयो महाप्रलये तु महाभूतानामपीति विशेषः ॥ १८ ॥

कृतकर्मविनाशोकृतकर्मफलस्य चागम[3] इति दोषद्वयं परिहरन्नाह—

(भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते।
रात्र्यागमेवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥)

भूतेति। संसारस्यानादित्वात् पूर्वकल्पकृतानां कर्मणां स्तिमितं नामावस्थानं[4] न विनाशः। तन्निबन्धनोयं पुनः सुरनरतिर्यक्प्रभेदेन विचित्रः सर्ग इति। स एवायमिति। समाननामाकृतित्वा(द)भेदो व्यपदिश्यते। तन्नामानस्तदाकृतयश्च जायन्ते। व्यक्तीनामन्यत्वेपि यथा त एव शालयो भुज्यन्ते (तद्वत्)। शेषं गतार्थम् ॥ १९ ॥

---

१. तत्र व्याकृतमासीत्। २ व्यक्तयश्च। ३. कृतकर्मविनाशोकृतस्य च कर्मफलस्यागम इति। ४. स्तिमितानामवस्थान।

यदेतद् व्यक्तं वर्णितं[1] (तस्मात्)—

(परस्तस्मात्तु भावोन्यो व्यक्तोव्यक्तात्सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥२०॥)

पर इति । परस्तत्काष्ठा[2] । सर्वज्ञोव्यक्तः करणागोचरत्वात् । तस्मादव्यक्तात् पूर्वोक्तादचेतनादयं चेतनः परमात्मा सनातनो नित्यः (परः) । कथम् । यः स सर्वेषु नश्यत्सु न विनश्यति । सोयमीश्वरः प्रतिपत्तव्यः ॥ २० ॥

(अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ २१ ॥)

अव्यक्तेति । योयमव्यक्तः परमात्माक्षर इत्युक्तो वेदे—ततोक्षरात् सम्भवतीह विश्वम्—इति तमाहुः श्रुतयः । परमां गतिं कथं प्राप्य न निवर्तन्ते । तद्धाम स्थानं परमं मम ॥ २१ ॥

स पुनः केनोपायेन लभ्यत इत्याह—

(पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥२२॥)

पुरुष इति । भक्त्या अनन्यया तत्परया स्तुतिनमस्कारध्यानधारणादिभिस्तमेव भजते । न देवतान्तरम् । तस्य लक्षणमुच्यते प्रतिपत्तिसौकर्यार्थम् । यस्यान्तःस्थानि हि भूतानि । कारणे हि कार्यमन्तर्भवति मृदीव शरा(वम्) ।···योगेन चेदं सर्वं ततं व्याप्तम् ॥ २२ ॥

ईश्वरसतत्त्वं निर्धारितम्[3] । तत्प्राप्त्युपायश्च—प्रयाणकाले मनसा—इत्यारभ्योक्तः । (पुरुषं) प्राप्तानां चानावृत्तिरुक्ता ।

---

१. वलितं । २. तत्कुष्ठा । ३. निवारितम् ।

अथेदानीं येन मार्गेण गतानामनागमोनावृत्तिर्येन चावृत्तिरिति विभागेन दर्शयन्नाह—

(यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति त कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥)

यत्रेति । कालग्रहणं मार्गोपलक्षणार्थम् । कर्मयोगिनो ज्ञानयोगिनश्च देवयानपितृयानमार्गमर्चिरादिलक्षितं प्रथमं दर्शयति प्राधान्यात् ॥ २३ ॥

(अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥

अग्निरिति । अग्निर्ज्योतिरित्यर्चिर्देवता लक्ष्यते । ब्राह्मणे चोक्तम्—तेर्चिषमभिसंभवन्ति अर्चिषोहः अह्न आपूर्यमाणपक्षम्—इति । अहरिति चाहरभिमानिनी देवता लक्ष्यते । तथा शुक्लपक्षदेवतोत्तरायणदेवतेत्यातिवाहिन्यो[1] देवता इति स्थितं शारीरके । तेन तु प्रयाता गच्छन्ति ब्रह्म परमात्मानम् । ब्रह्मशब्दस्य तत्र मुख्यतत्त्वं न कार्यलोको गृह्यते परब्रह्मप्रकरणाच्च ।

तत्र यत् कैश्चिदुक्तम्—अर्चिरादिमार्गगामिणां[2] हिरण्यगर्भलोकप्राप्तिरिति तदसत् । इहानावृत्तिरुच्यते ब्रह्मप्राप्तेः स्वतन्त्रवृत्तिः । तथा चोक्तम्—आ ब्रह्मभुवनाल्लोकाः—इति ॥२४॥

इदानीं केवलकर्मिणां पितृयानः न पुनः पुनरावृत्तिलक्षणो मार्गो निर्दिश्यते प्रसङ्गात् [3]कथं चानभिज्ञा नाम पराभवेयुरिति दर्शनार्थम्—

---

१. आतिवाहिन्यो । २. ०गामिनां । ३. कथं नाम ज्ञानं परा० ।

(धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ २५ ॥

धूम इति । धूमो रात्रिस्तथा कृष्ण इत्यत्रापि देवता एव लक्ष्यन्ते । नात्रोत्तरायणं दक्षिणायनं रात्रिरहर्वेति विवक्षितम् । यत्र क्वचन मृतानां समुच्चयकारिणामर्चिरादिरेव । इतरेषामपि धूमादिरेव । भीष्मस्योत्तरायणप्रतीक्षा तत्र मरणं प्रशस्तमिति प्रोत्साहनार्था न नियमार्था । शेषं गतार्थम् ॥ २५ ॥

(शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥ २६ ॥

शुक्लेति । एते च गती शुक्लकृष्णे जगतः । शाश्वते[१] मते वेदोक्तत्वात्—एकया यात्यनावृत्तिमन्ययावर्तते[२] पुनरिति । अर्थस्य पुनर्वचनं निगमनम् ॥ २६ ॥

मार्गद्वयाभिज्ञः केवलं कर्म नारभते समुच्चयार्थमेव यतते निःश्रेयसार्थत्वादिति दर्शयितुमाह—

(नैते सृती पार्थ जानन् योगी मुह्यति कश्चन ।
तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥

नैते इति ॥ २७ ॥

तदेतदध्यायोक्तं ज्ञानम् अन्यनिन्दया स्तूयते । श्रद्धालवः । कथमत्राभियुक्ता भवेयुरिति ।

(वेदेषु यज्ञेषु तपस्सु चैव
दानेषु यत्पुण्यफलं प्रदिष्टम् ।

---

१. शाश्वती । २. अन्यथावर्तते ।

अत्येति तत्सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम् ॥२८॥)

वेदेष्विति । वेदेषु चतुर्ष्वपि यत्पुण्यफलं यज्ञेष्वग्निष्टोमादिषु तपस्सु चान्द्रायणादिषु गोभूमिहिरण्यदानेषु तत्सर्वमिदमत्येति । कथम् । इदं ज्ञानं विदित्वा योगी परं स्थानमुपैति चाद्यम् । सर्वस्थानानामाद्यं पारमेश्वरं पदमिति ॥ २८ ॥

(इति) भगवद्भास्करकृते गीताभाष्ये
अष्टमोध्यायः ॥

अथ नवमोध्यायः ।

देवयानेन गतानामपुनरावृत्तिरुक्ता—मामुपेत्य पुनर्जन्म न विद्यते—इति । यत्[1] प्राप्यापुनरावृत्तिस्तस्य ब्रह्मणो विशिष्ट-शक्तियुक्तस्य सतत्त्वं पुनरपि कथयिष्यन्नाह । अत्यन्तातीन्द्रिय-त्वात् पुनः पुनः कथितमपि न चेतसि स्थितिपदं लभते केषाञ्चिदेव पुण्यकृतां चेतसि स्थिरीभवतीति भगवान् यतते ।

भगवानुवाच—

(इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१॥)

इदं त्विति । इदं तु ते गुह्यतमम् । तुशब्दोतिशयार्थः । अनसूयवे परगुणेषु दोषाविष्करणमसूया । तद्रहिताय । ज्ञानं (प्र)वक्ष्यामि । विज्ञानसहितम् । यज्ज्ञानं ज्ञात्वा मोक्ष्यसेशुभात् संसारबन्धनात् ।

केषाञ्चिदेव पुण्यकृतामर्चिरादिना[2] वर्त्मना क्रममुक्तिरुक्ता । इदानीं सद्योमुक्तिरुच्यते इत्याहुः । तदसत् । अर्चिरादिनैव संसारमण्डलमतिक्रम्य लिङ्गशरीरवियोगान्मुक्तिर्नात्रैव शरीरे (मुच्य)ते । तस्मादिहैव मुक्तिरित्यपसिद्धान्तः[3] ॥ १ ॥

तज्ज्ञानं स्तूयते श्रद्धाजननार्थम्—

(राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥)

---

१. यं । २. ०कृतां मन्दिरादिना । ३. 'केषाञ्चिदेव…अपसिद्धान्तः' इति अंशोयं गुह्यतमम् इत्येतदनन्तरं विद्यते मूलकोषे ।

राजेति । राज्ञामश्वपतिजनकादीनाम् । तेषां च गोप्यं पवित्रं पावनं प्रत्यक्षं स्पष्टोवगमो यस्य तदिदं प्रत्यक्षावगमम् । नैतत्परोक्षमित्यर्थः । यथा महामेरुज्ञानम् । धर्मादनपेतं धर्म्यम् । कर्तुं सुसुखं सुकरमित्यर्थः । अक्षयफलहेतुत्वादव्ययम् ॥ २ ॥

ये पुनः—

(अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ ३ ॥)

अश्रद्दधेति । अश्रद्दधानाः पुरुषा धर्मस्यास्य वक्ष्यमाणस्य ज्ञानरूपस्य ते मामप्राप्य निवर्तन्ते मृत्युग्रस्ते संसारवर्त्मनि ॥३॥

इदानीं तज्ज्ञानं कथयति—

(मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४ ॥)

मयेति । मया ततमिदं सर्वमव्यक्तमूर्तिनातीन्द्रियेण[1] सूक्ष्मेणात्मना । मयि तिष्ठन्तीति मत्स्थानि । न चाहं तेष्ववस्थितः । स्वमहिम्नि स्थितत्वात् ॥ ४ ॥

(मम योगमैश्वरं पश्य[2])—

(न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥)

---

१. ०मूर्तिना अतेन्द्रियेण । २. चतुर्थश्लोकव्याख्यानानन्तरम् ४ ॥ कुण्ड इति तानि अक्षराणि तत्पत्रान्ते योग इति । अव्यवहितपरपत्रारम्भे प्रथमपङ्क्तौ सि स्वत् न चेति इति द्वितीयपङ्क्तौ वर्तन्ते ।

न चेति। भूतानि बिभर्तीति भूतभृत्। न च भूतेषु। यथा शरीरी जीवः। शरीराकारपरिणतानि भूतानि बिभर्ति तेषु चावस्थितो न चैवमहम्। भूतानि भावयतीति भूतभावनः॥ ५॥

मत्स्थानि न च मत्स्थानि इति विरुद्धं पश्यन् दृष्टान्तमाह—

(यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥ ६॥)

यथेति। यथाकाशे व्यापकेतिसूक्ष्मो वायुः स्थितः सर्वत्रगो लोकत्रयव्यापी तथा भूतानि मत्स्थानीत्युपधारय। न संश्लेषसम्बन्धेन। किं तर्हि। व्यापके मयि विषयभूतेल्पपरिमाणानि (भूतानि) परिवर्तन्त इति स्थित्यवस्था दर्शिता॥ ६॥

अधुना प्रलयावस्थोच्यते—

(सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्॥ ७॥)

सर्वेति। सर्वभूतानि कौन्तेय मदीयां प्रकृतिं यान्ति। कदा। कल्पक्षये। कल्पादौ च पुनस्तानि विसृजामि॥ ७॥

कथम्—

(प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्॥ ८॥)

प्रकृतिमिति[1]। प्रकृतिं स्वामवष्टभ्यावलम्ब्य भूतग्रामं (भूत)समूहं विसृजामि। अवशं परतन्त्रं प्रकृतेर्वशात्। यथाकर्म प्राणिनां प्रकृतिः परिणमते अतस्तद्वशात् सृजामि।

---

१. प्रकृतमिति।

का पुनरियं प्रकृतिः। पञ्चानां भूतानां सूक्ष्मावस्था वीर्यभूता। अत्रेयं वेदान्तप्रक्रिया—परं ब्रह्म निश्चलमाकाशकल्पं प्रथममवस्थितम्। तत(स्तस्य) रोषाद् विकृतः सृष्टीच्छाविशिष्टोन्तर्यामीश्वरशब्दवाच्यो भवति। ततो भूतसूक्ष्ममव्याकृतमाकाशमुत्पद्यते। ततः सूक्ष्मात्मायं हिरण्यगर्भ इत्याचक्षते। ततः स्थूलानि वियदादीनि महाभूतानि क्रमेणोत्पद्यन्ते। ततोण्डं ततो विराट् प्रजापतिः। तस्मिन् वैराजे स्थूलशरीरे सर्वे लोकाः सर्वे देवाः सर्वाणि च स्थावरजङ्गमानि भूतानीति वस्तुभूतेयं प्रकृतिर्न मायामात्रमवस्तुभूतम्॥ ८॥

न चाविद्या नाम काचिदनात्मन्यात्मबुद्धिः। जीवस्य प्रतिपुरुषं परब्रह्मस्वरूपं तदग्रहं च मुक्त्वा कदाचिदाशङ्क्येत[1]—विषमां सृष्टिं कुर्वतो दोषा(य तत्) स्यादित्याह[2]—

(न च मां तानि कर्माणि निबध्नन्ति धनञ्जय।
उदासीनवदासीनमसक्तं तेषु कर्मसु॥ ९॥)

न चेति। न च मां निबध्नन्ति कर्माणि। कस्मात्। उदासीनवदासीनत्वात्। तेषु कर्मसु असक्तत्वात्। अन्योपि यः फलासक्तस्तमपि कर्माणि न निबध्नन्ति न्यायतुल्यत्वात्॥ ९॥

ननु च प्रकृतिर्नित्या स्वतन्त्रा भूतसृष्टौ प्रवर्तत इति सांख्या वदन्ति। तदसत्। तदुच्यते—

(मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते॥ १०॥)

---

१. न चाविद्या नाम काचित्। प्रतिपुरुषमनात्मबुद्धिर्यत्तुजीवस्य परं ब्रह्मस्वरूपं तदग्रहं च मुक्त्वा कदाचिदाशङ्क्येत। २. स्यादित्याह॥ ८॥

मयेति । मयाध्यक्षेण मत्त उत्पन्ना सती मयाध्यक्षेणाधिष्ठात्रा प्रवर्तिता सूयते जनयति । नह्यचेतना प्रकृतिस्त्रिगुणात्मिका सांख्यपरिकल्पिता सती प्रवर्तितुमर्हति प्राणिनां विचित्रकर्मविपाकापरिज्ञानात् । कथं सुरनरतिर्यक्प्रभेदभिन्नं भुवनं निर्मीयते रथादीनामचेतनानां स्वतः प्रवृत्त्यदर्शनाच्च चेतनाधिष्ठिताः प्रवर्तन्त इति युक्तम् । अतो मत्प्रवर्तिता प्रकृतिः । (अनेन) प्रसवहेतुना[1] जगद् (वि)परिवर्तते ॥ १० ॥

प्रकृतेरध्यक्षमपि सन्तम्—

(अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥ ११ ॥)

अवेति । अवजानन्ति मां मूढाः प्रादुर्भावेषु मानुषीं तनुमाश्रितं वासुदेवो नाम क्षत्रियो मनुष्योयमित्यनादरं कुर्वन्ति परं भावमजानन्तो भूतमहेश्वरं मम ॥ ११ ॥

ते च—

(मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
आसुरीं राक्षसीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥)

मोघेति । मोघाशा मोघकर्माणो वृथासंकल्पाः । कर्माणि च तेषामग्निहोत्रादीनि वृथैव ज्ञानं चानात्मविषयत्वात् । विचेतसोविवेकिनः राक्षसीं तामसीं प्रकृतिमास्थिताः ॥ १२ ॥

ये तु—

(महात्मानस्तु मां पार्थ दैवीं प्रकृतिमास्थिताः ।
भजन्तेनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥)

---

१. प्रसवे हेतुना ।

महेति । महात्मानस्तु लोकोत्तरप्रज्ञा दैवीं प्रकृतिं सत्त्वगुणसंभूतां चित्तवृत्तिमाश्रिता भजन्ते सेवन्ते भूतानामादिं[1] मां ज्ञात्वा ॥ १३ ॥

केन प्रकारेण भजन्ते—

(सततं कीर्तयन्तश्च यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥१४॥)

सततमिति । सततं मत्स्वरूपकथने प्रवृत्तचेतसो यतन्तश्च मत्प्राप्त्युपायेषु यत्नवन्तो दृढव्रताः दृढं[2] स्थिरं व्रतं नियमः कर्मेत्य(न)र्थान्तरं तद्येषां ते दृढव्रताः । भक्त्या चादरेण मां नमस्यन्तः पादपतनादिना व्यापारेण नित्ययुक्ताः सन्त उपासते ॥ १४ ॥

अन्ये तु परिपक्वज्ञानाः—

(ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥)

ज्ञानेति । ज्ञानमेव यज्ञो ज्ञानयज्ञः । यजन्तः पूजयन्तो मामुपासते । सातत्येन परमेश्वरे चित्तधारणमुपासनम् । ते चैकत्वेनात्मानमिदं सर्वं वासुदेवः सर्वमित्यनया (बुद्ध्या) समस्तभेदप्रपञ्चं[3] परमकारणपरमात्मनि[4] चेतः प्रविलाप्य तदात्मनावतिष्ठन्ते । ते चैते ब्रह्मविदः श्रेष्ठाः । अन्ये पुनरेवमसक्ताः पृथक्त्वेनोपासते । बहुधा बहुभिः प्रकारैरादित्ये चन्द्रमस्यसौ परमात्मानं चिन्तयन्ति । विश्वतोमुखं सर्वतो मुखानि

---

१. भूतानामादि । २. स्थिर । ३. सर्वमित्य० इत्येतदनन्तरं समस्त० इत्येतस्मात्पूर्वं कानिचनाक्षराण्यस्पष्टानि । ४. परमकरण ।

द्वाराणि (यस्य) तं[1] विश्वतोमुखम्। यदेवालम्बनत्वेनोपादीयते वक्ष्यमाणं तदेव तत्प्राप्त्युपायतां प्रतिपद्यते ॥ १५ ॥

तदिदानीं प्रपञ्चयति—

(अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥)

अहं क्रतुरिति। अहं क्रतुः पशुसोमेष्टिलक्षणो यज्ञः स्मार्तः पञ्चमहायज्ञादिः[2]। स्वधा यत्तु पितॄनुद्दिश्य क्रियते। अहमौषधं व्रीह्यादीनाम्। इदं किम्। तदन्नम्। मन्त्रो याज्यापुरोनुवाकादिः[3]। अहमेवाज्यं होमसाधनम्। अहमग्निराहवनीयो यत्र हूयते। हुतं च हवनक्रियाहमेव ॥ १६ ॥

(पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोङ्कार ऋक् साम यजुरेव च ॥ १७ ॥)

पितेति। पितोत्पादयिता पालयिता वा। माता धात्री धाता विधाता। कर्मफलानाम्। पितामहः पितुः पिता चाहमेव। यद्वेद्यं ज्ञेयं वस्तु तदहम्। यच्च पवित्रं पावनं प्रायश्चित्तादि। ओङ्कारः प्रणवः। वेदत्रयं चाहमेव ॥ १७ ॥

(गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयस्थानं निधानं बीजमव्ययम् ॥ १८ ॥)

गतिरिति। गम्यत इति गतिर्गन्तव्योहम्। भर्ता पोष्टा। प्रभुः स्वामी। द्रष्टा प्रत्यक्षपरोक्षकृतानां कर्मणाम्। निवासः प्राणिनाम्। निवसन्त्यस्मिन्निति निवासः। शरणमार्तानाम्। सुहृदुपकारी प्रत्युपकारानपेक्षया। प्रभवो जगतः प्रलयः स्थानं

---

१. तं तं। २. यज्ञादि। ३. पुरोनुवाकयादिः।

स्थितिहेतुः। निधीयतेस्मिञ्छ्रेय इति निधानम्। बीजमुत्पत्तिकारणम्। अव्ययं व्ययरहितम्। व्रीह्यादिबीजं व्ययि ॥ १८ ॥

किञ्च—

(तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥)

तपामीति। आदित्यात्मना स्थित्वा निदाघसमये तपामि कैश्चिद्रश्मिभिः। प्रावृट्काले वर्षमुत्सृजामि। कैश्चित् किरणैर्निगृह्णाम्यन्यर्तावहमेवामृतं जीवनम्। मृत्युश्च विनाशः सदसच्चाहमर्जुन। सदिति स्थूलं व्यवहारयोग्यं वस्तु व्यपदिश्यते। असदिति सूक्ष्ममव्यक्तम(व्यवहार्य)म्। एवं मद्व्यति(रिक्तं किमपि नास्ति)। सन्तः[1] सम्यग्दर्शिन एकत्वेनाकामा (विश्व)तो मुखमवस्थितं[2] (मा) मु(पासते। अपरे अकामाः)··· क्रत्वाद्येकैकप्रतिपत्त्या बहुधा पृथक्त्वेनोपासत इति संक्षेपार्थः ॥ १९ ॥

ये पुनर्ज्ञानयज्ञेनोपासते पृथक्त्वेनैकत्वेन (वा) केवलकर्मिणः फललुब्धाः—

(त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोक-
मश्नन्ति दिव्यान् दिवि देवभोगान् ॥ २० ॥)

---

१. कच्यन्तः। २. 'अवस्थितं' एतदन्तरम् एकमक्षरमस्पष्टम्। तदनन्तरं मपरं इति वर्तते। ततः परमेकमक्षरमस्पष्टम् मूलकोषे।

त्रैविद्येति । तिस्रो विद्या येषां ते त्रैविद्याः । स्वार्थे तद्धितः । वेदत्रयविहितकर्माण इत्यर्थः । सोमपास्तत एव पूतपापाः संशोधितकल्मषा यज्ञैरिष्ट्वा मामेवेन्द्रादिरूपेणावस्थितं वस्तुतो न पुनस्ते जानन्ति स्वर्गतिं स्वर्गगमनम्[1] । ते पुण्यं पुण्यकर्मसाध्यं शतक्रतोः स्थानं भुञ्जन्ति दिव्याननुभवन्ति भोगान् ॥ २० ॥

ते च—

(ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते ॥ २१ ॥)

ते तमिति ।[2] भुक्तेषु भोगेषु पुनः क्षीणपुण्याः पुण्यक्षये मर्त्यलोकं प्रविशन्ति । एवमित्युक्तपरामर्शः । हिशब्दो हेतौ । त्रयीधर्मं[3] वेदत्रयविहितं कर्म प्रपन्ना जायन्ते म्रियन्ते । कामान् भोगान् कामयमानाः ॥ २१ ॥

ये तु—

(अनन्यांश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥

अनन्यांश्चिन्तयन्तो मामिति । न विद्यतेन्य उपास्यो येषां ते अनन्याः । तेषां नित्याभियुक्तानामहमेव योगक्षेमं वहामि । अप्राप्तप्राप्तिर्योगः । क्षेमः प्राप्तस्य परिरक्षणम् । तदुभयम् ॥२२॥

---

१. गमनम् । २. भुक्तेष्विति मुक्तेषु भोगेषु वः क्षीणपुण्याः कर्मसाध्यं शतक्रतोः पुण्यक्षये । अत्र मं इत्यारभ्य शतक्रतो एतदन्तः पाठः खण्डित इति प्रतिभाति । ३. त्रैधर्म्यं ।

किञ्च—

(**येप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।**
तेपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ २३ ॥)

येपीति । येप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः । यजन्ते पूजयन्ति च । तेपि मामेव वस्तुतो यजन्ति । किन्त्वविधिपूर्वकम् । मुक्तिमार्गविधिरहितमित्यर्थः । न पुनः कल्पसूत्रोक्तं[१] (विधिपूर्वकम्) । विधिं ते न जानन्ति ॥ २३ ॥

कुतः पुनरेवम्—

(**अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।**
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ २४ ॥)

अहं हीति । अहं हि सर्वयज्ञानां तेन तेनेन्द्राद्यात्मनावस्थितो[२] भोक्ता च प्रभुरेव (च) । ते पुनर्न तु मामभिजानन्ति (तत्त्वेन त)थावस्थितम्[३] । अतश्च्यवन्ति ते । पुनरावृत्तिं भजन्त इत्यर्थः ॥ २४ ॥

एतदेव दर्शयति—

(**यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः ।**
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोपि माम् ॥२५॥)

यान्तीति । यान्ति देवव्रताः । देवानां कर्म व्रतम् (येषां ते) । यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति—इति श्रुतेः । तं यथा यथोपासते—इति च ब्राह्मणम् । निगदव्याख्या । अत ए(व) । सर्वे मां याजि(नः) वासुदेवा भवन्ति ॥ २५ ॥

---

१. कल्पसूत्रोक्तं विधिं ते न जानन्ति । २. तेन तेनैन्द्राद्यात्मनावस्थितो । ३. तथावास्थितम् ।

(सा)फल्यमनेन·····पठ··साध्यत्वात्··आराधनीयः ।

कथम्—

(पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६ ॥)

पत्रं पुष्पमिति । विल्वादिपत्रम्। पुष्पं करवीरादि । बदराम्रादि फलम्। कृतार्थं मे जन्मेति स्नेहार्द्रहृदयो यो मे प्रयच्छति तदहमुपहृतं समर्पितं गृहीत्वाश्नामि तृप्यामि श्रद्धाबुद्धेः ॥ २६ ॥

यत एवमतः—

(यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥ २७ ॥)

यदिति । यत्करोषि स्नानादि । यदश्नासि भोजनकाले । प्राणाहुतिः होमो निर्दिश्यते । यज्जुहोषि बाह्येग्नौ ददासि हिरण्यादि । यत्तपस्यस्युपवासादि (करोषि) । तत्सर्वं मदर्पणं कुरु ॥ २७ ॥

शृणु ततः फलम्—

(शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
सन्न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥)

शुभेति । शुभाशुभानि फलानि येषां कर्मबन्धनानाम् । कर्माण्येव बन्धनानि । तैर्विमुच्यसे । विमुक्तश्च सन्न्यासयोगयुक्तात्मा । सन्न्यासः कृतानां कर्मणां ब्रह्मणि समर्पणम् । तदेव

कर्तृकर्मफलं चेत्यभेदभावना योगः। ताभ्यां युक्त आत्मा यस्यासौ सन्न्यासयोग(युक्त)ात्मा मामुपेष्यसि ॥ २८ ॥

ननु यस्त्वयि समर्पणं करोति स एव चेत् त्वामुपैति रागादिमांस्तर्हि भवान् यथा लोके राजा भजमानस्योपकरोति नेतरस्येत्याशङ्क्याह—

(समोहं सर्वभूतेषु न मे द्वेष्योस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥२९॥)

समोहमिति। समोहं सर्वभूतेषु न मे रागद्वेषौ। यो भक्त्या मां भजते तस्यानुग्रहं कर्तुं मम स्वभावः यथाग्निः सम्यग् भजमानस्य शीताद्यपनोदं करोति नेतरस्य। अतो ये भजन्ति तु भक्त्या सेवन्ते (माम्) आश्रयन्ते तेष्वहं वर्ते। नात्र रागद्वेषौ कारणम्। अपि तु प्राणिकर्मानुरूपफलप्रदर्शनेनाग्निवदनुगृह्णामीत्यभिप्रायः ॥ २९ ॥

इदानीं वृत्तादिनिराकरणेनापि भगवदाश्रयणस्तुत्यर्थमर्थवादकथनं क्रियते। वृत्तमप्यत्र तन्त्रमित्याह—

(अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः ॥३०॥)

अपीति। सुष्ठु भृशं[1] चेद् दुराचारः सोपि साधुरेव मन्तव्यः। कस्मात्। सम्यग् व्यवसितः सुनिश्चितबुद्धिः सन्मार्गमास्थितो यतः। हिशब्दो हेतौ ॥ ३० ॥

---

१. दृशं।

अयं (पु)नः—

(क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मद्भक्तः प्रणश्यति ॥ ३१ ॥)

क्षिप्रमिति।·········टि·······पापक्षयात्। शश्वदिति क्रियावि-(शेषणम्) नि(र्ग)च्छतीत्यर्थः। तदेतद्वस्तु प्रतिजानीहि। न मे (भक्तः प्रणश्य)तीति ॥ ३१ ॥

इदानीं ये भजन्ति तु मां भक्त्या—इति यद् भगवत्सेवनं प्रक्रान्तं तत्र श्रद्धाभक्तिभ्यां भगवद्व्यपाश्रयणप्ररोचनार्थ-मप्यर्थवादमाह—

(मां हि पार्थ व्यपाश्रित्य येपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेपि यान्ति परां गतिम् ॥३२॥)

मामिति। हे पार्थ मां व्यपाश्रित्य विशेषेण शरणत्वेना-श्रित्य येपि पापयोनयो भवन्ति। पापाद् योनिर्जन्म येषां ते पापयो-नयः कुत्सितजन्मानः स्त्र्यादयो येत्यन्तमपवर्गेनधिकृतास्तेपि स्वकर्मानुष्ठानलक्षणेन मदाज्ञासम्पादनेन पापक्षयात् परमां प्रकृष्टामुत्तमां स्वर्गलक्षणां गतिं यान्ति प्राप्नुवन्तीति सम्भाव्यते। मत्सम्पर्को हि शु(द्धिकारणमनलसम्पर्क इव लौहस्य। स्वकर्मणा (मां) सेवस्वेति[1]। स्वकर्मणैवाराधनस्य विधानात् प्रत्युत्थाना-त्मकं कर्म शूद्रस्यापि स्वभावजमिति प्रत्युत्थानेन परिचर्यात्मकेन स्वकर्मणा तमेवार्थसिद्धिं विन्दति मानव इति। तदनुष्ठानेनैव पुरुषार्थसिद्धेर्विधास्यमानत्वात् ॥ ३२ ॥

---

१. स्वकर्मणासेवास्येति ।

अर्थवादतात्पर्यमुपसंहरन्नाह[1]—

(किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३ ॥)

किमिति । भगवच्छरणगता अनधिकृताः स्त्र्यादयोप्युत्कृष्टां गतिं गच्छन्ति । किं पुनर्ये शुद्धयोनयोधिकृता ब्राह्मणराजर्षयश्च ते न यास्यन्तीति । अपिशब्देन सम्भावनार्थेनातिशयोक्त्या ब्राह्मणादीनां ज्ञानप्ररोचनानेन क्रियते न तु यथाश्रुतोर्थो विधीयते । यथा—अपि पर्वतं शिरसा भिन्द्यात्, अपि द्रोणपाकं भुञ्जीत—इत्यनेन वाक्येन पुरुषशक्तिश्रद्धानं क्रियते न तु (प)र्वतभे(दः) प्रतिपाद्यते, अशक्यत्वात्। नहि पर्वतं भिन्द्यादित्यस्यान्यपरत्वात् स्वार्थतात्पर्यात्तत्र प्रवृत्तिः । नहि विधिं हितस्यार्थस्य स्तुत्या द्रोणपाकस्य प्रतिषिद्धस्य दुष्टस्य निन्दया निवृत्तिः । न तु विषभक्षणलक्षणं स्वार्थं प्रतिपाद्यते । अतश्च जैमिनिरर्थवाद[2]-लक्षणसूत्रं प्रणीतवान्—विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरिति । अर्थवादाः किल विध्येकवाक्यतया विधिशेषत्वेन निषेधशेषत्वेन च तत्स्तुत्यर्थास्तन्निन्दार्था वा भवेयुरित्यर्थः । अर्थवादवाक्यानां पदार्थत्वात् स्वार्थे च तात्पर्या-(भावा)दन्यपरत्वाच्चेति । तथा च भट्टपादैरेवोक्तम्—

व्याख्येयाद् गुणवादेन योर्थवादादतत्परात् ।
अर्थेधिगन्तुमिष्येत कथं स्यात्तस्य सत्यता ॥ इति ।

तथा च श्रुतौ—पशुयागे[3] वपाहोमः कर्तव्य इति । अस्य विधेरवश्यानुष्ठानायार्थवादवाक्यम्—प्रजापतिर्वपामुदखिदत

---

१. संहरणमाह । २. नहि पर्वं···दन्यपरप्वात् स्वार्थतात्पर्यातत्र···हि··· स्तुत्या प्रतिषिद्धस्य···निवान्ति···यवृत्तिः···प्र च जैमिति··· । ३. पशुयाग ।

इत्यादि । तस्यायमर्थः—एवं नाम यजमानेनावश्यं वपाहोमः कर्तव्य इति । यदुक्तं[१] पश्वन्तराभावे प्रजापतिना स्वात्मन एव वपामुत्खिद्य वपाहोमोनुष्ठित इति पशुयागविधेरवश्य-कर्तव्यत्वे वपोत्खननमध्यारोपितं प्ररोचनार्थम् । लोकेप्यन-भिप्रेतदुष्टपुरुषगृहभोजननिवृत्त्यर्थं कश्चित् किञ्चिद् ब्रवीति—वरं विषं भक्ष्य मा चास्य गृहे भुङ्क्था इति । अनेनापि लौकिकेनार्थवाद-वाक्येन न विषभक्षणलक्षणः[२] स्वार्थो विधीयते अपि तु अति-शयोक्त्या (त)द् गेहभोजननिवृत्तिः क्रियते । ···निषिद्ध··· ।

१. दुत । २. नैभिषभक्षणलक्षणः ।

प्रथमं परिशिष्टम्

ग्रन्थेस्मिन् व्याख्यातानां गीताश्लोकानाम्

अकारादिक्रमसूची

	अध्यायः	श्लोकसंख्या	पृष्ठाङ्कः
अकीर्तिं चापि भतानि	२	३५	६१
अक्षरं ब्रह्म परमं	८	६	१८०
अग्निर्ज्योतिरहः शुक्लः	८	२४	१९०
अच्छेद्योयमदाह्योयं	२	२५	५७
अजोपि सन्नव्ययात्मा	४	६	१०७
अज्ञश्चाश्रद्दधानश्च	४	४०	१३२
अत्र शूरा महेष्वासाः	१	१४	१९
अथ केन प्रयुक्तोयं	३	३६	१०१
अथ चेत्त्वमिमं धर्म्यं	२	३४	६०
अथ चैनं नित्यजातं	२	२७	५८
अथवा योगिनामेव	६	४३	१६३
अथ व्यवस्थितान् दृष्ट्वा	१	२०	२५
अधर्माभिभवात् कृष्ण	१	४०	३२
अधिभूतं क्षरो भावः	८	४	१८१
अधियज्ञः कथं कोत्र	८	२	१८०
अनन्तविजयं राजा	१	१६	२३
अनन्यचेताः सततं	८	१४	१८५
अनन्यांश्चिन्तयन्तो मां	९	२२	२०१
अनाश्रितः कर्मफलं	६	१	१५४
अनेकचित्तो विभ्रान्तः	६	३८	१६१
अन्तकाले च मामेव	८	५	१८५
अन्तवत्तु फलं तेषां	७	२३	१७६
अन्तवन्त इमे देहा	२	१९	५१
अन्तःसुखोन्तरारामः	६	२४	१५०
अन्नाद्भवन्ति भूतानि	३	१४	९०

	अध्यायः	श्लोकसंख्या	पृष्ठाङ्कः
अन्येपि बहवः शूराः	१	९	२१
अपरं भवतो जन्म	४	४	१०७
अपरे नियताहाराः	४	३०	१२८
अपरेयमितस्त्वन्यां	७	५	१६७
अपर्याप्तं तदस्माकं	१	१०	२१
अपाने जुह्वति प्राणं	४	२९	१२७
अपि चेत्सुदुराचारः	९	३०	२०४
अपि चेदसि पापेभ्यः	४	३६	१३१
अभ्यासयोगयुक्तेन	८	८	१८३
अयनेषु च सर्वेषु	१	११	२२
अयतिः श्रद्धयोपेतः	६	३७	१६१
अवजानन्ति मां मूढा	९	११	१९७
अवाच्यवादांश्च बहून्	२	३७	६१
अविनाशि तु तद्विद्धि	२	१८	५१
अव्यक्तादीनि भूतानि	२	२९	५९
अव्यक्ताद् व्यक्तयः सर्वाः	८	१८	१८८
अव्यक्तोक्षर इत्युक्त	८	२१	१८९
अव्यक्तोयमचिन्त्योयम्	२	२६	५८
अव्यक्तं व्यक्तिमापन्नं	७	२४	१७७
अशोच्यानन्वशोचस्त्वं	२	१२	४२
अश्रद्दधानाः पुरुषाः	९	३	१९४
असंयतात्मना योगः	६	३६	१६१
असंशयं महाबाहो	६	३५	१६०
अस्माकं तु विशिष्टा ये	१	७	२०
अहं क्रतुरहं यज्ञः	९	१६	१९९
अहं हि सर्वयज्ञानां	९	२४	२०२
अहो बत महत्पापम्	१	४४	३४
आचार्याः पितरः पुत्राः	१	३३	२९
आत्मौपम्येन सर्वत्र	६	३२	१५९
आब्रह्मभुवनाल्लोकाः	८	१६	१८६
आवृतं ज्ञानमेतेन	३	४४	१०३

	अध्यायः	श्लोकसंख्या	पृष्ठाङ्कः
आश्चर्यवत्पश्यति	२	३०	६०
इच्छाद्वेषसमुत्थेन	७	२७	१७८
इदं तु ते गुह्यतमं	९	१	१९३
इन्द्रियस्येन्द्रियार्थे	३	३४	१००
इन्द्रियाणि पराण्याहुः	३	४७	१०५
इन्द्रियाणि मनो बुद्धिः	३	४५	१०४
इमं विवस्वते योगं	४	१	१०६
इष्टान् भोगान् हि वो देवाः	३	१२	८९
इहैव तैर्जितः सर्गः	५	१९	१४८
उत्सन्नकुलधर्माणां	१	४३	३३
उत्सीदेयुरिमे लोकाः	३	२४	९६
उदाराः सर्व एवैते	७	१८	१७४
एतद्योनीनि भूतानि	७	६	१६८
एतन्मे संशयं कृष्ण	६	४०	१६२
एतान्न हन्तुमिच्छामि	१	३४	३०
एवमुक्तो हृषीकेशः	१	२३	२६
एवमुक्त्वार्जुनः संख्ये	१	४६	३५
एवमुक्तो हृषीकेशं	२	९	४१
एवं परम्पराप्राप्तम्	४	२	१०६
एवं प्रवर्तितं चक्रं	३	१६	९१
एवं बहुविधा यज्ञाः	४	३२	१२८
एवं बुद्धेः परं बुद्ध्वा	३	४८	१०५
एवं ज्ञात्वा कृतं कर्म	४	१५	११३
एवं युञ्जन् सदात्मानं	६	२८	१५८
एष सूक्ष्मः पुरः शत्रुः (भास्करेण न धृतः)	३	३९	१०२
एषा तेऽभिहिता सांख्ये	२	४०	६४
ओमित्येकाक्षरं ब्रह्म	८	१३	१८५
कच्चिदुभयविभ्रष्टः	६	३९	१६२
कथं न ज्ञेयमस्माभिः	१	३८	३१
कथं भीष्ममहं संख्ये	२	४	३७
कर्मजं बुद्धियुक्ता हि	२	५२	७३
कर्मणैव हि संसिद्धि	३	२०	९३

	अध्यायः	श्लोकसंख्या	पृष्ठाङ्कः
कर्मणो ह्यपि बोद्धव्यं	४	१७	११४
कर्मण्यकर्म यः पश्येत्	४	१८	११४
कर्मण्येवाधिकारस्ते	२	४८	७१
कर्मब्रह्मोद्भवं विद्धि	३	१५	९०
कर्मेन्द्रियाणि संयम्य	३	६	८७
कविं पुराणमनुशासितार	८	९	१८३
काम एष क्रोध एष	३	३७	१०२
कामक्रोधमयो घोरः (भास्करेण न धृतः)	३	४१	१०३
कामक्रोधवियुक्तानां	५	२६	१५१
कामात्मानः स्वर्गपराः	२	४४	६७
कामैस्तैस्तैर्हृतज्ञानाः	७	२०	१७५
कायेन मनसा बुद्धया	५	११	१४२
कार्पण्यदोषोपहतस्वभावः	२	७	३९
काश्यश्च परमेष्वासः	१	१७	२३
काङ्क्षन्तः कर्मणां सिद्धि	४	१२	११०
किं कर्म किमकर्मेति	४	१६	११३
किं तद्ब्रह्म किमध्यात्मं	८	१	१८०
किं पुनर्ब्राह्मणा मुख्या	९	३३	२०६
कुतस्त्वा कश्मलमिदं	२	२	३६
कुलक्षये प्रणश्यन्ति	१	२९	१२
क्षिप्रं भवति धर्मात्मा	९	३१	२०५
गतसङ्गस्य मुक्तस्य	४	२३	१२२
गतिर्भर्ता प्रभुः साक्षी	९	१८	१९९
गाण्डिवं स्रंसते हस्तात्	१	३०	२७
गुरूनहत्वा हि महानुभावान्	२	५	३७
चञ्चलं हि मनः कृष्ण	६	३४	१६०
चतुर्विधा भजन्ते मां	७	१६	१७३
चातुर्वर्ण्यं मया सृष्टं	४	१३	१११
जन्म कर्म च मे दिव्यम्	४	९	१०८
जरामरणमोक्षाय	७	२९	१७८
जातस्य हि ध्रुवो मृत्युः	२	२८	५८

	अध्यायः	श्लोकसंख्या	पृष्ठाङ्कः
ज्ञानयज्ञेन चाप्यन्ये	९	१५	१९८
ज्ञानेन तु तदज्ञानं	५	१६	१४७
ज्ञानं तेहं सविज्ञानम्	७	२	१६६
ज्ञेयः स नित्यसन्न्यासी	५	३	१३५
ज्यायसी चेत्कर्मणस्ते	३	१	७४
तं तथा कृपयाविष्टम्	२	१	३६
ततः शङ्खाश्च भेर्यश्च	१	११	२२
ततः श्वेतैर्हयैर्युक्ते	१	१४	२३
तत्त्ववित्तु महाबाहो	३	२८	९८
तत्र तं बुद्धिसंयोगं	६	४४	१६३
तत्रापश्यत्स्थितान् पार्थं	१	२५	२६
तद्बुद्धयस्तदात्मानः	५	१७	१४७
तद्विद्धि प्रणिपातेन	४	३४	१३०
तपस्विभ्योधिको योगी	६	४७	१६५
तपाम्यहमहं वर्षं	९	१९	२००
तमुवाच हृषीकेशः	२	१०	४१
तस्मात्त्वमिन्द्रियाण्यादौ	३	४६	१०४
तस्मात् सर्वेषु कालेषु	८	७	१८२
तस्मादसक्तः सततं	२	१९	९३
तस्मादज्ञानसम्भूतं	४	४२	१३३
तस्मान्नार्हा वयं हन्तुं	१	३७	३०
तस्य संजनयन् हर्षं	१	१२	२२
तान् समीक्ष्य स कौन्तेयः	१	२७	२७
ते तं भुक्त्वा स्वर्गलोकं	९	२१	२०१
तेषां ज्ञानी नित्ययुक्तः	७	१७	१७४
त्यक्त्वा कर्मफलासङ्गम्	४	२०	११९
त्रिभिर्गुणमयैर्भावैः	७	१३	१७२
त्रैगुण्यविषया वेदाः	२	४६	६९
त्रैविद्या मां सोमपाः	९	२०	२००
त्वं मानुषेणोपहतान्तरात्मा	२	११	४१
दुःखेष्वनुद्विग्नमना	२	५७	७५

	अध्यायः	श्लोकसंख्या	पृष्ठाङ्कः
दूरेण ह्यवरं कर्म	२	४९	७२
दृष्ट्वा तु पाण्डवानीकं	१	२	१८
दृष्ट्वेमान् स्वजनान् कृष्ण	१	१८	२७
देवान् भावयतानेन	३	११	८९
देही नित्यमवध्योयं	२	३१	६१
देहिनोस्मिन् यथा देहे	२	१४	४५
दैवमेवापरे यज्ञं	४	२५	१२५
दैवी ह्येषा गुणमयी	७	१४	१७२
दोषैरेतैः कुलघ्नानां	१	४२	३३
द्रव्ययज्ञास्तपोयज्ञा	४	२८	१२६
धर्मक्षेत्रे कुरुक्षेत्रे	१	१	१७
धूमो रात्रिस्तथा कृष्णः	८	२५	१९१
धूमेनाव्रियते वह्निः	३	४३	१०३
धृष्टकेतुश्चेकितानः	१	५	१९
ध्यायतो विषयान् पुंसः	२	६३	७६
न कर्तृत्वं न कर्माणि	५	१४	१४५
न कर्मणामनारम्भात्	३	४	८३
न काङ्क्षे विजयं कृष्ण	१	३२	२९
न च मत्स्थानि भूतानि	९	५	१९४
न च मां तानि कर्माणि	९	९	१९६
न च शक्नोम्यवस्थातुं	१	३०	२७
न चैतद्विद्मः कतरन्नो	२	६	३८
न जायते म्रियते वा	२	२१	५३
न त्वेवाहं जातु नासं	२	१३	४३
न प्रहृष्येत्प्रियं प्राप्य	५	२०	१४९
न बुद्धिभेदं जनयेत्	३	२६	९७
न मां कर्माणि लिम्पन्ति	४	१४	११३
न मां दुष्कृतिनो मूढा	७	१५	१७३
न मे पार्थास्ति कर्तव्यं	३	२२	९५
नहि कश्चित् क्षणमपि	३	५	८६
नहि ज्ञानेन सदृशं	४	३८	१३२

	अध्यायः	श्लोकसंख्या	पृष्ठाङ्कः
नहि प्रपश्यामि	२	८	४०
नादत्ते कस्यचित् पापं	५	१५	१४६
नासतो विद्यते भावो	२	१७	४७
नाहं प्रकाशः सर्वस्य	७	२५	१७७
निमित्तानि च पश्यामि	१	३०	२८
नियतं कुरु कर्म त्वं	३	८	८७
निराशीर्यतचित्तात्मा	४	२१	१२०
निहत्य धार्तराष्ट्रान्नः	१	३५	३०
नेहाभिक्रमनाशोस्ति	२	४१	६५
नैते सृती पार्थ जानन्	८	२७	१९१
नैनं छिन्दन्ति शस्त्राणि	२	२४	५७
नैव किञ्चित्करोमीति	५	८	१३८
नैव तस्य कृतेनार्थः	३	१८	९२
पत्रं पुष्पं फलं तोयं	९	२६	२०३
परस्तस्मात्तु भावोन्यो	८	२०	१८९
परित्राणाय साधूनां	४	८	१०८
पश्यैतां पाण्डुपुत्राणाम्	१	३	१८
पाञ्चालश्च महेष्वासः	१	१८	२४
पाञ्चजन्यं हृषीकेशः	१	१५	२३
पार्थ नैवेह नामुत्र	६	४१	१६२
पिताहमस्य जगतः	९	१७	१९९
पुण्यो पृथिव्यां गन्धोस्मि	७	९	१७१
पुरुषः स परः पार्थ	८	२२	१८९
पूर्वाभ्यासेन तेनैव	६	४५	१६४
प्रकृतिं स्वामवष्टभ्य	९	८	१९५
प्रकृतेः क्रियमाणानि	३	२७	९७
प्रकृतेर्गुणसंमूढाः	३	२९	९८
प्रजहाति यदा कामान्	२	५६	७५
प्रयत्नाद्यतमानस्तु	६	४६	१६४
प्रयाणकाले मनसा	८	१०	१८४
प्रलपन्विसृजन् गृह्णन्	५	९	१३८

	अध्यायः	श्लोकसंख्या	पृष्ठाङ्कः
प्रशान्तमनसं ह्येनम्	६	२७	१५७
प्राप्य पुण्यकृतांल्लोकान्	६	४१	१६३
बलं बलवतां चाहं	७	११	१७१
बहूनां जन्मनामन्ते	७	१९	१७५
बहूनि में व्यतीतानि	४	५	१०७
बाह्यस्पर्शेष्वसक्तात्मा	५	२१	१४८
बीजं मां सर्वभूतानां	७	१०	१७१
बुद्धियुक्तो जहातीह	२	५१	७२
ब्रह्मण्याधाय कर्माणि	५	१०	१४२
ब्रह्मार्पणं ब्रह्महविः	४	२४	१२२
भयाद्रणादुपरतं	२	३६	६१
भवत्येष कथं कृष्णे (भास्करेण न धृतः)	३	३८	१०२
भवान् भीष्मश्च कर्णश्च	१	८	२१
भीष्मद्रोणप्रमुखतः	१	२४	२६
भूतग्रामः स एवायं	८	१९	१८८
भूमिरापोनलो वायुः	७	४	१६७
भोक्तारं यज्ञतपसां	५	२९	१५२
भोगैश्वर्यप्रसक्तानां	२	४५	६७
मत्तः परतरं नान्यत्	७	७	१६९
मनुष्याणां सहस्रेषु	७	३	१६७
मया ततमिदं सर्वं	९	४	१९४
मयाध्यक्षेण प्रकृतिः	९	१०	१९६
मयि सर्वाणि कर्माणि	३	३०	९९
मय्यासक्तमनाः पार्थ	७	१	१६६
महात्मानस्तु मां पार्थ	९	१३	१९७
मा क्लैब्यं गच्छ कौन्तेय	२	३	३७
मात्रास्पर्शास्तु कौन्तेय	२	१५	४६
मामुपेत्य पुनर्जन्म	८	१५	१८६
मां हि पार्थ व्यपाश्रित्य	९	३२	२०५
मोघाशा मोघकर्माणः	९	१२	१९७
य एनं वेत्ति हन्तारं	२	२०	५३

	अध्यायः	श्लोकसंख्या	पृष्ठाङ्कः
यज्ज्ञात्वा न पुनर्मोहम्	४	३५	१३०
यज्ञशिष्टामृतभुजो	४	३१	१२८
यज्ञशिष्टाशिनः सन्तः	३	१३	९०
यज्ञार्थात् कर्मणोन्यत्र	३	९	८८
यततो ह्यपि कौन्तेय	२	६०	७६
यतेन्द्रियमनोबुद्धिः	५	२८	१५२
यत्करोषि यदश्नासि	९	२७	२०३
यत्र काले त्वनावृत्तिम्	८	२३	१९०
यथाकाशस्थितो नित्यं	९	६	१९५
यथैधांसि समिद्धोग्निः	४	३७	१३१
यदक्षरं वेदविदो वदन्ति	८	११	१८४
यदा ते मोहकलिलं	२	५३	७३
यदा यदा हि धर्मस्य	४	७	१०८
यदि मामप्रतीकारम्	१	४५	३४
यदि ह्यहं न वर्तेयं	३	२३	९५
यदृच्छया चोपपन्नं	२	३३	६२
यदृच्छालाभसन्तुष्टः	४	२२	१२१
यदेव सांख्याः पश्यन्ति	५	५	१३६
यद्यदाचरति श्रेष्ठः	३	२१	९५
यद्यप्येते न पश्यन्ति	१	३७	३१
यद्यहं न प्रवर्तेय	३	२३	९५
यं यं वापि स्मरन् भावं	८	६	१८२
यं सन्न्यासमिति प्राहुः	६	२	१५६
यं हि न व्यथयन्त्येते	२	१६	४६
यस्त्वात्मरतिरेव स्यात्	३	१७	९१
यस्त्विन्द्रियाणि मनसा	३	७	८७
यस्य सर्वे समारम्भाः	४	१९	११८
यामिमां पुष्पितां वाचं	२	४३	६६
यावदेतान्निरीक्ष्येहं	१	२२	२५
यावादर्थ उदपाने	२	४७	७०
यान्ति देवव्रता देवान्	९	२५	२०२

	अध्यायः	श्लोकसंख्या	पृष्ठाङ्कः
युक्तः कर्मफलं त्यक्त्वा	५	१२	१४२
युधामन्युश्च विक्रान्तः	१	६	२०
ये चैव सात्त्विका भावाः	७	१२	१७२
ये त्वेतदभ्यसूयन्तः	३	३२	९९
येप्यन्यदेवताभक्ताः	९	२३	२०२
ये मे मतमिदं नित्यम्	३	३१	९९
ये यथा मां प्रपद्यन्ते	४	११	११०
येषामर्थे काङ्क्षितं नो	१	३२	२९
येषां त्वन्तं गतं पापं	७	२८	१७८
ये हि संस्पर्शजा भोगाः	५	२२	१४९
योगयुक्तो विशुद्धात्मा	५	७	१३७
योगसन्न्यस्तकर्माणं	४	४१	१३३
योगस्थः कुरु कर्माणि	२	४८	७२
योगिनामपि सर्वेषां	६	४७	१६५
योन्तःसुखोन्तरारामः	५	२४	१५०
यो मां पश्यति सर्वत्र	६	३०	१५८
यो यो यां यां तनुं भक्तः	७	२१	१७६
योयं योगस्त्वया प्रोक्तः	६	३३	१६०
रसोहमप्सु कौन्तेय	७	८	१७०
राजविद्या राजगुह्यं	९	२	१९३
लभन्ते ब्रह्मनिर्वाणं	५	२५	१५०
लोकेस्मिन् द्विविधा निष्ठा	३	३	७४
वासांसि जीर्णानि यथा	२	२३	५७
विद्याविनयसम्पन्ने	५	१८	१४८
वीतरागभयक्रोधः	४	१०	१०९
वेदाविनाशिनं नित्यं	२	२२	५५
वेदाहं समतीतानि	७	२६	१७७
वेदेषु यज्ञेषु तपस्सु चैव	८	२८	१९१
वेपथुश्च शरीरे मे	१	२९	२७
व्यवसायात्मिका बुद्धिः	२	४२	६६
व्यामिश्रेणेव वाक्येन	३	२	७४

	अध्यायः	श्लोकसंख्या	पृष्ठाङ्कः
शक्नोतीहैव यः सोढुं	५	२३	१४९
शुक्लकृष्णे गती ह्येते	८	२६	१९१
शुभाशुभफलैरेव	९	२८	२०३
श्रद्धावांल्लभते ज्ञानं	४	३९	१३२
श्रुतिविप्रतिपन्ना ते	२	५४	७४
श्रेयान् द्रव्यमयाद्यज्ञात्	४	३३	१२९
श्रेयान् स्वधर्मोधिगुणः	३	३५	१०१
श्रोत्रादीनीन्द्रियाण्यर्थे	४	२६	१२५
श्वशुरान् सुहृदश्चैव	१	२६	२६
संकरो नरकायैव	१	४१	३३
स एव कलुषः क्षुद्रः (भास्करेण न धृतः)	३	४०	१०३
स एवायं मया तेद्य	४	३	१०६
सक्ता कर्मण्यविद्वांसो	३	२५	९६
स घोषो धार्तराष्ट्राणां	१	१९	२४
सततं कीर्तयन्तो मां	९	१४	१९८
स तया श्रद्धया युक्तः	७	२२	१७६
सदृशं चेष्टते स्वस्याः	३	३३	१००
समोहं सर्वभूतेषु	९	२९	२०४
सर्वकर्माणि मनसा	५	१३	१४३
सर्वद्वाराणि संयम्य	८	१२	१८४
सर्वभूतस्थमात्मानम्	६	२९	१५८
सर्वभूतस्थितं यो मां	६	२१	१५९
सर्वभूतानि कौन्तेय	९	७	१९५
सर्वाणीन्द्रियकर्माणि	४	२७	१२६
सहयज्ञाः प्रज्ञाः सृष्ट्वा	३	१०	८९
सहस्रयुगपर्यन्तं	८	१७	१८७
सांख्ययोगौ पृथग्बालाः	५	४	१३५
साधिभूमाधिदैवं मां	७	३०	१७९
सुखदुःखे समे कृत्वा	२	३९	६४
संकरो नरकायैव	१	४१	३३
संन्यासस्तु महाबाहो	५	६	१३७

	अध्यायः	श्लोकसंख्या	पृष्ठाङ्कः
संन्यासः कर्मयोगश्च	५	२	१३४
संन्यासं कर्मणां कृष्ण	५	१	१३४
स्थितप्रज्ञस्य का भाषा	२	५५	७४
स्पर्शान् कृत्वा बहिर्बाह्यान्	५	२७	१५१
स्वधर्ममपि चावेक्ष्य	२	३२	६२
हतो वा प्राप्स्यसि स्वर्गं	२	३८	६१
हर्षमस्य निवर्त्यैष (भास्करेण न धृतः)	३	४२	१०३
हृषीकेशं तदा वाक्यम्	१	२१	२५

द्वितीयं परिशिष्टम्

पाठान्तरचक्रम्

अध्यायः	श्लोकः	भास्करधृतः पाठः	निर्णयसागरमुद्रितः पाठः
१	१	सर्वक्षत्रसमागमें ।	समवेता युयुत्सवः ।
१	८	कृपः शल्यो जयद्रथः ।	कृपश्च समितिंजयः ।
१	९	अन्येपि ।	अन्ये च ।
		नानायुद्धविशारदा ।	सर्वे युद्धविशारदाः ।
१	१०	अपर्याप्तं तदस्माकं बलं भीमाभिरक्षितम् ।	अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
		पर्याप्तं त्विदमेतेषा बलं भीष्माभिरक्षितम् ।	पर्याप्तं त्विदमेतेषा बलं भीमाभिरक्षितम् ।
१	१८	पाञ्चालश्च महेष्वासो द्रौपदेयाश्च पञ्च ये ।	द्रुपदो द्रौपदेयाश्च सर्वशः महीपते ।
१	१९	व्यनुनादयत् ।	व्यनुनादयन् ।
१	२२-२३		योत्स्यमानान्......
१	२०	सीदमानो ब्रवीदिदम् ।	विषीदन्निदमब्रवीत् ।
१	२८	दृष्ट्वेमान् स्वजनान् ।	दृष्ट्वेमं स्वजनम् ।
१	२९	स्रंसते गाण्डिवम् ।	गाण्डीवं स्रंसते ।
१	३२	प्राणांस्त्यक्त्वा सुदुस्त्यजान् ।	प्राणांस्त्यक्त्वा धनानि च ।
१	४२	उत्साद्यते जातिधर्मः कुलधर्मश्च शाश्वतः ।	उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ।
२	१	सीदमानम् ।	विषीदन्तम् ।
२	३	मा क्लैब्यं गच्छ ।	क्लैब्यं मा स्म गमः ।
२	५	श्रेयश्चर्तुम् ।	श्रेयो भोक्तुम् ।
		न त्वर्थकामस्तु गुरून्निहत्य ।	हत्वार्थकामांस्तु गुरूनिहैव ।
२	९	न योत्स्यामीति ।	न योत्स्य इति ।

अध्यायः	श्लोकः	भास्करधृतः पाठः	निर्णयसागरमुद्रितः पाठः
२	१०	सीदमानम् ।	विषीदन्तम् ।
२	११	त्वं मानुषेणोपहतान्तरात्मा ।	
२	१९	विनाशिनोप्रमेयस्य ।	अनाशिनोप्रमेयस्य ।
२	२१	भूत्वा भविता ।	भूत्वाभविता ।
२	२५	नानुशोचितुमर्हसि ।	नैवं शोचितुमर्हसि ।
२	३०	तथैवमन्यः ।	तथैव चान्यः ।
२	४७	यावदर्थः ।	यावानर्थः ।
२	५१	जहातीमे ।	जहातीह ।
३	२२	वर्ताम्येव च कर्मणि ।	वर्त एव च कर्मणि ।
३	२३	यद्यहं न प्रवर्तेयं ।	यदि ह्यहं न वर्तेय ।
		वर्त्मानुवर्तेरन् ।	वर्त्मानुवर्तन्ते ।
३	२७	भागशः ।	सर्वशः ।
३	३१	अनुवर्तन्ति ।	अनुतिष्ठन्ति ।
		ते विमुच्यन्ति ।	मुच्यन्ते तेपि ।
३	३२	नानुवर्तन्ति ।	नानुतिष्ठन्ति ।
३	३५	स्वधर्मोधिगुणः ।	स्वधर्मो विगुणः ।
		परधर्मोदयादपि ।	परधर्मो भयावहः ।
४	२	परम्पराख्यानम् ।	परम्पराप्राप्तम् ।
५	१	यः श्रेयान् ।	यच्छ्रेयः ।
५	२	नैःश्रेयसकरौ ।	निःश्रेयसकरौ ।
५	३	विमुच्यते ।	प्रमुच्यते ।
५	५	यदेव सांख्याः पश्यन्ति ।	यत्सांख्यैः प्राप्यते स्थानम् ।
५	२८	एवं युञ्जन् ।	युञ्जन्नेव ।
		संश्लेषमत्यन्तमुपगच्छति ।	संस्पर्शमत्यन्तं सुखमश्नुते ।
५	२९	सर्वाणि भूतान्यात्मनि ।	सर्वभूतानि चात्मनि ।
६	३९	कच्चिदुभयविभ्रष्टः ।	कच्चिन्नोभयविभ्रष्टः ।
६	४१	तातो गच्छति कश्चिद्दुर्गतिम् ।	कश्चिद्दुर्गतिं तात गच्छति ।
६	४३	जायते धीमतां कुले ।	कुले भवति धीमताम् ।
६	४४	पूर्वदैहिकम् ।	पौर्वदेहिकम् ।

अध्यायः	श्लोकः	भास्करधृतः पाठः	निर्णयसागरमुद्रितः पाठः
६	४५	सन् ।	सः ।
७	९	पुण्यः पृथिव्यां गन्धोस्मि ।	पुण्यो गन्धः पृथिव्यां च ।
७	१८	मे मतम्	मे मतः ।
७	२३	मद्भक्ताः शाश्वतं पदम् ।	मद्भक्ता यान्ति मामपि ।
७	२८	तन्तं गतम्	अन्तर्गतम् ।
८	७	असंशयम् ।	असंशयः ।
८	८	चेतसानन्यवृत्तिना ।	चेतसा नान्यगामिना ।
८	११	*संग्रहेणाभिधास्ये ।	संग्रहेण प्रवक्ष्ये ।
८	२२	यस्यान्तःस्थानि ।	यस्यान्तस्थानि ।

* संशोधकेनानुमतः पाठः ।

तृतीयं परिशिष्टम्

गीताभाष्योद्धृतवचनसूची

अथास्य वेदमुपश्रृण्वतः	१२
अग्निहोत्रं जुहुयात्	६६
अकुर्वन् विहितं कर्म (मनु०)	८२
अङ्गहीना (का० श्रौ० सू० १।५)	११
अचिन्त्याः खलु ये भावाः	१७०
अत्र कुरुतातोधर्मम्	१८
अथ परा यया (मुण्ड० १।१।५)	१८४
अथातोधिकारः (कात्यायनः)	९
अधिकारं विना	३
अधिकारात् प्रवचने	१६
अधिकार्येव शास्त्रार्थं	१३
अधीत्य विधिवत् (मनु० ६।२६)	३
अनधीत्य द्विजः (मनु० ६।२७)	३
अनादिसिद्धाश्च जीवाः	४३
अनेन जीवेनानुप्रविश्य (छान्दोग्य० ६।३।२)	१६८
अन्तःकरणस्थोप्यसौ	४७
अपवर्गेधिकारः	३
अपुनर्जन्मसम्बन्धः	८
अलंकृतं शुभैः शब्दैः	२४
अविनाशी वा अरे	४७
अवैध तूदनग्नित्वात्	१२
अशक्यं हि तत्पुरुषेण (शाबरभाष्य० १।१।२)	१५६
अष्टौचात्मगुणाः (गौ० ध० सू० ८।२०)	९
अस्थूलमनण्वह्रस्वम् (बृहद्० ३।८।८)	१८३
अस्य वेदमुपश्रृण्वतः (गौ० ध० सू०)	१२
अहङ्कारविमूढात्मा (गीता ३।२७)	११७

अहङ्कारेण मनसा गत्या याज्ञवल्क्यः ४४
आज्यैः स्तुवते ८१
आत्माभ्यासोपि १३
आदित्यवर्णम् १८३
आत्मानं योभिसन्धत्ते १५६
आत्माभ्यासोपि नास्यास्ति १३
आत्मैवेदं सर्वम् (छान्दोग्य० ७।२५।२) १९०
आब्रह्म भुवनात् (गीता ८।१६)
इच्छा द्वेषः सुखं (गीता १३।६) ४७
इदं सर्वं यदिदं (बृहद्० २।४।६५) १७५
इदं हि त्रिषु लोकेषु (महाभा० १।१।२।२७) १
इदं हि वेदसम्मितम् २४
इन्द्रो मायाभिः (बृहद्० २।५।१९) १७३
एवं ज्ञात्वा विमोक्ष्यसे (गीता ४।३२) १२९
एतद्वैतदक्षरं गार्गि (बृहद्० ३।८।८) १८०, १८४
एतद्वै सत्यकाम (बृहद्० ३।८।८) १८५
एतस्य वाक्षरस्य (बृहद्० ३।९।९) १८६
एवं विद्वान् पौर्णमासीम् १३६
एष सर्वेश्वर एषः (श्रुतिः) १७६
एषा तेभिहिता (गीता २।४०) ७१
ऐश्वर्यस्य समग्रस्य ७५
ओमित्येतदक्षरम् (छान्दोग्योप० १।१।१) ८३
ओङ्कारे ब्रह्मोपासनम् १२४
एकहेतुनिबन्धनानां सह वा १३९
कर्मेन्द्रियाणि संयम्य (गीता० ३।६) ११८
कथमसतः सज्जायेत (छान्दोग्योप०) ८२
किं पुनर्ब्राह्मणाः (गीता ९।३३) ५
कृष्णप्रोक्तामिमाम् (महा० १।६।६।६२।४२–४३) १
केचिदज्ञानतो नष्टाः ९३
कर्मणा मनसा वाचा (महा० शुकानुप्रश्ने) ८१
कर्मणां सहकारित्वम् ९
कर्मण्येवाधिकारः (गीता २।४७) ७९

कर्मणा मनसा वाचा	८१
कार्ष्णवेदमिमं पुण्यम् (महा० १।२६१)	२४
कुमारस्य तु (महा० उद्योग, प्रजागर, अध्याय: ४०)	४
कुरु कर्म (गीता ४।१५)	११४
कृष्णप्रोक्तामिमाम् (महा० १।६।६२ ४३-४४)	११९
कर्मण्येवाधिकारस्ते (गीता)	११९
ज्ञानयोगेन सांख्यानाम् (गीता)	८२
गायत्र्या ब्राह्मणम् (व० स्मृ० ४।३)	४
चत्वारिंशत् संस्काराः (गौ० ध० सू० ८।१९)	९
ज्यायसी चेत् (गीता ३।१)	७९
चातुर्विध्याच्च प्रत्यक्षम्	४९
ज्ञानं विज्ञान (गीता० १८।४२)	५६
ज्ञानमुत्पद्यते (महा० शान्ति०)	७८
तं यथा यथोपासते (वाजिनां श्रुतिः)	१०१, २०२
ततोक्षरात् संभवतीह विश्वम् (मु० १।१।७)	
तदात्मानं स्वयमकुरुत (तैत्ति० २।७)	
तदेकं वद (गीता ३।२)	१६९
तदैक्षत, स आत्मा (छान्दोग्य० ६।१४।३)	१६५
तद्यो देवानाम् (बृहदार० १।४।१०)	१२५, १११
तद्धै तथापश्यन्नृषिर्वामदेवः (बृहद्० १।४।१०)	१५३
तपसा ब्रह्म जिज्ञासस्व (श्रुतिः)	७८
तपोनियममास्थाय (महा० १।६।६२।४२?४३)	१
तमेतं वेदानुवचनेन (बृह० उप० ४।४।२२)	८०
तद्भेदं तर्हि (बृहद्० १।४।७)	१८८
तस्य तावदेव चिरम् (छान्दोग्य० ६।१४।२)	७३, १४३, १८९
तस्य महतो भूतस्य निःश्वसितम् (बृह०)	९०, १३१, १४१
तिर्यग्भ्यः पुरुषाः श्रेष्ठाः	१६
तेपि यान्ति (गीता ९।३२)	५
तेर्चिषमभिसंभवन्ति (बृहद्० ६।२।१५)	१९०
तेषामेवेति शब्देन	१३
त्यज धर्ममधर्मं च (गीता)	८२
त्यथ पदार्थविवेकाय (उपदेशग्रन्थः)	८४

दिदृक्षासैन्ययोः ३५
दैविकानां युगानाम् (मनु० १।७२) १८७
दैवी सिद्धिविमोक्षाय (गीता १६।५) ११८
धर्माणां विप्रकीर्णानाम् १७
धर्मेण पापमपनुद (श्रुतिः) ७८
ध्वनिमात्रकृतो ह्येव (वाक्यपदीय) ८१
न कलञ्जं भक्षयेत् १०
न कर्तृत्वं न कर्माणि (गीता० ५।१३) १४४
न कर्मणा प्रजया (महानारा०) ८१
न जायते म्रियते (गीता २।२०) ११७
न तस्य कार्यम् (श्वेताश्व० ६।८) १७०
न शूद्राय मतिं दद्यात् (मनु० ४।८०) २
न वै देवान् १८७
नहि ज्ञानेन सदृशम् (गीता ४।३८) ११०
नाहं प्रकाशः सर्वस्य (गीता ७।२५) ७
नित्यं सुगन्धस्नानशीलः (स्मृतिः) १२५
नित्यः सर्वगः स्थाणुः (गीता २।२४) १४४
नियतं कुरु कर्म त्वम् (गीता ३।८) १३९
निःश्रेयसाय १२
नैतदेवमन्तःकरणस्थोप्यसौ जीवात्मना—वैशेषिकाः ४७
न्यासमेषां तपसा (महाना० उप० २४१।१) ८१
न्यायस्मृत्याचाराविरोधी २
पापमेवाश्रयेदस्मान् (गीता १।३५) ४२
पठन्द्विजो (रामा० १।१।१००) २
पतितव्याधिशूद्राणाम् ११
पद्युर्वा (व० स्मृ० १८।९) १२
परधर्मेण जीवन् हि (मनु०) १५
पर्युदस्तो हि यो यस्मात् १४
पशुयागे वपाहोमः २०६
पूर्वराजर्षिणा तपस्या १२
प्रजापतिर्वपाम् २०६

प्रतिषेधमतिक्रम्य (तत्त्ववा० अ० ३) १५
प्रज्ञावादांश्च भाषसे (गीता १।३५) ४२
प्रत्याहारस्तथा ध्यानम् १२७
प्रयाणकाले (गीता) १८९
पूर्णाहुत्या सर्वान् ११९
बन्धमोक्षव्यवस्थित्याम् ७
ब्रह्मणा सह ते सर्वे १११
ब्रह्मार्पणम् (गीता ४।२४) १४१
ब्राह्मणं तु पुरस्कृत्य १६
ब्राह्मणराजन्यवैश्यानाम् (का० श्रौ० सू० १।१।६) १०
ब्राह्मणो जायमानः (मनु० १।९९) १६
मामुपेत्य (गीता ८।१६) १९३
मनो ब्रह्म १२३
ममैवांशो जीवलोके (गीता १५।७) ४३
मयि सर्वाणि कर्माणि (गीता ३।१००) १४१
मयि सर्वाणि भूतानि (गीता ३।३०) १०७, १५४
महायज्ञैश्च (मनु० २।८) ९
मामुपेत्य पुनर्जन्म (गीता) १९३
मायां तु प्रकृतिम् (श्वेताश्व० ४।१०) १७३
यं यथा यथोपासते ११०
यः शास्त्रविधिमुत्सृज्य (गीता १६।२३) १४
यः स्वाध्यायमधीयीत १२
यः आत्मानमेव लोकम् १२९
य एवं विद्वान् पौर्णमासीम् १३६
यज्ञो वै विष्णुः ८८, १८१
यत्तद्यतिवराः (महा० १।१।१।२६०) ६
यत्र यस्याधिकारः १०
यथान्नं मधुसंयुक्तम् (वसिष्ठः) ७१
यथाक्रतुरस्मिन् लोके २०२
यज्ञेन दानेन (बृहदा० ४।४।२२) ८३
यज्ञो वै विष्णुः (तै० ब्रा० ३।१) ८९ १८१

भारतश्रवणेधिकारः १
यथैकस्मिन् घटाकाशे ४४
यथोर्णनाभिः (मु० १।१।७) १६९
यदक्षरम् (गीता ८।११) ७,१८५
यस्ते गुह्यकान् (महा० उद्योग० प्रजा० अ०) ५
यस्त्वात्मरतिरेव स्यात् (गीता ३।१७) ९६
यस्य च दुष्टं करणम् ५०
यस्य सर्वे समारम्भाः (गीता) १२२
यागस्थक्षत्रियं हन्ता ८
यावदधिकारम् (ब्र०सू० ३।३।३२) १८६
यावज्जीवम् ९
युद्धत्यागश्च ३५
योगः कर्मसु कौशलम् (गीता) ८३
योगे त्विमाम् (गीता २।४०) ७१
योधीते भारतं पुण्यम् (महा० १।६।६२।९१) १
योयमव्यक्तः १८९
यो यो देवानाम् (बृहद्० १।४।१०) १८६
यो वा एतदक्षरमविदित्वा १२९
यो ह वै तत्परमम् (मु० २।२।९) १८६
वरं स्वधर्मो विगुणः (गीता ३।३५) १५
वसन्ते ब्राह्मणेन (काश्रौसू० १।१।६) ११
विज्ञाय प्रज्ञां कुर्वीत (बृहदार० ४।४।२६) १०४
विधिना त्वेकवाक्यत्वात् २०६
व्याख्येयाद् गुणवादेन २०६
विधिनियुङ्क्ते ८
विद्याश्रमिणः ९
विद्यया देवलोकः (श्रुतिः) १२५
विधिना युज्यते १०
विद्वान् युक्तस्समाचरन् (गीता ३।२६) १३९
विदुषा ब्राह्मणेन (मनु० १।१०३) ३
विद्याश्रमिणः ९

विधिना युज्यते १०
विधिर्नियुङ्क्ते ८
वेदे मन्त्रेषु गृह्येषु १६
वेदाभेदं भारतस्यावलोक्य २५
वैदिकानां हि शब्दानाम् १७
वैधकृतार्थकम् ११
शरीरस्थोपि कौन्तेय (गीता १३।३१) १४३
शान्तात्मानो द्विजश्रेष्ठाः (द्वैपायनः) ७
शान्तो दान्तः ६८
शीलदोषादगृह्णन्तम् ५५
शूद्रयोनावहं जातः (महा० उद्योग प्रजागर ४०) ४
शूद्रश्चतुर्थो वर्णः (गौतम) १२
शूरसंख्यापरव्यूहे :३५
श्रवणायापि बहुभिः ६१
श्रावयेच्च महापुण्यम् (महा० १।६।६२।१०) १
श्रेयश्चतुं भैक्ष्यमपीह लोके (गीता २।५) :४२, १०१
श्रेयान् द्रव्यमयात् १२१
श्रोतादधिकृतानाम् १३
संक्षेपविस्तरावेतौ १५५
स एव तद्भवति ९२
स यां काञ्चन यतते (शतपथब्राह्मण) ८
सदेव सोम्येदम् (छान्दोग्य ६।२।१) १९२, १७५, ५५
स धर्म इति विज्ञात १५५
स य आत्मानम् (श्रुतिः) १२९
समत्वं योग उच्यते ६५
सर्व एते पुण्यलोकाः ११५
सर्वं तं परादाद्यः (बृहदा० २।४।६) १३५
सर्वस्तरतु (महा० शान्ति मोक्ष ३१३।१)
सर्वं खल्विदं ब्रह्म (श्रुतिः) १२३
सलिल एको द्रष्टा (बृहद्० ४।३।३२) १४४
स सन्न्यासी १५४

साक्षात्कृतधर्माण ऋषयो बभूवुः १७
स्त्रियो वैश्याः (गीता ९।३२) ५
सन्न्यासं कर्मणां कृष्ण (गीता ५।१) १४१
सर्वकर्माणि मनसा (गीता ५।१३) १५३
स्मार्तं च पितृयज्ञादि १३
स्वर्गकामो यजेत ६८
हिरण्यगर्भं जनयामास १८१
हीनाद्धीनाच्छुभं जन्म १३